ॐ ह्रीं उत्सर्ग समितिपालकाय मुनये पूर्णार्घं० ॥

उदकचंदनतंदुलपुष्पकैश्चरुसुदीपसुधूपफलार्घकैः ।
धवलमंगलगानरवाकुले जिनगृहे व्रतराजमहं यजे ॥

ॐ ह्रीं चारित्रशुद्धिमहाव्रताय पूर्णार्घं० ॥

अथ जाप्य १०८ लवंगादिना जपेत् । जाप्य मंत्र–" ॐ ह्रीं अ सि आ उ सा चारित्रशुद्धिव्रतेभ्यो नमः "

इतिश्री ज्ञानभूषाकिंत सुमतिब्रह्मसहाय्यसापेक्षे ।
चारित्रशुद्धिविधान बारसोचौबीसविधाने समाप्तम ॥

बारसौ चौतीस व्रत विधान समाप्तम् ।

॥ ॐ ॥

अथ रविवारव्रत उद्यापनम् ।

नत्वा श्रीमज्जिनाधीशं सर्वज्ञं सुखदायकम ।
वक्ष्ये सूर्यव्रतं यस्य पूजा सौख्यं प्रदायिनी ॥ १ ॥
आदौ गंधकुटीपूजा ततस्नपनमाचरेत् ।
पश्चात् कोष्टगता पूजा कर्तव्या विबुधोत्तमः ॥ २ ॥
पार्श्वनाथजिनेन्द्रस्य प्रतिमां परमां शुभाम् ।
आह्वाननादिविधिना स्थापयेत स्वस्तिकोपरि ॥ ३ ॥
पश्चात् पूजा प्रकर्तव्या विधिवदष्टधा मुदा ।
उत्तमां सर्वसामग्रीं मेलयित्वा त्रिशुद्धितः ॥ ४ ॥

इति जिनपूजनप्रतिज्ञा नाम जिनप्रतिमाग्रे परिपुष्पांजलिं क्षिपेत ।

अथ स्थापना ।

स्वामिन् संवौषट् कृताह्वाननस्य, द्विष्ठं नेनोटङ्कितस्थापनस्य ।
स्वामिन् निर्नेतु वषट्कार जागृत,सान्निध्यस्य प्रारभेयाष्टसिद्धिप ॥

ॐ ह्रीं श्री चिंत मणिपार्श्वनाथ अत्र अवतर अवतर संवौषट् स्वाहा।

ॐ ह्रीं अत्र तिष्ठ तिष्ठ ठः ठः स्वाहा (स्थापनं)

अत्र मम संन्निहितो भव भव वषट् सन्निधिकरणम् ॥

ॐ ह्रीं परब्रह्मणे नमो नमः ॥ ॐ ह्रीं स्वस्ति स्वस्ति, जीव जीव, नन्द नन्द, वर्धस्व वर्धस्व, विजयस्व विजयस्व, अनुसाधि अनुसाधि, पुनीहि पुनीहि, पुण्याहं पुण्याहं, प्रियंताम् प्रियंताम्, मंगलं मंगलं, पुष्पांजलिं क्षिपेत् ।

अथाष्टकम् ।

क्षीरहीरगौरनीरपूर्ववारिधारया ।
कुन्दकुन्दचन्दनादिमिश्रसारया ॥
चिन्तितार्थकामधेनुकल्पवृक्षदायकम् ।
पूजयाम्यचिन्त्यतार्थदं ह्री पार्श्वनायकं ॥ १ ॥

ॐ ह्रीं श्री चिंतामणिपार्श्वनाथाय जलं निर्वपामीति स्वाहा ।

अक्षतैर्वर्जनैरनर्घचन्दनद्रवैः ।
कुंकुमादिमिश्रितैरनल्पषट्पदाश्रितै ॥
चिन्तितार्थकामधेनुकल्पवृक्षदायकम् ।
पूजयाम्य० ॥ २ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय चन्दनं निर्वपामीति स्वाहा ।

औषधेन सिन्धुफेनहारभासमुज्वलै-
रक्षितैः सुलक्षितैरजोतखण्डवर्जितैः ॥
चिन्तितार्थकामधेनुकल्पवृक्षदायकम् ।
पूजयाम्य० ॥ ३ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय अक्षतं निर्वपामीति स्वाहा ।

पारिजातवारिजातकुन्दहेमकेतकैः ।
मालतीसुचंपकादिसारपुष्पमालया ॥
चिन्तितार्थकामधेनुकल्पवृक्षदायकम् ।
पूजयाम्य० ॥ ४ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय पुष्पं निर्वपामीति स्वाहा ।

व्यंजनेन पायसादिभिः समं च षट्रसैः ।
मोदकौदनादिभिः सुवर्णभाजनस्थितैः ॥

चिन्तितार्थकामधेनुकल्पवृक्षदायकम् ।
पूजयाम्य० ॥ ५ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय नैवेद्यं निर्वपामीति स्वाहा ।

रत्नसोमसर्पिषादिदीपकैः कृतोज्ज्वलैः ।
वातघाततोपकोपकंपरूपवर्जितः ॥
चिन्तितार्थकामधेनुकल्पवृक्षदायकम् ।
पूजयाम्य० ॥ ६ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय दीपं निर्वपामीति स्वाहा ।

सीलिकासितागुरुप्रधूपकैः शुभप्रदैः ।
वानमानवर्धमानमाननीमनोहरैः ॥
चिन्तितार्थकामधेनु कल्पवृक्षदायकम् ।
पूजयाम्य० ॥ ७ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय धूपं निर्वपामीति स्वाहा ।

श्रीफलाम्रकर्कटीसुदाडिमादिभिः फलैः ।
वर्णमिष्टसौरभादिचक्षुरादिमोदनैः ॥
चिन्तितार्थकामधेनुकल्पवृक्षदायकम् ।
पूजयाम्य० ॥ ८ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय फलं निर्वपामीति स्वाहा ।

जीवनीसिनागुरुद्रवाक्षतैः प्रसूनकैः ।
शुभेश्वरुप्रदीपकैः सुधूपरूपसत्फलैः ॥
सुवर्णभाजनस्थितैर्मारमारमाभिधैः ।
[illegible] पणार्चके महा[illegible]निगर्वीक्षिते ॥ ९ ॥

ॐ ह्रीं श्री चिन्तामणिपार्श्वनाथाय अर्घं निर्वपामीति स्वाहा ।

अथ प्रत्येक पूजा ।×

(१)

आषाढशुक्लपक्षस्य प्रथमो रविवासरः ।
तद्दिने प्रोषधं कुर्यात सूर्यव्रतप्रसिद्धये ॥

ॐ ह्रीं श्री सूर्यव्रतप्रथमोपवासप्रोषधोद्योतनाय श्रीजिनेन्द्राय जल-चंदनाक्षतपुष्पचरुदीपधूपफलार्घं निर्वपामीति स्वाहा ।

द्वितीयादित्यवारे च प्रोषधं यः तपस्यति ।
पूर्वसूरिसदाचारी सूर्यव्रतप्रसिद्धये ॥

ॐ ह्रीं श्री सूर्यव्रतद्वितीयोपवासप्रोषधोद्योतनाय जलादिकं नि० ।

तृतीयादित्यवारे च प्रोषधं हि करोति यः ।
तस्य स्यात सर्वसिद्धिश्च सूर्यव्रतप्रसिद्धये ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयोपवासप्रोषधोद्योतनाय अर्घं नि० ।

त्रिशुद्ध्या प्रोषधं कुर्यात चतुर्थे रविवासरे ।
पुण्येन तेन संसिद्धिः सूर्यव्रतप्रसिद्धये ॥

ॐ ह्रीं श्री सूर्यव्रतचतुर्थोपवासप्रोषधोद्योतनाय अर्घं नि० ।

यः कुर्यात प्रोषधं भव्यं पंचमे सूर्यवासरे
धनधान्यागमस्तस्य सूर्यव्रतप्रसिद्धये ॥

ॐ ह्रीं श्री सूर्यव्रतपंचमोपवासप्रोषधोद्योतनाय जलादिकं नि० ।

षष्ठे हि रविवारे च प्रोषधं परमादरात ।
यः करोति स धन्यश्च सूर्यव्रतप्रसिद्धये ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमोपवासप्रोषधोद्योतनाय जलादिकं नि०

× श्रीफल साथिया पर चढावणा ।

सप्तमे रविवारे च प्रोषधो हि करोति यः ।
सर्वसिद्धिर्गृहे तस्य सूर्यव्रतप्रसिद्धये ॥
ॐ ह्रीं श्री सूर्यव्रतसप्तमोपवासप्रोषधोद्योतनाय जलादिकं नि०

अष्टमे रविवारे च प्रोषधं सुखदायकम् ।
सुखार्थं कुरुते नित्यं सूर्यव्रतप्रसिद्धये ॥
ॐ ह्रीं सूर्यव्रताष्टमोपवासप्रोषधोद्योतनाय जलादिकं नि० ।

प्रोषधं सुखदं कुर्यात् नवमे रविवासरे ।
सर्वसंपद्गृहे तस्य सूर्यव्रतप्रसिद्धये ॥
ॐ ह्रीं सूर्यव्रतनवमोपवासप्रोषधोद्योतनाय जलादिकं नि० ।

अषाढशुक्लादारभ्य नवेति सूर्यवासराः ।
प्रोषधेन समं कुर्यात् स नरः सुखमेधते ॥
ॐ ह्रीं श्री प्रथमवर्षे रविव्रतोपवासप्रोषधोद्योतनाय पूर्णार्घं निर्वपामीति स्वाहा ।

(२)

आषाढमासे खलु शुक्लपक्षे, सूर्यादिवारे द्वितीये च वर्षे ।
आचाम्लभुक्तं पुनरेकवारं करोति यः सर्वसुखं लभेत ॥१॥
ॐ ह्रीं श्री सूर्यव्रतद्वितीयवर्षे प्रथमकांजिकाहारप्रोषधोद्योतनाय जलादिकं निर्वपामीति स्वाहा ।

द्वितीयवर्षसम्बंधिद्वितीये सूर्यवासरे ।
कांजिकाहारकं कुर्यात् स्वर्गसोपानप्राप्तये ॥ २ ॥
ॐ ह्रीं सूर्यव्रतद्वितीयवर्षे द्वितीयकांजिकाहारप्रोषधोद्योतनाय जलादिकं निर्वपामीति स्वाहा ।

द्वितीयवर्षसम्बंधितृतीये रविवासरे ।
तद्दिने कांजिकाहारं कुर्वन्तु व्रतसिद्धये ॥ ३ ॥

ॐ ह्रीं श्री सूर्यव्रतद्वितीयवर्षे तृतीयकांजिकाहारप्रोषधोद्योतनाय जलादिकं निर्वपामीति स्वाहा।

द्वितीये खलु वर्षे च चतुर्थे रविवासरे।
तद्दिने कांजिकाहारं कर्तव्यं भव्यसत्तमैः ॥ ४ ॥

ॐ ह्रीं श्री सूर्यव्रतद्वितीयवर्षे चतुर्थकांजिकाहारप्रोषधोद्योतनाय जलादिकं निर्वपामीति स्वाहा।

द्वितीयवर्षसम्बंधि पंचमे सूर्यवासरे।
कांजिकाहारं कुर्यात् सुखसंपत्तिहेतवे ॥ ५ ॥

ॐ ह्रीं श्री सूर्यव्रतद्वितीयवर्षे पंचमकांजिकाहारप्रोषधोद्योतनाय जलादिकं नि०।

द्वितीये वर्षके रम्ये षष्ठे च रविवासरे।
कांजिकाहारभोक्तव्यं सूर्यव्रतप्रसिद्धये ॥ ६ ॥

ॐ ह्रीं श्री सूर्यव्रतद्वितीयवर्षे षष्ठमकांजिकाहारप्रोषधोद्योतनाय जलादिकं नि०।

वर्षे द्वितीये भो भव्याः कांजिकाहारमुत्तमं।
कुर्वन्तु सर्वदा नित्यं सप्तमे सूर्यवासरे ॥ ७ ॥

ॐ ह्रीं श्री सूर्यव्रतद्वितीयवर्षे सप्तमकांजिकाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा।

द्वितीयवर्षे संजाते रविवारे चाष्टमे पुनः।
कांजिकाहारभुक्तिश्च कर्तव्या व्रतशुद्धये ॥ ८ ॥

ॐ ह्रीं श्री द्विती० वर्षे अष्टमकांजिकाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा।

द्वितीयवर्षसंजाते नवमे रविवासरे।
संप्रोक्तं कांजिकाहारं व्रतसिद्धयै दिगंबरैः ॥ ९ ॥

ॐ ह्रीं श्री द्वितीयवर्षेनवमकांजिकाहारप्रोषधोद्योतनाय जलादिकं निर्वपामीति स्वाहा ।

सूर्यव्रतस्य सम्बंधि कांजिकाहारकाष्टकं ।
कृत्वा च द्वितीये वर्षे पार्श्वनाथं च पूजयेत ॥ १० ॥

ॐ ह्रीं श्री द्वितीयेवर्षे कांजिकाहारप्रोषधोद्योतनाय पूर्णार्घं नि० ।

(३)

वर्षे तृतीये पुनरागते च क्षारं रसं त्याज्य करोति भुक्तिम् ।
आषाढमासे प्रथमे च पक्षे सूर्यादिवारे लभते सुखं स ॥ १ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितप्रथमैकभुक्तिः प्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

तृतीयवर्षे सम्बंधि द्वितीये रविवासरे ।
तद्दिने चैकभुक्तं च कर्तव्यं लवणं विना ॥ २ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितद्वितीयभुक्तप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

तृतीये रविवारे च तृतीये वर्षे पुनः
लवणेन रहिता भुक्तिः कर्तव्या व्रतसिद्धये ॥ ३ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहिततृतीयैकभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

चतुर्थे रविवारे च तृतीये वर्षे मुदा ।
लवणेन विना भुक्तिः कार्येत सुविचक्षणः ॥ ४ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितचतुर्थकभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

पंचमे सूर्यवारे तृतीये वर्षे तृतीये पुनः
लवणेन विना भुक्तिः करोति व्रतधारकः ॥ ५ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितपंचमैकभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

षष्ठे हि रविवारे च लवणेन विना नरः ।
भुक्तिं कुर्यान्न स पूतात्मा तृतीये वर्षे मुदा ॥ ६ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहित षष्ठैकभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

सप्तमे सूर्यवारे च वत्सरे हि तृतीयके ।
लवणेन विना भुक्तिं कुर्वंतु व्रतसिद्धये ॥ ७ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितसप्तमैकभुक्तिप्रोषधोद्योतनाय अर्घं नि० ।

अष्टमे सूर्यवारे च तृतीये वत्सरे पुमान् ।
लवणेन विना भुक्तिं यः करोति स धर्मभाक् ॥ ८ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितअष्टमैकभुक्तिप्रोषधोद्योतनाय अर्घं नि०

तृतीये वत्सरे जाते नवमे रविवारे ।
लवणेन विना भुक्तिं कुर्वंतु हितचिंतकाः ॥९॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितनवमैकभुक्तिप्रोषधोद्योतनाय अर्घं नि० ॥

अमुना हि प्रकारेण कुर्वंति ये नराः शुभम् ।
व्रतमादित्यमङ्गं च ते नराः धर्मनायकाः ॥१०॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे लवणरहितभुक्तिप्रोषधोद्योतनाय पूर्णार्घं नि० ॥

(४)

आषाढमासे खलु शुक्लपक्षे वर्षे चतुर्थे पुनरागते च ।
सूर्यादिवारे चटुकप्रमाणं भोक्तव्यमन्नं व्रतधारकेण ॥१॥

ॐ ह्रीं श्रीं सूर्यव्रतचतुर्थवर्षे प्रथमैकचाटुकप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

चतुर्थे वत्सरे जाते द्वितीये रविवासरे ।
चाटुकमन्नं भोक्तव्यं सूर्यव्रतप्रसिद्धये ॥ २ ॥

ॐ ह्रीं श्रीं सूर्यव्रत चतुर्थवर्षे द्वितीयैकचाटुप्रोषधोद्योतनाय पूर्णार्घं नि० ।

वर्षे चतुर्थसंजाते तृतीये रविवारे ।
एचाटुकप्रमाणान्नं भोक्तव्यं व्रतसिद्धये ॥ ३ ॥

ॐ ह्रीं श्रीं सूर्यव्रतचतुर्थवर्षे तृतीयैकचाटुप्रोषधद्योतनाय अर्घं नि० ।

वर्षेचतुर्थे चतुर्थे हि वासरे रविसंज्ञके ।
चाटुप्रमाणमन्नं च भोक्तव्यं व्रतशुद्धये ॥ ४ ॥

ॐ ह्रीं श्रीं सूर्यव्रतचतुर्थवर्षे चतुर्थैकचाटुप्रोषधोद्योतनाय अर्घं नि० ।

चतुर्थे वत्सरे जाते पंचमे सूर्यवासरे ।
एकचाटुप्रमाणान्नं भोक्तव्यं व्रतधारिणा ॥ ५ ॥

ॐ ह्रीं श्रीं सूर्यव्रततृतीयवर्षे पंचमैकचाटुप्रोषधोद्योतनाय अर्घं नि० ।

चतुर्थे हि समायाते षष्ठे रविदिने तथा ।
चाटुप्रमाणं भोक्तव्यं रविव्रतविशुद्धये ॥ ६ ॥

ॐ ह्रीं श्रीं सूर्यव्रततृतीयवर्षे षष्ठैकचाटुप्रोषधोद्योतनाय अर्घं नि० ।

वर्षे चतुर्थे संजाते सप्तमे रविवासरे ।
एकचाटुप्रमाणान्नं भोक्तव्यं परमादरात् ॥ ७ ॥

ॐ ह्रीं श्रीं सूर्यव्रततृतीयवर्षे सप्तमैकचाटुप्रोषधोद्योतनाय अर्घं नि० ।

अष्टमे रविवारे च वर्षे चतुर्थे मुदा ।
चाटुकमन्नं भोक्तव्यं सूर्यव्रतविशुद्धये ॥ ८ ॥

ॐ ह्रीं श्रीं सूर्यव्रतचतुर्थवर्षेऽष्टैकचाटुप्रोषधोद्योतनाय अर्घं नि० ।

वर्षे चतुर्थे नवमे च वासरे सूर्यसंज्ञके ।
चाट्टुमपाणं भोक्तव्यं सूर्यव्रतविधायकैः ॥ ९ ॥
ॐ ह्रीं श्री सूर्यव्रतचतुर्थवर्षे नवमैकचाट्टुप्रोषधोद्योतनाय अर्घं नि० ।
चतुर्थवर्षमध्ये च सूर्ये सूर्ये हि वासरे ।
नवमं चाट्टुकं कृत्वा पार्श्वनाथं प्रपूजयेत् ॥ १० ॥
ॐ ह्रीं श्री सूर्यव्रतचतुर्थे वर्षे चाट्टैकभुक्तिप्रोषधोद्योतनाय अर्घं नि० ।

(५)

आषाढशुक्लपक्षस्य प्रथमादित्यवासरे ।
तक्रोदनं च भोक्तव्यं केवलं वर्षपंचमे ॥ १ ॥
ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे प्रथमनिवेडप्रोषधोद्योतनाय अर्घं नि० ।
वर्षे पंचमे जाते द्वितीये सूर्यवासरे ।
निवेडनामभुक्तिश्च कर्तव्या व्रतधारिणा ॥ २ ॥
ॐ ह्रीं श्री सूर्यव्रतपंचमवर्षे द्वितीयनिवेडप्रोषधोद्योतनाय अर्घं नि० ।
तक्रोदनं हि भोक्तव्यं वत्सरे पंचमे तथा ।
तृतीये सूर्यवारे च सूर्यव्रतविधायकैः ॥ ३ ॥
ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे तृतीयनिवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।
वर्षे पंचमके भव्यैः कर्तव्यं हि निवेडकं ।
चतुर्थे सूर्यवारे च रविव्रतविशुद्धये ॥ ४ ॥
ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे चतुर्थनिवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।
पंचमेऽब्दे समायाते पंचमे रविवासरे ।
निवेडनामभुक्तिश्च कर्तव्या व्रतधारकैः ॥ ५ ॥
ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे पंचमनिवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

पंचमेष्टे समायाते षष्ठे च रविवासरे ।
निवेडप्रोषधं कुर्यात सूर्यव्रतप्रसिद्धये ॥ ६ ॥

ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे षष्ठमनिवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

सप्तमे रविवारे च निवेडं च प्रकारयेत् ।
पंचमे वत्सरे भव्यः आदित्यव्रतसिद्धये ॥ ७ ॥

ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे सप्तमनिवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमे सूर्यवारे च पंचमे वत्सरे मुदा ।
निवेडभुक्तिमादाय पार्श्वनाथं प्रपूजयेत् ॥ ८ ॥

ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे अष्टमनिवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

पंचमेष्टे समायाते नवमे रविवासरे ।
तक्रोदनं च भोक्तव्यं केवलं व्रतधारिणा ॥ ९ ॥

ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे नवमनिवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

निवेडं नवमे प्रोक्तं पंचमे वत्सरे शुभे ।
पूजनं पार्श्वनाथस्य स्मरणं भजनं कुरु ॥ १० ॥

ॐ ह्रीं श्री सूर्यव्रतपंचमे वर्षे निवेडप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

(६)

एकान्नं च भोक्तव्यं वर्षे षष्ठे समागते ।
आषाढशुक्लपक्षस्य प्रथमे रविवासरे ॥ १ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे प्रथमैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

षष्ठे संवत्सरे जाते द्वितीये रविवासरे ।
एकान्नमेव भोक्तव्यमपरान्नं न सर्वथा ॥ २ ॥

ॐ ह्रीं श्री सूर्यव्रततृतीयवर्षे द्वितीयैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

द्रव्यप्रमाणवर्षे हि तृतीये सूर्यवासरे ।
एकान्नभुक्तिः कर्तव्या सूर्यव्रतविधायकैः ॥ ३ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे तृतीयैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

चतुर्थे सूर्यवारे च वर्षे षष्ठे तथैव च ।
एकान्नभुक्तिः संभोक्ता सूर्यव्रतप्रकाशकैः ॥ ४ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे चतुर्थैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

वर्षे षष्ठे समायाते पंचमे रविवासरे ।
एकान्नमेव भुंजीत सूर्यव्रतविधायकैः ॥ ५ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे पंचमैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

एकान्नभुक्तिः संभोक्ता सूर्यव्रतप्रकाशकैः ।
षष्ठे वर्षे प्रयाते च षष्ठे मार्तण्डवासरे ॥ ६ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे षष्ठैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

षष्ठेष्ठे सम्प्रयाते च सप्तमे भानुवासरे ।
एकान्नभुक्तिः कर्तव्या सूर्यव्रतविधायकैः ॥ ७ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे सप्तमैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति० ।

अष्टमे रविवारे च षष्ठे वर्षे सुखार्थिभिः ।
एकमन्नं हि भोक्तव्यं सूर्यव्रतप्रकाङ्क्षैः ॥ ८ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे अष्टमैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति० ।

षष्ठे संवत्सरे जाते नवमे सूर्यवासरे ।
एकान्नभुक्तिः संप्रोक्ता सूर्यव्रतप्रकाङ्क्षैः ॥ ९ ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे नवमैकान्नभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति० ।

षष्ठे वर्षे प्रकर्तव्या नव चैकान्नभुक्तयः ।
आषाढमाससमारम्भ सूर्ये सूर्ये च वासरे ॥ १० ॥

ॐ ह्रीं श्री सूर्यव्रतषष्ठमे वर्षे एकान्नभुक्तिप्रोषधोद्योतनाय पूर्णार्घं निर्वपामीति० ।

(७)

आषाढमासे शुभशुक्लपक्षे मार्तण्डवारे खलु सप्तमाब्दे ।
निगोरसं भोजनमेकवारम् कर्तव्यमादित्य व्रताय भव्यैः ॥१॥

ॐ ह्रीं श्री सूर्यव्रत सप्तमवर्षे प्रथमनिगोरसभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति० ।

सप्तमेऽष्टे समायाते द्वितीये रविवासरे ।
गोरसं नैव भोक्तव्यं दधिदुग्धघृतादिकं ॥ २ ॥

ॐ ह्रीं श्री सूर्यव्रतसप्तमवर्षे द्वितीयनिगोर[illegible]भुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

सप्तमे वत्सरे जाते तृतीये सूर्यवासरे ।
गोरसेन विना सर्वं भोक्तव्यं व्रतधारिणा ॥ ३ ॥

ॐ ह्रीं श्रीं सूर्यव्रतसप्तमवर्षे तृतीयनिगोरसभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

चतुर्थे रविवारे च वर्षे सप्तमके तथा ।
गोरसं नैव भोक्तव्यं सूर्यव्रतविधायकैः ॥ ४ ॥

ॐ ह्रीं श्री सूर्यव्रतसप्तमवर्षे चतुर्थनिगोरसभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

सप्तमेऽब्दे समायाते पंचमे रविवासरे ।
दुग्धं दधि घृतं नैव भोक्तव्यं व्रतधारिणा ॥ ५ ॥

ॐ ह्रीं श्रीं सूर्यव्रत सप्तमवर्षे पंचमनिगोरसभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

षष्ठे हि रविवारे च वर्षे सप्तमके ध्रुवं ।
गोरसं सर्वथा त्याज्यं सूर्यव्रतविधायकैः ॥ ६ ॥

ॐ ह्रीं श्री सूर्यव्रतसप्तमवर्षे निगोरसभुक्तिप्रोषधोद्योतनाय पूर्णार्घं निर्वपामीति स्वाहा ॥

सप्तमे वर्षे संप्राप्ते सप्तमे रविवासरे ।
गोरसं नैव भोक्तव्यं सूर्यव्रतविधायकैः ॥ ७ ॥

ॐ ह्रीं श्री सूर्यव्रतसप्तमवर्षे सप्तम निगोरसभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति० ॥

अष्टमे रविवारे हि सप्तमे वत्सरे मुदा ।
दधिदुग्धघृतं त्याज्यं सूर्यव्रतविधायके ॥ ८ ॥

ॐ ह्रीं श्री सूर्यव्रतसप्तमवर्षे अष्टमनिगोरसभुक्तिप्रोषधोद्योतनाय पूर्णार्घं निर्वपामीति स्वाहा ।

संजाते सप्तमे वर्षे नवमे रविवासरे ।
गोरसं सर्वथा त्याज्यं सूर्यव्रतविशुद्धये ॥ ९ ॥

ॐ ह्रीं श्री सूर्यव्रतसप्तमवर्षे नवम निगोरसभुक्तिप्रोषधोद्योतनाय अर्घं निर्व० ।

सप्तमे वर्षमध्ये हि विना गोरसभोजनं ।
कुर्वंति जनास्तेषां सुखं स्यात सर्वमोक्षजं ॥ १० ॥

ॐ ह्रीं श्री सूर्यव्रतसप्तमवर्षे निगोरसभुक्तिप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

(८)

अष्टमाब्दे समायाते रूक्षाहारस्तु कारयेत ।
आषाढशुक्लमासस्य प्रथमे रविवासरे ॥ १ ॥

ॐ ह्रीं सूर्यव्रताष्टमे वर्षे प्रथम रूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमे हायने जाते द्वितीये रविवासरे ।
भोजनं एकवारं च घृततैलविना बुधैः ॥ २ ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वर्षे द्वितीय रूक्षाहार प्रोषध द्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमे वत्सरे प्राप्ते तृतीये रविवासरे ।
रूक्षाहारो हि कर्तव्यो सूर्यव्रतविधायकैः ॥ ३ ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वेष तृतीय रूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमे वत्सरे प्राप्ते चतुर्थे भानुवासरे ।
रूक्षाहारस्तु कर्तव्यः सूर्यव्रतविशुद्धये ॥ ४ ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वर्षे चतुर्थरूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

सम्वत्सरेऽष्टमे प्राप्ते पंचमे रविवासरे ।
रूक्षाहारस्तु कर्तव्यः सूर्यव्रतप्रसिद्धये ॥ ५ ॥

ॐ ह्रीं श्रीं सूर्यव्रताष्टमे वर्षे पंचमरूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

वर्षाष्टमे हि संजाते षष्ठे मार्तण्डवासरे ।
घृततैलं हि संत्याज्यं सूर्यव्रतप्रसिद्धये ॥ ६ ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वर्षे षष्ठमरूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

सप्तमे सूर्यवारे च वसु संवत्सरे गते ।
रूक्षाहारं च कर्तव्यं प्रासुकैः व्रतधारिकैः ॥ ७ ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वर्षे सप्तमरूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमे हायने प्राप्ते रविवारेऽष्टमे पुनः ।
रूक्षाहारं हि कर्तव्यं सूर्यव्रतप्रसिद्धये ॥ ८ ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वर्षे अष्टमरूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमेऽष्टे समायाते नवमे रविवासरे ।
रूक्षाहारस्तु कर्तव्यः रविव्रतविशुद्धये ॥ ९ ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वर्षे नवमरूक्षाहारप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमे वर्षमध्ये च रूक्षाहारस्तु कारयेत् ।
घृततैलं च संत्याज्यं सूर्यव्रतविधायकैः ॥ १० ॥

ॐ ह्रीं श्री सूर्यव्रताष्टमे वर्षे रूक्षाहारप्रोषधोद्योतनाय पूर्णार्घं निर्वपामीति स्वाहा ।

(९)

आषाढ़मासे खलु शुक्लपक्षे मार्त्तण्डवारे नवमे हि वर्षे।
भुक्तिश्च कुर्यात्खलु चैकवारं एषा विधिः श्रीमुनिभिः प्रयुक्ता ॥१

ॐ ह्रीं श्री सूर्यव्रतनवमे वर्षे प्रथमैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा।

नवमेऽब्दे समायाते द्वितीये सूर्यवासरे।
एकस्थानं च कर्तव्यं सूर्यव्रतविधायकैः ॥ २ ॥

ॐ ह्रीं श्री सूर्यव्रतनवमे वर्षे द्वितीयैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा।

हायने नवमे जाते तृतीये रविवासरे।
एकस्थानं विधेयं च सूर्यव्रतविशुद्धये ॥ ३ ॥

ॐ ह्रीं श्री सूर्यव्रत नवमे वर्षे तृतीयैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा।

नवमे वत्सरे प्राप्ते चतुर्थे सूर्यवासरे।
एकस्थानं प्रकर्तव्यं सूर्यव्रतविधायकैः ॥ ४ ॥

ॐ ह्रीं श्री सूर्यव्रतनवमे वर्षे चतुर्थैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा।

नवमे वर्षे मध्ये च पंचमे रविवासरे।
तद्दिने युगपद्ग्राह्यं भोजनं व्रतशुद्धये ॥ ५ ॥

ॐ ह्रीं श्री सूर्यव्रत नवमेवर्षे पंचमैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा।

नवमे हायने प्राप्ते षष्ठे मार्तण्डवासरे।
—कस्थानं प्रकर्तव्यं सूर्यव्रतविधायकैः ॥ ६ ॥

ॐ ह्रीं श्री सूर्यव्रतनवमे वर्षे षष्ठैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

नवमे च वर्षे मासे दिने सूर्याभिधानके ।
सप्तमे युगपद्ग्राह्यं भोजनं व्रतधारिणा ॥ ७ ॥

ॐ ह्रीं श्री सूर्यव्रत नवमेवर्षे सप्तमैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अष्टमे भानुवारे च नवमेष्टे प्रकारयेत् ।
एकस्थानं हि भो भव्याः सूर्यव्रतप्रसिद्धये ॥ ८ ॥

ॐ ह्रीं श्री सूर्यव्रतनवमे वर्षे अष्टमैकस्थानप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

नवमे वत्सरे जाते नवमे सूर्यवासरे ।
युगपद् भोजनं ग्राह्यं सूर्यव्रतविधायकैः ॥ ९ ॥

ॐ ह्रीं श्री सूर्यव्रतनवमे वर्षे नवमैकप्रोषधोद्योतनाय अर्घं निर्वपामीति स्वाहा ।

अमुना हि प्रकारेण कर्तव्यं सूर्यसद्व्रतम् ।
पूजनं पार्श्वनाथस्य नववर्षप्रमाणकम् ॥ १० ॥
जलगन्धाक्षतैः पुष्पैः नैवेद्यैः दीपधूपकैः ।
फलार्घेण समभ्यर्च्य पूर्णव्रतं समाचरेत् ॥ ११ ॥

ॐ ह्रीं श्री सूर्यव्रतनवमे वर्षे एकस्थान प्रोषधोद्योतनाय पूर्णार्घं निर्वपामीति स्वाहा ।

अथ जाप्य मंत्र ।

ॐ नमो भगवते श्रीपार्श्वनाथाय धरणेन्द्रपद्मावतिसहिताय दुष्टग्रहशोकसर्वज्वररोगाल्पमृत्युविनाशनाय सूर्यप्रभघोषाय नमः ।

उपरोक्त मंत्रका १०८ वार जाप करना चाहिये ।

अथ जयमाला ।

त्रिभुवनपतिपूज्यं देवदेवेन्द्रवन्द्यं ।
जननमरणहारं पापसंतापवारं ॥
सकलसुखनिधानं सर्वदोषावसानं ।
फणिमणिसहितं त संस्तुवे पार्श्वनाथम् ॥ १ ॥

× × ×

अमरासुर नर सेवितचरणं, वन्दे पार्श्वजिनं नरशरणं ।
दूरीकृतनरपापाचरणं, संसृति संभवजनदुखहरणं ॥ १ ॥

क्रोध मान माया संवरणं, संसाराम्बुधि तारण तरणं ।
वारित जनम जरा भय मरणं, तर्जित दर्शन ज्ञानावरणं ॥२॥

कृत पंचेंद्रिय द्विप वशकरणं, दर्शनज्ञानं चारिताभरणं ।
येन सुविहितं सेतूद्धरणं, यत्र न स्यात जरापाचरणं ॥३॥

धर्माराम विवर्धनमेहं, नीलमणि प्रभु शोभित देहं ।
सिद्धिवधू संभावित नेहं, नागनरामर वन्दित देहं ॥४॥

धर्माधर्म प्रकाशन धीरं, मोहमहारिपु भंजन वीरं ।
दुःख दावानल शमन सुनीरं, दर्शित जनता भवजल तीरं ॥५॥

महीचन्द्र यतिराजैर्महितं, मेरुचन्द्र स्तुतिवाक्यैः सहितं ।
पापतिमिरनाशन रविभूरं, जयसागर वांछित सुख पूरं ॥६॥

घत्ता-इति वरजयमाला, ये पठंति त्रिशुद्ध्या ।
रविव्रत सुखकारं, कुर्वते ये नराश्च ॥
दिविजखगनरा वा ते लभंते नितान्तं ।
सकलसुखसमाजं मोक्षसौख्यास्पदं च ॥ ७ ॥

ॐ ह्रीं अर्हं श्री पार्श्वनाथाय धरणेन्द्रपद्मावतीसहिताय दुष्टग्रह शोकसर्वज्वररोगाकालमृत्यु विनाशनाय पूर्णार्घं निर्वपामीति स्वाहा ।

शांतिं पुष्टिं च तुष्टिं च, कल्याणं कमलाकरं ।
पार्श्वनाथप्रसादेन, देयात् पद्मावती च मा ॥

॥ इत्याशीर्वादः ॥

इति भट्टारक श्रीमहीचन्द्र शिष्य ब्रह्मश्री जयसागरविरचितं रविव्रतोद्यापनं सम्पूर्णम् ।

॥ ॐ नमः सिद्धेभ्यः ॥

अथ षोडशकारणोद्यापनं ।

पीठिका ।

आदौ नमामि वृषभं जिनेन्द्रं, ततो गणिंद्रं श्रुतमंगपूर्वं ।
विद्याविभूषं व्रतिनां वरिष्ठं, श्रीभूषणं शारदचन्द्रकीर्ति ॥१॥

जिनसेनादयो देवा ये भवा मोक्षमार्गगाः ।
ते सर्वे मे शुभं दद्युः पूजा प्रारम्भ कर्मणि ॥ २ ॥
नत्वा जिनं श्रुतं चैव गुरुं चापि विशेषतः ।
वक्ष्ये बुद्ध्यानुसारेण व्रतं षोडशकारणं ॥ ३ ॥
पूजाकारकैः भव्यैः आदौ श्रीमज्जिनालये ।
गत्वा नत्वा गुरुं देवं कर्तव्या प्रार्थना परा ॥ ४ ॥
भो स्वामिन ! कर्तुमिच्छामि व्रतस्योद्यापनं महत् ।
तत्कथं क्रियते भव्यैः मोक्षाप्त्यै कर्महानये ॥ ५ ॥
गुरुस्ततोऽवदद्वाक्यं गम्भीरं गुणगर्भितं ।
उपकाराय भव्यानां पापघ्न मोक्षदायकं ॥ ६ ॥
वर्षषोडशपर्यन्तं कर्तव्यं व्रतमुत्तमम् ।
पूजाद्रव्यविधानैश्च ध्येयाः षोडशभावना ॥ ७ ॥
अभिषिच्यामृतैः सारैः पूजाद्रव्यैश्च पूजयेत् ।
गद्यपद्यनुतिस्तोत्रैर्जयमाला प्रकीर्तनैः ॥ ८ ॥
जाते षोडशमे वर्षे व्रतोद्यापनमाचरेत् ।
चतुर्विधमहासंघैः साक्षीकृत्य महोत्सवैः ॥ ९ ॥

---

१ पंचामृतैः ।

गीतनर्तमहावाद्यैश्चन्द्रोपकविराजितैः ।
छत्रचामरसंकीर्णैर्नानारंगविचित्रितैः ॥ १० ॥
सुशब्दार्थभरैस्तोत्रैः पंडितैश्च विशारदैः ।
पुष्पचन्दनकर्पूरैः केशरैश्चाक्षतैः फलैः ॥ ११ ॥
नाळिकेरलवंगादिसामग्री प्रथमं रचेत् ।
मंडलं विशदं कार्यं चतुष्कोणं स्फुरत्प्रभं ॥ १२ ॥
रम्यैर्मणिमयैश्चूर्णैः सुकोष्ठं चिंतितार्थदं ।
संख्यायं दिव्यरूपं च रसं वांण कळाधरैः× ॥१३॥
विधानं परमं कार्यं मंत्रोच्चारणपूजितैः ।
तांबूलैस्तिलकैर्वस्त्रैः कुर्यात्संघस्य चर्चनं ॥ १४ ॥
अनेकविधिना सारं तीर्थेशपदकारणं ।
व्रतं संपाद्यते भव्यैः प्रीणितं परमेश्वर ॥ १५ ॥

॥ इति पिठिका विधानं ॥

अथ पूजा ।

अनंतसौख्यामृतकूपरूपंजिनेन्द्रसेव्यं परमं पवित्रं ।
कर्मारिनाशाय हि वज्रतुल्यं संस्थापये षोडशकारणं सत् ॥
ॐ ह्रीं षोडशकारणानि अत्रावतर २ संवौषट् ॥
अत्र तिष्ठ तिष्ठ ठः ठः स्थापनं । अत्र मम संन्निहितो भव भव वषट् ।

अमलक्षीरसमुद्रसंभव वारिपूरितधारया ।
कनककुंभसमाश्रिताद्भुत पापतापनिवारया ॥

× २९६ कोठा ।

नमामि षोडशभावनां भवनाशहेतु शिवाप्तये ॥
इंद्रचंद्रनरेन्द्रनागखगेन्द्रयतिपतिपूजितं ॥
ॐ ह्रीं दर्शनविशुद्धयादिषोडशकारणेभ्यो जलं ॥ १ ॥

सरसकेशरमलयचंदनपरिमलाकुलषट्पदैः ।
भव भयातपभंजकैः शिवसौख्यदानविधायकैः ॥
नमामि षोडश० ॥ चन्दनं० ॥ २ ॥

विशदमौक्तिकमालशालि गगनतारकसदृशैः ।
कमलसम्भवकमलवासितखण्डवर्जिततंदुलैः ॥
नमामि षोडश० ॥ अक्षतान्० ॥ ३ ॥

भ्रमरगुँजतकमलकेतकीजातिचम्पकपुष्पकैः ।
कुंदपारलवंगपाटलगंधगंधितदिग्मुखैः ॥
नमामि षोडश० ॥ पुष्पम्० ॥ ४ ॥

विविधलड्डुकपरमखज्जकपायसाम्रधरोदनैः ।
पूपस्तूपघृतान्वितैर्वरशाकपानसमन्वितैः ॥
नमामि षोडश० ॥ नैवेद्यम ॥ ५ ॥

तिमिरसंचयनाशकारकदीप्रमणिमयभासुरैः ।
घृतवरैर्हि विकारवर्जितज्ञानदीपकदायकैः ॥
नमामि षोडश० ॥ दीपम० ॥ ६ ॥

नविनजलधरपटलमेचकधूम्रसुरभवासितैः ।
यक्षधूपसुदेवकाष्ठमनोज्ञअगुरुविमिश्रितैः ॥
नमामि षोडश० ॥ धूपम्० ॥ ७ ॥

फनसकोच सदा...दाडिमपवी।
बीजपूरपनिबांचर्मबमुखककुचमुकर्कटैः ॥
नमामि षोडश० ॥ फलं० ॥ ८ ॥
जलेन गंधेन शुभाक्षतेन पुष्पेण हव्येन सुदीपकेन।
फलेन धूपेन व्रतं सुखाय श्रीभूषणानां परिपूजयामि ॥
ॐ ह्रीं दर्शनविशुद्धयादिषोडशकारणेभ्यो अर्घं।

अथ जयमाला।

सुगुणभण्डारं विगतविकारं संसारार्णव भयहरणं।
कलिमलनाशण सुपहपयासण, पंचमगइपय सुहकरणं ॥१॥
इह षोडशभावण परम तत्त, इह परभवगमण सहाय मत्त।
इह तित्थेसर पद दाण सार, इह तारह रवि संसार पार ॥२॥
इह भावणदो विजोग होइ, इह भावणदो सेवेसु लोय।
इह भावणदो विहडे कुकम्म, इह भावणदो यह होइ धम्म ॥३॥
इह भावण इंदर पदवी सहाय, इह भावणदो सीयरिसिय राय।
इह भावणदो होउ सफल जम्म, इह भावणदो सवि पुण्ण कम्म॥४
इह भावण जम्मजरा विणास, इह भावण सिवपव धरइ पास।
इह भावण कम्मकलंक दूर, इह भावण सुहसंपति पूर ॥ ५ ॥
इह भावण भवतारण सुणाव, इह भावणदो पद अमरगाव।
इह भावणदो कुलदोसनास, इह भावणदो सविवय पयास॥ ६ ॥
इह भावण तस थावर हरंति, इह भावण सुहसंपय करंति।
इह भावण मयण सु माणभंग, इह भावणदो तुणु कम्मसंग ॥७॥

घत्ता ।

सिरिभूषण कहियं, गुणगण सहियं, चंद्रकीर्ति ममपद कमलं ।
पविकम्म विमद्दं, पापविमुक्कं संपणाण भणियं विमलं ॥

ॐ ह्रीं दर्शनविशुद्ध्यादिषोडशकारणेभ्यो महार्घ्यं ।

अथ प्रत्येक पूजा ।

अत्रैव द्विकोष्ठकमंडलं शुभं, येषां स्थितं पांडुरलोकमान्यं ।
सदक्षतैः पुष्पचयः क्षिपामि संस्थापये मोक्षसुखाय सारं ॥

इति मंडलस्योपरि पुष्पांजलिं क्षिपेत् ।

सम्यक्त्वमूलतो ज्ञेयं पंचविंशमलोज्झितं ।
सत्यशौचाद्योपेतं सर्वज्ञप्रतिपादितं ॥

ॐ ह्रीं अष्टनवतिसांगोपांगसहितदर्शनविशुद्धये जलं, चंदनं, अक्षतं, पुष्पं चरुं, दीपं, धूपं, फलं, अर्घं, निर्वपामीति स्वाहा ।

निःशंकितांगांकितमाद्यमर्घ्यं, मुनींद्रवंद्यं भवतापमुक्तं ।
गंधैः सुपुष्पाक्षतहव्यदीपैर्यजे सदा कर्मकलंकहीनं ॥

ॐ ह्रीं निःशंकितगुणसंयुक्तदर्शनविशुद्धये जलादिकं ॥ १ ॥

सर्वकांक्षाविनिर्मुक्तं सर्वदोषविवर्जितं ।
निष्कांक्षाव्रतसंपन्नं पूजये तं शुभार्चनैः ॥२॥

ॐ ह्रीं निःकांक्षितगुणसंयुक्तदर्शनविशुद्धये जलादिकं ॥ २ ॥

सुगंधे चापि दुर्गंधे सन्मुखं न पराङ्मुखं ।
विचिकित्साविनिर्मुक्तं पूजये तं शुभार्चनैः ॥

ॐ ह्रीं निर्विचिकित्सागुणसंयुक्तदर्शनविशुद्धये जलादिकं ॥३॥

संसारे कुत्सिते धर्मे व्रते शास्त्रे विशेषतः ।
मूढता यस्य नास्त्येव पूजये तं शुभार्चनैः ॥
ॐ ह्रीं निर्मूढत्वगुणसंयुक्तदर्शनविशुद्धये जलादिकं ॥ ४ ॥
सर्वदा सर्वसंघेषु चोपगूहनमाचरेत् ।
मौनधारी व्रती धारी पूजये तं शुभार्चनैः ॥
ॐ ह्रीं उपगूहनगुणसंयुक्तदर्श-विशुद्धये जलादिकं ॥ ५ ॥
व्रतात्संचलितो धीरस्तस्य तं स्थापनं व्रते दृढः ।
यत्करोति मुनीशं हि पूजये तं शुभार्चनैः ॥
ॐ ह्रीं स्थितिकरणगुणयुक्तदर्शनविशुद्धये जलादिकं ॥ ६ ॥
व्रतयुक्त विशेषेण वात्सल्यपरता मुनिः ।
विष्णुकुमारसदृशं पूजये तं शुभार्चनैः ॥
ॐ ह्रीं वात्सल्यगुणयुक्तदर्शनविशुद्धये जलादिकं ॥ ७ ॥
चतुरो यः कलायुक्तः प्रभावनागेषु तत्परः ।
धर्मप्रभावनारतो नित्यं पूजये तं शुभार्चनैः ॥
ॐ ह्रीं प्रभावनांगगुणसंयुक्तदर्श-विशुद्धये जलादिकं ॥ ८ ॥
सूर्यचंद्रादिनां पूजा न करोति कदाचन ।
गंगासिंधुजलैर्दिव्यैः पूजये तं० ॥
ॐ ह्रीं सूर्यादिदानमिथ्यात्वरहितदर्श-विशुद्धये जलादिकं ॥ ९ ॥
नवग्रहाणां दानेभ्यो विरतो मुनिसत्तमः ।
त्रिवर्णशुद्धो मोक्षार्थी पूजये तं० ॥
ॐ ह्रीं नवग्रहदानरहितदर्शनविशुद्धये जलादिकं ॥ १० ॥
संक्रांतिसमये दानं मिथ्यादृष्टिप्रकल्पितं ।
तस्मात्सो रहितः साधुः पूजये तं० ॥
ॐ ह्रीं संक्रांतिदानरहितदर्शनविशुद्धये जलादिकं ॥ ११ ॥

नीचकर्म प्रहर्तारं संध्यावंदनं मुञ्चति ।
विश्वतत्त्वप्रकाशार्क पूजये तं० ॥
ॐ ह्रीं गायत्रीमंत्रजाप्यरहिताय दर्शन० जलादिकं ॥१२॥
ध्यानाध्ययनहोमेषु कर्मकष्टाहुतिं क्षिपेत् ।
हिंसाहोमविनिर्मुक्तः पूजये तं० ॥
ॐ ह्रीं अग्निसत्कार रहित दर्शन० जलादिकं ॥ १३ ॥
करोति गृहपूजां न दुष्टवाक्यादिदोषतः ।
तत्कर्मरहितः साधुः पूजये तं० ॥
ॐ ह्रीं गृहपूजारहितदर्शन० जलादिकं ॥ १४ ॥
वपुपूजादिमिथ्यात्वाद्विगतो यो मुनीश्वरः ।
तत्त्वार्थागमचेता यः पूजये तं० ॥
ॐ ह्रीं शरीरपूजारहितदर्शन० जलादिकं ॥ १५ ॥
गोमूत्रसेवनं धत्ते नैव गोपृच्छवन्दनं ।
तत्कर्मरहितो योगी पूजये तं० ॥
ॐ ह्रीं गोपुच्छमूत्रसेवारहितदर्शन० जलादिकं ॥ १६ ॥
अनंतभवसंतानं रत्नपाषाणसेवनं ।
तस्माद्यो विरतो योगी पूजये तं० ॥
ॐ ह्रीं रत्नपाषाणसेवारहितदर्शन० जलादिकं ॥ १७ ॥
मुक्ता गजादिसेवातो धर्मध्यानेषु तत्परः ।
रागद्वेषविनिर्मुक्तः पूजये तं० ॥
ॐ ह्रीं गजादिवाहनसेवारहितदर्शन० जलादिकं० ॥ १८ ॥
क्षमादयातपोयुक्तः पृथ्वीसेवा पराङ्मुखः ।
सावद्यरहितो धीरः पूजये तं० ॥
ॐ ह्रीं भूमिसेवारहित दर्शन० जलादिकं ॥ १९ ॥

तरुसेवादिपापेभ्यो विरतो यतिपुंगवः ।
स विवेको विचारज्ञः पूजये तं० ॥
ॐ ह्रीं वृक्षसेवा हि दर्शन० जलादिकं ॥ २० ॥
कुशास्त्रानतो शांतः कुशास्त्रपतिदूरगः ।
तत्त्वातत्त्वं विजानाति पूजये तं० ॥
ॐ ह्रीं कुशास्त्रसेवारहितदर्शनविशुद्धये जलादिकं ॥ २१ ॥
अ युधानां महापूजावंदनाविरतो मुनिः ।
कलाविज्ञानपूर्णो यः पूजये तं शुभार्चनैः ॥
ॐ ह्रीं शस्त्र मा हितदर्शन० जलादिकं ॥ २२ ॥
गंगासिंधु दीस्नाने विरतो व्रतवल्लभः ।
गंगासिंधुजलातोयैः पूजयेत० ॥
ॐ ह्रीं गं दिस्नान हितदर्शनविशुद्धये जलादिकं ॥ २३ ॥
शिलापूजने योगी विरतो व्रतरक्षकः ।
मोक्षाभिलाषवान विद्वान पूजये तं० ॥
ॐ ह्रीं व लुकादिपूजा हितदर्शनविशुद्धये जलादिकं ॥ २४ ।
पर्वतादिषु स्थानेषु आरुह्य न पतंति यः ।
तत्पापाद्विरतो वाग्मी पूजये तं० ॥
ॐ ह्रीं गिरिपातरहितदर्शन० जलादिकं ॥ २५ ॥
अग्निपातादिपापेभ्यो विरतो धर्मतत्परः ॥
ध्यानाग्निकुंडसंपोषी पूजये तं० ॥
ॐ ह्रीं अग्निपातरहितदर्शनविशुद्धये जलादिकं ॥ २६ ॥
व्रतहीनो दयाहीनो मिथ्यात्वमतपूरितः ।
तस्यसंगविनिर्मुक्तः पूजये तं० ॥
ॐ ह्रीं गुरुसेवारहितदर्शन० जलादिकं ॥ २७ ॥

अंकुशाग्रे शिरोछेदो मिथ्यात्वे प्रतिपादितः ।
तद्भव्यानां विनिर्मुक्तं पूजये तं० ॥
ॐ ह्रीं अंकुशादिमस्तकछेदरहित... रहितदर्शन० ॥ २८ ॥
शास्त्रज्ञानधरो मूढो ज्ञानाहंकारगर्वितः ।
तद्भावरहितः ज्ञानी पूजये तं० ।
ॐ ह्रीं ज्ञानमदरहितदर्शन० जलादिकं ॥ २९ ॥
अर्चामदविनाशाय स्वर्गो... विवर्जितं ।
स्वात्मतत्वविलीनं हि पूजये तं शुभार्चनैः ॥
ॐ ह्रीं पूजामदरहितदर्शन० जलादिकं ॥ ३० ॥
उच्चैस्तरकुले जन्म तस्याहंकारवर्जितः ।
धर्मानुष्ठानसंलीनः पूजये तं० ॥
ॐ ह्रीं कुलमदरहितदर्शनविशुद्धये जलादिकं ॥ ३१ ॥
जातिमदातिगः शांतः सु जातो जातसुलक्षणः ।
दर्शनज्ञानसंपन्नः पूजये तं० ॥
ॐ ह्रीं जातिमदरहितदर्शन० जलादिकं ॥ ३२ ॥
शरीरादौ बलं यस्य तेन गर्वेण पूरितः ।
तत्गर्वरहितः साधुः पूजये तं० ॥
ॐ ह्रीं बलमदरहितदर्शन० जलादिकं ॥ ३३ ॥
रत्नहेमपदार्था ये संसारे लोभकारणं ।
तत्पापाद्रहितो दक्षः पूजये तं० ॥
ॐ ह्रीं ऋद्धिमदरहितदर्शन० जलादिकं ॥ ३४ ॥
मासपक्षोपवासादीन् तपः कुर्वंति साधवः ।
तपो गर्व विनिर्मुक्तः पूजये तं० ॥
ॐ ह्रीं तपोमदरहित दर्शन० जलादिकं ॥ ३५ ॥

कामदेवसमं रूपं कामदं कामदायकं ।
कायक्लेशकृशीभूतः पूजये तं० ॥
ॐ [illegible] दर्शन० जलादिकं ॥ ३६ ॥

सप्तानां व्यसनानां हि द्यूतव्यसनमग्रिमम् ।
द्यूतव्यसनसंत्यक्तः पूजये तं० ॥
ॐ ह्रीं द्यूतव्यसनविरतिदर्शन० जलादिकं ॥ ३७ ॥

मांसस्य दर्शने त्रासे भक्षणप्राणनिर्गमः ।
त्यक्तं मांसं सदा येन पूजये तं० ॥
ॐ ह्रीं मांसव्यसनरहितदर्शन० जलादिकं ॥ ३८ ॥

मद्यपानं महापापं भयभीतो यतीश्वरः ।
तद्गन्धेऽपि मनो नास्ति पूजये तं० ॥
ॐ ह्रीं मद्यपानव्यसनरहितदर्शन० जलादिकं ॥ ३९ ॥

गणिकाव्यसनदूरशीलाभरणभूषितः ।
संयम स्त्रीसमाश्लिष्टः पूजये तं० ॥
ॐ ह्रीं वेश्याव्यसनरहितदर्शन० जलादिकं ॥ ४० ॥

षट्काय रक्षणे दक्षः सर्वसत्त्वाभयप्रदः ।
पापाद्विरतो योगी पूजये तं० ॥
ॐ ह्रीं पापर्द्धिव्यसनरहितदर्शन० जलादिकं ॥ ४१ ॥

शीलसन्नाहसंपन्नः परदारा पराङ्मुखः ।
ब्रह्मचारी त्रिशुद्ध्याय पूजये तं० ॥
ॐ ह्रीं परदारागमनविरतिदर्शन० जलादिकं० ॥ ४२ ॥

त्रसजीववधोत्पन्नं मधुजीवशताकुलं ।
तस्य त्यागस्ततो येन पूजये तं० ॥
ॐ ह्रीं मधुत्यागदर्शन० जलादिकं ॥ ४३ ॥

त्रसजीवशतैर्युक्त उदम्बरफलवर्ज्जनं ।
कृत जीवदयाद्यः पूजये तं० ॥
ॐ ह्रीं उदम्बरफलविरतिदर्शन० जलादिकं ॥ ४५ ॥
अनेकांगिसमाकीर्णं नीचयोग्यं कठुंबरं ।
तस्याहारविनिर्मुक्तं पूजये तं० ॥
ॐ ह्रीं कठुंबरफलविरति दर्शन० जलादीकं ॥ ४६ ॥
न्यग्रोधवृक्षसंभूतं फलं जंतुविमिश्रितं ।
तत्फले यो विरक्ताक्षः पूजये तं० ॥
ॐ ह्रीं वटफलविरति दर्शन० जलादिकं ॥ ४७ ॥
काकयोग्यं फलाहारं पिप्पलादिफलोज्झनं ।
कृतं येन दयाबुद्ध्या पूजये तं० ॥
ॐ ह्रीं पिप्फलविरतिदर्शन० जलादिकं ॥ ४८ ॥
सर्वजीवदयाधारो निष्कषायो दिगम्बरः ।
पिप्पलीफलसंत्यागी पूजये तं० ॥
ॐ ह्रीं पीप्फलीफलविरतिदर्शन० जलादिकं ॥ ४९ ॥
त्रसस्थावरपापेभ्यो विरक्तः सर्वदा मनः ।
तस्य चित्तं द्रवीभूतं पूजये तं० ॥
ॐ ह्रीं हिंसाविरतिदर्शनविशुद्धये जलादिकं ॥ ५० ॥
मनसा वचसा चैव सत्यं वदति सर्वदा ।
भाषासमितिसम्पन्नः पूजये तं० ॥
ॐ ह्रीं सत्यसंयुक्तदर्शन० जलादिकं ॥ ५१ ॥
विस्मृतं पतितं नष्टं कदाचित्पथिकाजनैः ।
निर्लोभी न तु गृह्णाति पूजये तं० ॥
ॐ ह्रीं चौर्यविरतिदर्शन० जलादिकं ॥ ५२ ॥

ब्रह्मचर्यव्रते धीरो नवभेदपरायणः ।
तुर्ये व्रते सदासक्तः पूजये तं० ॥
ॐ ह्रीं ब्रह्मचर्येषु दर्शनविशुद्धये जलादिकं ॥ ५३ ॥

मनोवचनयोगेन अन्तर्बाह्यान् ग्रहान्
त्यक्त्वा सन्तोषसम्पन्नः पूजये तं० ॥
ॐ ह्रीं परिग्रहविरतिदर्शन० जलादिकं ॥ ५४ ॥

पूर्वपश्चिमयोर्नूनं दक्षिणोत्तरागतेः ।
प्रमाणं योजनैर्यस्य पूजये तं० ॥
ॐ ह्रीं दिग्व्रतयुक्तदर्शनविशुद्धये जलादिकं ॥ ५५ ॥

आग्नेयनैऋत्यकोणेषु व्रतं दधाति यो मुनिः ।
अहिंसाव्रतरक्षार्थी पूजये तं० ॥
ॐ ह्रीं विदिग्व्रतसंयुक्तदर्शन० जलादिकं ॥ ५६ ॥

शुककुक्कुरमार्जारकुठाराणि ह्यनर्थकान् ।
न पुष्णाति कदा साधुः पूजये तं० ॥
ॐ ह्रीं अनर्थदण्डविरतिदर्शन० जलादिकं ॥ ५७ ॥

सामायिकव्रतासक्तं द्वात्रिंशद्दोषदूरगं
समताभावसम्पन्नं पूजये तं० ॥
ॐ ह्रीं सामायिकसंयुक्तदर्शन० जलादिकं० ॥ ५८ ॥

भूताष्टमीषु पर्वेषु प्रोषधे लीनमानसं ।
सद्धर्मामृतसंतुष्टः पूजये तं० ॥
ॐ ह्रीं प्रोषधोपवाससंयुक्तदर्शन० जलादिकं ॥ ५९ ॥

भोगोपभोगसंख्यानं यः करोति विशुद्धये ।
रत्नत्रयव्रताधारः पूजये तं० ॥
ॐ ह्रीं भोगोपभोगविरतिदर्शन० जलादिकं ॥ ६० ॥

अतिथीनां यतीनां च करोत्यादरशुश्रूषां ।
सल्लेखनां करोत्येव पूजये तं० ॥
ॐ ह्रीं अतिथिसंविभागसंयुक्तदर्शनविशुद्धये जलादिकं ॥ ६१ ॥
निर्विकल्पकसमस्तानां हि पापारम्भपराङ्मुखः ।
नैव स्पर्शं करोत्येव पूजये तं० ॥
ॐ ह्रीं विविक्तशय्यासन०युक्तदर्शनविशुद्धये जलादिकं ॥६२॥
करोति सर्वदा नूनं कायक्लेशतपो महत् ।
अनाहारेण पुण्यांग पूजये तं० ॥
ॐ ह्रीं कायक्लेशसंयुक्तदर्शनविशुद्धये जलादिकं ॥ ६३ ॥
अनेन जायते दोषः पूर्वकर्मानुसारिणः ।
तद्दोषरहितः योगी पूजये तं० ॥
ॐ ह्रीं स्वाध्यायसंयुक्तदर्शन० जलादिकं ॥ ६४ ॥
हस्तपादादिसंचालनवर्जितं काष्ठवत् मुनिः ।
कायोत्सर्गव्रतारूढः पूजये तं० ॥
ॐ ह्रीं कायोत्सर्गसंयुक्तदर्शन० जलादिकं ॥ ६५ ॥
पिण्डस्थध्यानयोगेन रूपस्थेन विशेषतः ।
करोति स्वात्मनो ध्यानं पूजये तं शुभार्चनैः ॥
ॐ ह्रीं स्वात्मध्यानसंयुक्तदर्शन० जलादिकं ॥ ६६ ॥
त्रसस्थावरजीवेषु कृपाक्रांतमनो वचः ।
रागद्वेषमदाद्धीनः पूजये तं० ॥
ॐ ह्रीं समताभावसंयुक्तदर्शनविशुद्धये जलादिकं ॥ ६७ ॥
भव्यसत्त्वहितोद्देशी दर्शनप्रतिमावरा ।
विस्तारयति यो भव्यः पूजये तं० ॥
ॐ ह्रीं दर्शनप्रतिमायुक्तदर्शन० जलादिकं ॥ ६८ ॥

प्रथमे भारते क्षेत्रे जिनाः कर्मविनाशकाः ।
तेषां सद्दर्शनं यस्य पूजये तं० ॥
ॐ ह्रीं प्रथमजिनोद्भ दर्शन० जलादिकं ॥ ८५ ॥
द्वात्रिंशत् विदेहाश्च तेषु जाता जिनोत्तमाः ।
यस्य येषां परा भक्तिः पूजये तं० ॥
ॐ ह्रीं विदेहक्षेत्रोद्भ दर्शन० जलादिकं ॥ ८६ ॥
येऽत्रसंजाता जिनेन्द्राः क्षेत्रे चैरावतावनौ ।
दर्शनं यस्य तेषां हि पूजये तं० ॥
ॐ ह्रीं ऐरावतक्षेत्रोद्भव दर्शन० जलादिकं ॥ ८७ ॥
प्रथमे भारते क्षेत्रे कर्म नष्टा जिनोत्तमाः ।
मानसे दर्शनं येषां पूजये तं० ॥
ॐ ह्रीं धातकी खण्ड प्रथम भारतोद्भव जिनदर्शन० जलादिकं ॥८८
भारते द्वितीये क्षेत्रे ये सन्ति जिनपुंगवाः ।
यस्य तेषां हृदि ध्यानं पूजये तं० ॥
ॐ ह्रीं धातकीखण्ड द्वितीय भारतोद्भव जिनदर्शन० जलादिकं ॥८९
धातक्यां च जिनान् सर्वान विदेहे पूर्वपश्चिमे ।
विभावयति सम्यक्त्वं पूजये तं० ॥
ॐ ह्रीं धातकी विदेहे जिनप्रणीतदर्शन० जलादिकं ॥ ९० ॥
धातक्यैरावते क्षेत्रे प्रथमे जिनपुंगवान् ।
यो धारयति सम्यक्त्वं पूजयेतं शुभार्चनैः ॥
ॐ ह्रीं धातक्यैरावत क्षेत्र प्रणीत जिनदर्शन० जलादिकं ॥ ९१ ॥
धातक्यैरावतक्षेत्रे द्वितीये जिनपुंगवान् ।
यो धारयति सम्यक्त्वं पूजये तं० ॥
ॐ ह्रीं धातक्यैरावतद्वितियजिनप्रणितदर्शन० जलादिकं ॥९२॥

भारते पुष्करे जाता पूर्वमेरुजिनाश्च ये ।
तेषां सद्दर्शनं यस्य पूजये तं० ॥

ॐ ह्रीं पुष्करपूर्वभारतेजिनप्रणीतदर्शन० जलादिकं ॥ ९३ ॥

पश्चिमे पुष्करे मेरुजिना द्वितीय भारते ।
तेषां सद्दर्शनं यस्य पूजये तं० ॥

ॐ ह्रीं पुष्करद्विपे द्वितियभारतजिनप्रणितदर्शन० जलादिकं ॥९४॥

विदेहे पूर्वके देवा महाद्वीपे च पुष्करे ।
तेषां सद्दर्शनं यस्य पूजये तं० ॥

ॐ ह्रीं पुष्करद्विपपूर्वविदेहजिनप्रणितदर्शन० जलादिकं ॥ ९५ ॥

पुष्करे पश्चिमे सारे विदेहे जिननायकाः ॥
यो बिभ्रति सुसम्यक्त्वं पूजये तं० ॥

ॐ ह्रीं पुष्करद्वीपे पश्चिमविदेहेजिनप्रणीतदर्शन जलादिकं ॥९६॥

ऐरावते शुभे क्षेत्रे पूर्वे च मेरुपर्वते ।
यो धारयति सम्यक्त्वं पूजये तं० ॥

ॐ ह्रीं पुष्करैरावतपूर्वमेरुजिनप्रणीतदर्शन० जलादिकं ॥९७॥

पुष्करैरावते क्षेत्रे पश्चिमे मेरुपर्वते ।
यो धारयति सम्यक्त्वं पूजये तं० ॥

ॐ ह्रीं पुष्करैरावतेपश्चिममेरुजिनप्रणितदर्शन० जलादिकं ॥९८॥

सुनीरगंधैः कुसुमैश्च तंदुलैः हव्यैश्च गंधैर्वरमातुलिंगकैः ।
सद्दर्शनाख्यां परमां पवित्रां श्रीभूषणानां परिपूजयामि ॥

ॐ ह्रीं दर्शनविशुद्धये महार्घं निर्वपामीति स्वाहा ।

अथ जयमाला।

त्रिभुवननिर्जित चरणं, भवभय हरणं सन्निपातिक दूरी करणं।
किल शिवसुख करणं भवजलतरणं, हतभय मरणं सुगुणमई॥
दंसण हीण भमइ संसारह, दंसण हीण लहइ अवतारह।
दंसण हीणय कुगइ पामइ, दंसण हीण भमइ संसारह॥
दंसण हीण लहइ अवतारह, दंसण हीण णर दुह गमइ।
दंसण हीण भमइ छट्ठ कालह, दंसण हीण पडइ जंजालह॥
दंसण हीण निगोद जावइ, दंसण हीण भमइ त्रसथावर।
दंसण हीण लहइ महादुःखह, दंसण हीण न पामइ सुखह॥
दंसण होई सुरपद दाता, दंसण सुगति रमणी सुह साता।
दंसण केसरपद धरइ, दंसण इन्द अमर सुह करई॥
दंसण कम्मकलंक विणासण, दंसण धम्मकरण्ड णिवासण।
दंसण भव सायर वर तारण, दंसण अविचल शिवपदकारण॥
भुविदंसण सारह कम्म णिवारण, धम्म रहण शिव सुहभण्डारह।
सिरिभूषण भव्व गतमदगव्व, चन्द्रकीर्ति सिद्धांत कहे॥

ॐ ह्रीं दर्शनविशुद्धये पूर्णार्घं।

अथ विनय भावना ।

सर्वज्ञदेवेन निनिर्मितायां भव्यात्मनां कर्मकलंकशांये ।
संस्थापये तां विनयादि जातां चतुर्विधां श्रीजिनधर्मरूपां ॥
ॐ ह्रीं विनयसंपन्नताअत्रवतर२ संवौषट् अत्र तिष्ठ तिष्ठ ठः ठः ॥
अत्र मम सन्निहितो भव भव वषट् ॥

देवशास्त्रगुरूणां च द्विविधां च तपस्विनां ।
तथा च गुणवृद्धानां कर्तव्यो विनयो महान् ॥
ॐ ह्रीं चतुर्विधमार्गसंयुक्तविनयसंपन्नतायै जलादिकं ॥१॥
रोगसंक्रान्तवृद्धाना तथा विद्यावतां मतां ।
करोति विनयं यो हि पूजये तं सुभावनः ॥
ॐ ह्रीं दर्शनचारित्रसंयुक्तनपस्विविनयसंपन्नतायै जलादिकं ॥२॥
समाचारं करोत्येव आर्यिकाणां विशेषतः ।
जैनधर्मप्रवृद्धयर्थं पूजये तं ।
ॐ ह्रीं आर्यिकासंज्ञा विनयसंपन्नतायै जलादिकं ॥ ३ ॥
अणुव्रताधिकारिणां श्रद्धाना ब्रह्मचारिणाम् ।
करोति विनयं यो वै पूजये तं० ॥
ॐ ह्रीं सम्यक्त्वसंयुक्तश्रावकसंज्ञाविनयसंपन्नतायै जलादिकं ॥४॥
श्रावकाचारशुद्धान श्राविकाणाम् विवेकवान ।
करोति विनय यो वै पूजये तं० ॥
ॐ ह्रीं सम्यक्त्वसंयुक्तश्राविकासंज्ञाविनयसंपन्नतायै जलादिकं ॥५॥
सतोयगंधैः कुसुमैः शुभाक्षतैश्चरुप्रदीपैर्वरधूपसत्फलैः ।
सद्भावनां तां विनयादि जातां चर्चे सदा कर्मकलंकशांत्यै ॥
ॐ ह्रीं विनयसंपन्नतायै अर्घं० ॥

अथ जयमाला ।

सिरि जिण धम्मे गुणगण हम्मे, विणय विवेक समुच्चरिय ।
सिरि गायम देवे कुन्द मुणिंदे चउविह संघ समुच्चरियं ॥
विनयेण हवइ संसारकाज, विनयेण लहइ सुरपुरीय राजं ।
विनयेण हवई पंचणाण, विनयेण होसि शीवपुरीय वास ॥
विनयेण होइ सवि अरीयमित्र, विनयेण हवइ वसणिय चित्त ।
विनयेण देव पसण्ण होय, विनयेण मण आनन्द लोय ॥
विनयेण होइ धम्मादि काज, वि·येण पसरइ बहुय लज्ज ।
विनयेण हवइ जिन शुद्ध जाण, विनयेण णासइ जम्म मज्ज ॥
इय विण तिण गुणवंता मुनिजणसंना धम्मखाण मुणिगण कहीयं ।
तं भवसु तारण ताप निवा·ण सहीरि भूषयं सुख लहीयं ॥

ॐ ह्रीं विनयसंपन्नताये जयमाला महार्घं ।



अथ शीलभावना।

शीलाह्वयं कापगजेन्द्रमिदं कायेन वाचा मनसा च नित्यं।
संस्थापये मोक्षप्रदाय सारं त्रिकर्णशुद्ध्या जलचंदनाद्यैः ॥

ॐ ह्रीं शीलभावनाभावना २ संवौषट् अत्र तिष्ठ तिष्ठ. ठः ठः, अत्र मम संन्निहितो भव भव वषट्।

अष्टादशसहस्रैश्च भेदैर्भिन्नं महोत्तमं।
पालनीयं सदा सद्भिः समताशीलभावना ॥

ॐ ह्रीं दशविधसांगोपांगयुक्ताष्टादशसहस्रभेदनतीचाराय जलादिकं ॥

सुररामाविकारघ्नं मदनोद्गारवर्जितं।
शीलरक्षामयापन्नं चर्चये स्वष्टद्रव्यकैः ॥

ॐ ह्रीं देवस्त्रीशीलभावनायै जलादिकं ॥ १ ॥

मानुषीरमणीसक्तं शुद्धं शीलसमन्वितं।
विकारो नैव यस्यांगे चर्चये स्वष्टद्रव्यकैः ॥

ॐ ह्रीं मनुष्यस्त्रीविरतिशीलभावनायै जलादिकं ॥ २ ॥

मनसा वचसा वपुषा विकारो न तु सर्वथा।
पशुस्त्रीविरतिं साधुं चर्चये० ॥

ॐ ह्रीं पशुस्त्रीविरतिशीलभावनायै जलादिकं ॥ ३ ॥

काष्ठचित्रगता कांता विरत वन वासिनं।
मकरध्वजदर्पघ्नं चर्चये० ॥

ॐ ह्रीं चित्रकाष्ठविरतिशीलभावनायै जलादिकं ॥ ४ ॥

मनसा भोगविरतं भीवसंगनिराकृतं।

ब्रह्मचर्यसमापन्नं चर्चये० ॥

ॐ ह्रीं मनसा भोगविरतिशीलभावनायै जलादिकं ॥ ५ ॥

वचसा विरतं साधुं वक्रवाचानिराकृतं ।
धर्माधारं व्रतैर्युक्तं चर्चये० ॥

ॐ ह्रीं वचसा कृतभोगविरतिशीलभावनायै जलादिकं ॥ ६ ॥

वपुषा विरतं साधुं कांताकटाक्षवर्जितं ।
मेरुधैर्यं समापन्नं चर्चये० ॥

ॐ ह्रीं कायभोगविरतिशीलभावनायै जलादिकं ॥ ७ ॥

आत्मना विरते भोगे विरतं मुनिपुंगवं ।
शीलभावसमापन्नं चर्चये० ॥

ॐ ह्रीं आत्मकृतभोगविरतिशीलभावनायै जलादिकं ॥ ८ ॥

अन्यस्यात्मकृतस्यापि भोगकर्मनिषेधनं
शीलभावसमापन्नं चर्चये० ॥

ॐ ह्रीं आत्मना कारितभोगविरतिशील० जलादिकं ॥ ९ ॥

अन्यस्मिन् विहिते भोगे नानुमोदयति यतिः ।
शीलरत्नसमापन्नं चर्चये० ॥

ॐ ह्रीं भोगानुमोदनविरतिशील० जलादिकं ॥ १० ॥

सर्वार्थसिद्धिपदां लोके धर्मशर्मानुबंधिनीं
चर्चये जलपुष्पाद्यष्टद्रव्यैः श्रीज्ञानसागरं ॥

ॐ ह्रीं शीलभावनायै महार्घं ॥

अथ जयमाला ।

कृतकर्मविणासं सुगुण पयासं सुरनरपतिसेवित चरणं ।
जरमरणविणासण कुगइ निगासण सारशीलमानव सरणं ॥
शील रयण बहुमूला सार, शीले तरइ संसार पार ।
शीलेन शुद्धणय सद विबोध, शीले हवइ इंदिय निरोध ॥
शीले नमइ सार्दुल पाय, शीले हवइ सुरणर सहाय ।
शीलेन विणासय भव्व दुःख, शीलेन कलह नर मोक्ष सुख ॥
शीलेन खग नित करइ सेव, शीलेन नमइ नित अखिलदेव ।
शीलेन विजय तियलोकमज्ज, शीलेन भरइ मनिगम्म कज्ज ॥
शीलेन भुवन तित्थयरकीर्ति, शीलेन लहइ णर अखय विति ।
शीलेन वन्हि जल रूव होय, शीलेन माणव बहु करइ कोय ॥
शीलेन होइ इह सफल जम्म, शीलेन नरइ मनिपुण कम्म ।
शीलेन मोक्ष पदवि णिवास, शीलेन होइ लीला विलास ॥

घत्ता ।

सुविसार निकंद मुनिवचदंद, कम्म निखंडण भम्म मयं ।
जग जय जय करणं शील सु सरणं संसारांबुधि सुभतरणं ॥

ॐ ह्रीं शीलव्रतेष्वनतिचाराय पूर्णार्घं ।

॥ इति शीलभावना ॥

अथ अभीक्ष्ण ज्ञानोपयोग भावना ।

प्रबोधं पापनाशं च चिदानंदं महोदयं ।

स्थापयामि शुचिभक्त्या ब्रह्मज्ञानं सुखास्पदं ॥

ॐ ह्रीं ज्ञानभावनाऽवतर २ संवौषट् । अत्र तिष्ठ तिष्ठ ठः ठः ।
अत्र मम संनिहितो भव भव वषट् ॥

द्वादशांगं सुसिद्धांतं चतुर्विधसमुद्भवं ।

पठ्यं पाठयते नित्यं ज्ञानोपयोगभावना ॥

ॐ ह्रीं द्वाचत्वारिंशमांगोपांगयुक्ताभीक्ष्णज्ञानोपयोगाय जलं० ॥

प्रथमानुयोगवेदांगं भेदं जानाति यो मुनिः ।

जलचंदनपुष्पौघैः पूजये त मुनीश्वरं ॥

ॐ ह्रीं प्रथमानुयोगवेदभावनाप्राप्तमुनये जलादिकं ॥ १ ॥

करणानुयोगनामानं वेदं यो वेत्ति संयमी ॥ जलचंदन० ॥

ॐ ह्रीं करणानुयोगवेदभावनाप्राप्तमुनये जलादिकं ॥ २ ॥

चरणानुयोगसद्वेदं भेदाभेदेन वेत्ति यः । जल० ॥

ॐ ह्रीं चरणानुयोगवेदभावनाप्राप्तमुनये जलादिकं० ॥ ३ ॥

द्रव्यानुयोगवेदं हि सदा यो वेत्ति तत्वतः । जल० ॥

ॐ ह्रीं द्रव्यानुयोगवेदभावनाप्राप्तमुनये जलादिकं ॥ ४ ॥

आचारांगमहाज्ञानं यो वेत्ति मुनिपुंगवः ।

जलचन्दनपुष्पौघैः पूजये तं मुनीश्वरं ॥

ॐ ह्रीं आचारांगभावनाप्राप्तमुनये जलादिकं ॥ ५ ॥

सारं सूत्रकृतांगं यः प्रकाशयति संयमी ॥ जल० ॥

ॐ ह्रीं सूत्रकृतांगभावनाप्राप्तमुनये जलादिकं ॥ ६ ॥

सुस्थानांगं परं पुण्यं भेदभावेन यः स्मरेत् । जल० ॥

ॐ ह्रीं स्थानांगभावनाप्राप्तमुनये जलादिकं ॥ ७ ॥

समवायांगमहत् ज्ञानं यो वेत्ति मुनिसत्तमः। जल० ॥

ॐ ह्रीं समवायांगभावनाप्राप्तमुनये जलादिकं ॥ ८ ॥

वादांगं वेत्ति यो साधुः सर्वसाधनाशकं । जल० ॥

ॐ ह्रीं विवादांगभावनाप्राप्तमुनये जलादिकं ॥ ९ ॥

ज्ञातृकथांगज्ञातारं धीरवीरमहोदयं । जल० ॥

ॐ ह्रीं ज्ञातृकथांगभावनाप्राप्तमुनये जलादिकं० ॥ १० ॥

श्रावकाचारविस्तारदेशकं भव्यबोधकं । जल० ॥

ॐ ह्रीं श्रावकाचारभावनाप्राप्तमुनये जलादिकं ॥ ११ ॥

अन्तःकृद्दशधर्मांगं भेदाभेदविदांवरं । जल० ॥

ॐ ह्रीं अन्तकृतदशांगभावनाप्राप्तमुनये जलादिकं ॥ १२ ॥

अनुत्तरोपपादांग विस्तारं वेत्ति यो मुनिः। जल० ॥

ॐ ह्रीं अनुत्तरोपपादांगभावनाप्राप्तमुनये जलादिकं ॥ १३ ॥

विपाकसूत्रांगं सारं विपाककर्मसूचकं। जल० ॥

ॐ ह्रीं विपाकसूत्रांगभावनाप्राप्तमुनये जलादिकं ॥ १४ ॥

शब्दापशब्दवेत्तारं प्रश्नव्याकरणस्य यः। जल० ॥

ॐ ह्रीं प्रश्नव्याकरणभावनाप्राप्तमुनये जलादिकं ॥ १५ ॥

दृष्टिवादं दयायुक्तं सर्वज्ञवदनोद्भवं । जल० ॥

ॐ ह्रीं दृष्टिवादभावनाप्राप्तमुनये जलादिकं ॥ १६ ॥

चंद्रप्रज्ञप्तिज्ञातारं भव्यसचप्रबोधकं । जल० ॥

ॐ ह्रीं चंद्रप्रज्ञप्तिभावनाप्राप्तमुनये जलादिकं ॥ १७ ॥

सूर्यप्रज्ञप्तिवेत्तारं भेदाभेदप्रकाशकं । जल० ॥

ॐ ह्रीं सूर्यप्रज्ञप्तिभावनाप्राप्तमुनये जलादिकं ॥ १८ ॥

द्वीपसागरभेदज्ञं गणनामानकारकं । जल० ॥

ॐ ह्रीं द्वीपसागरभावनाप्राप्तमुनये जलादिकं ॥ १९ ॥

द्वीपपर्वतनद्यादिवेदकं शास्त्रदीपकं । जल० ।

ॐ ह्रीं जंबूद्वीपप्रज्ञप्तिभावनाप्राप्तमुनये जलादीकं ॥ २० ॥

व्याख्याप्रज्ञप्तिवेत्तारं भव्यजीवहितावहं । जल० ॥

ॐ ह्रीं व्याख्याप्रज्ञप्तिभावनाप्राप्तमुनये जलादिकं ॥ २१ ॥

सूत्रार्थभेदज्ञातारं सर्वजीवदयापरं । जल० ॥

ॐ ह्रीं सूत्रभेदभावनाप्राप्तमुनये जलादिकं ॥ २२ ॥

पूर्वगतविचारज्ञं पवित्रं पापभंजकं ।

जलचन्दनपुष्पौघैः पूजये तं मुनीश्वरं ॥

ॐ ह्रीं पूर्वगतभावनाप्राप्तमुनये जलादिकं ॥ २३ ॥

नीरागतमहाविद्यां यो वेत्ति भवतारकः । जल० ॥

ॐ ह्रीं नीरागतभावनाप्राप्तमुनये जलादिकं ॥ २४ ॥

स्थलगामि महाविद्यां प्राप्तये च मुनीश्वरं । जल० ॥

ॐ ह्रीं स्थलगतभावनाप्राप्तमुनये जलादिकं ॥ २५ ॥

मायागतपराविद्यां तां वेत्ति यो मुनीश्वरः । जल० ॥

ॐ ह्रीं मायागतभावनाप्राप्तमुनये जलादिकं ॥ २६ ॥

रूपप्राप्तमहाविद्या बहुरूपप्रकाशिकां । जल० ॥

ॐ ह्रीं रूपगतभावनाप्राप्तमुनये जलादिकं ॥ २७ ॥

आकाशगमने साधुं व्योमविद्याविशारदं । जल० ॥

ॐ ह्रीं आकाशगतभावनाप्राप्तमुनये जलादिकं ॥ २८ ॥

उत्पादपूर्वांगशुद्धं यो वेत्ति यतिनायकः । जल० ॥

ॐ ह्रीं उत्पादपूर्वांगभावनाप्राप्तमुनये जलादिकं ॥ २९ ॥

अग्रायणीयपूर्वे हि गंभीरं धीरमानसं । जल० ॥

ॐ ह्रीं अग्रायणिभावनाप्राप्तमुनये जलादिकं ॥ ३० ॥

वीर्यानुवादं पूर्वं च समर्थः यो यतीश्वरः ॥ जल० ॥

ॐ ह्रीं वीर्यानुवादभावनाप्राप्तमुनये जलादिकं ॥ ३१ ॥

अस्तिनास्तिप्रवादांगं यो वेत्ति धर्मनायकः ।

जलचंदनपुष्पोघैः पूजये तं मुनीश्वरं ॥

ॐ ह्रीं अस्तिनास्तिप्रवादभावनाप्राप्तमुनये जलादिकं ॥ ३२ ॥

ज्ञानप्रवादज्ञातारं संघबोधनतत्परं । जल० ॥

ॐ ह्रीं ज्ञानप्रवादपूर्वांगभावनाप्राप्तमुनये जलादिकं ॥ ३३ ॥

सत्यप्रवादपूर्वांगं तस्य ध्याने विचक्षणं । जल० ॥

ॐ ह्रीं सत्यप्रवादभावनाप्राप्तमुनये जलादिकं ॥ ३४ ॥

आत्मप्रवादपूर्वांगं यो वेत्ति मुनिसत्तमः । जल० ॥

ॐ ह्रीं आत्मप्रवादपूर्वांगभावना० जलादिकं ॥ ३५ ॥

कर्मप्रवादपूर्वांगं यो जानाति गुणाग्रणी । जल० ॥

ॐ ह्रीं कर्मप्रवादभावनाप्राप्त० जलादिकं ॥ ३६ ॥

प्रत्याख्यानमहापूर्वं यो श्रुतिशास्त्रपारगः । जल० ॥

ॐ ह्रीं प्रत्याख्यानपूर्वांगभावना० जलादिकं ॥ ३७ ॥

विद्यानुवादपूर्वांगं येनांगीकृतमद्भुतं । जल० ॥

ॐ ह्रीं विद्यानुवादपूर्वांगभावनाप्राप्तमुनये जलादिकं ॥३८॥

कल्याणपूर्वनाम्ना हि ज्ञातं येन मुनीशिना । जल० ॥

ॐ ह्रीं कल्याणवादपूर्वांगभावना० जलादिक ॥ ३९ ॥

प्राणानुवादपूर्वांगं धर्मध्यानविशारदं । जल० ॥

ॐ ह्रीं प्राणानुवादपूर्वांगभावना० जलादिकं ॥ ४० ॥

विशालपूर्वसंयुक्तं विदग्धं बोधपारगं । जल० ॥

ॐ ह्रीं विशालपूर्वभावनाप्राप्त० जलादिकं ॥ ४१ ॥

लोकविन्दुश्चपूर्वांगे धातारं धर्मदेशकं । जल० ॥

ॐ ह्रीं लोकविन्दुतापूर्वभावना० जलादिकं० ॥ ४२ ॥

ज्ञानं नराणां सुखदं प्रमाणं तत् साधुनां सौख्यसहायभूतं ।
संपूजये सज्जलचन्दनौघैः कर्मक्षयायापकबोधकाय ॥

ॐ ह्रीं अभिक्ष्णज्ञानोपयोगभावना० महार्घं ॥

अथ जयमाला ।

जिनवरमुखजातं जगविख्यातं, कुमइभाव दूरीकरणं ।
गणधरवरगणियं मुनिवर भणियं, सकललोय पावण सरणं ॥
णाण भावण भवभय भंजन, णाण तिलोय भविक मनरंजन ।
णाण जरामरणादिक वारण, णाण कषाय कलंक निवारण ॥
णाण मट मद माण णिकंदण, णाण भवनतप पाप निकंदन ।
णाण भावणा शिवगरु दाता, णाण फले तिहुयण वरसाता ॥
णाण जिणंद वदणदो जानं, अंगु उपांग वेद विख्यातं ।
णाण रिसिह णाण उवम्सं, णाण दाण दि जूइ अविछेणं ॥
णाण सदा मद अठ विहंडण, णाण वस इंदिय परिखंडण ।
णाण अपार संसार सुतारण, णाण सदा कल्लाणह कारण ॥

घत्ता ।

शिव संपयकारण भवजलतारण कम्म निवारण णाणवरं ।
सिरिभूषण महियं बहुगुण सहियं बंभणाण भणियं परमं ॥

ॐ ह्रीं अभीक्ष्णज्ञानोपयोगभावनाय पूर्णार्घं ॥

अथ संवेगभावना ।

संसारसारसं त्यक्तं दुःखराशिक्षयंकरं ।
स्थापयामि विशुद्धयाहं आह्वानन तत्पूर्वकं ॥

ॐ ह्रीं वैराग्यभावनात्रावतर२ संवौषट् । अत्र तिष्ठ तिष्ठ ठः ठः ।
अत्र मम सन्निहितो भव भव वषट् ॥

पुत्रमित्रगृहारम्भदारेभ्यो निवृतं मनः ।
सा विरक्तिर्बुधैः ज्ञेया नरस्य बुद्धिदायिनी ॥

ॐ ह्रीं चतुर्दशसांगोपांगयुक्तसंवेगनाय जलादिकं ॥

सप्तलक्षधराकायं कदापि न विराधति ।
वैराग्यभावसम्पन्नं चर्चये जलचन्दनैः ॥

ॐ ह्रीं पृथ्वीकायोद्भववैराग्यभावनाप्राप्तमुनये जलादिकं ॥१॥

सप्तलक्षकुयोनिस्थजलकायनिरस्तधिः । वैराग्य० ॥

ॐ ह्रीं जलकायोद्भववैराग्य० जलादिकं ॥ २ ॥

तेयुकायोद्भवं दुःखं सप्तलक्षकुयोनिषु । वैराग्य० ॥

ॐ ह्रीं तेयुकायोद्भववैराग्य० जलादिकं ॥ ३ ॥

वायुकाये महादुःखे पूर्वसंख्ये कुलक्षणे । वैराग्य० ॥

ॐ ह्रीं वायुकायोद्भववैराग्य० जलादिकं ॥ ४ ॥

दशलक्षकुयोनौ च छेदे भेदे परे तरौ । वैराग्य० ॥

ॐ ह्रीं तरूकायोद्भववैराग्य० जलादिकं ॥ ५ ॥

निगोददुःखसंत्रस्तं नित्यनामभयप्रदं ।
वैराग्यभावसंपन्नं चर्चये जलचंदनैः ॥

ॐ ह्रीं नित्यनिगोद्भववैराग्यभावनाप्राप्तमुनये जलादिकं ॥ ६ ॥

१—सप्तलक्ष वायुकाय ।

समलक्षपरे भेदे स्वेतरे दुःखदे खले । वैराग्य० ॥

ॐ ह्रीं इतरनिगोद्भववैराग्य० जलादिकं ॥ ७ ॥

द्वेन्द्रिया बहवो जीवाः कीटकृमिमहीलताः । वैराग्य० ॥

ॐ ह्रीं द्वेन्द्रियोद्भववैराग्य० जलादिकं ॥ ८ ॥

त्रींद्रियो बहवो जीवा मत्कोटकपिपीलिका । वैराग्य० ॥

ॐ ह्रीं त्रींद्रीयोद्भववैराग्यभावना० जलादिकं ॥ ९ ॥

मक्षिकाश्च पतंगादि द्विरेफाश्चतुरिंद्रिया । वैराग्य० ॥

ॐ ह्रीं चतुरिंद्रियोद्भववैराग्य० जलादिकं ॥ १० ॥

पंचाक्षा मनुजा लक्षचतुर्दशप्रमेषु च । वैराग्य० ॥

ॐ ह्रीं पंचेंद्रियोद्भववैराग्य० जलादिकं ॥ ११ ॥

चतुर्लक्षामरे दुःखे देवयोनौ परान्मुखं । वैराग्य० ॥

ॐ ह्रीं देवगतिदुःखोद्भववैराग्य० जलादिकं ॥ १२ ॥

शीतोष्णवदनाजातदुःखानि संति नारके । वैराग्य० ॥

ॐ ह्रीं नरकगतिदुःखोद्भववैराग्य० जलादिकं ॥ १३ ॥

तिर्यंचजातिभेदेषु चतुर्लक्षेषु य दुःखं । वैराग्य० ॥

ॐ ह्रीं तिर्यंचगतिदुःखोद्भववैराग्य० जलादिकं ॥ १४ ॥

चतुराशीतिलक्षेषु दुःखं जातं भवे भवे ।
तं दुःखहानयेऽस्माभिः पूजितं जलचंदनैः ॥

ॐ ह्रीं वैराग्यभावनाप्राप्तमुनये महार्घं० ॥

अथ जयमाला ।

सिरि तित्थेसर भव्वदिणेसर रिसहेसर जिण प्रगट कियं ।
वर बाहुबली भरतेसर सुंदर रिसहसेण मण शुद्धलियं ॥
वैरागेण सफल होई जम्म वैरागेण हवइ पुणकम्म ।
वैरागेण तरइ स्रुति सेत वैराग्य भव दुह छंदण मित्त ॥
वैराग्य मोह माया हरंत, वैराग्य अणुव्रय सुह धरंत ।
वैरागेण उपजई सिद्धि, वैरागेण लहई शिव रिद्धि ॥
वैरागेण णमइ णर पाय, वैरागेण कुपाप पलाय ।
वैरागेण सकल होइ सिद्धि, वैरागेण लहइ शिव रिद्धि ॥
वैरागेण लहइ सुख खाण, शुद्ध वैराग्य दिजइ माण ।
वैराग्ये भव सफल करज्जइ, पुण रवि आवागमण न कीजइ ॥

घत्ता ।

वैराग्यमुणिंदह दुःखनिकंदह भवभयफंदह भयहरणं ।
णिखिलागमनायक शिवपददायक भव्यजनस्स सदा सरणं ॥
ॐ ह्रीं संवेगभावनायै पूर्णार्घं० ॥

अथ शक्तित्याग भावना ।

चतुर्विधजिनेन्द्रस्योद्भूतां पापमलापहां ।
स्वर्गमोक्षवशीभूतां स्थापयामि यथागमं ॥

ॐ ह्रीं दानभावनात्रावतर२ संवौषट् । अत्र तिष्ठ तिष्ठ ठः ठः अत्र मम सन्निहितो भव भव वषट् ॥

भोगभूमिभवं सौख्यं या ददाति सुभावना ।
तदोपदेशनं साधुं यजे पुष्पवराक्षतैः ॥

ॐ ह्रीं आहारदानभावनोपदेशकायमुनये जलादिकं ॥ १ ॥

श्री जिनेन्द्रमुखोत्पन्नं ज्ञानं यो मुनि भाषते ।
तस्य भावनया रक्तं यजे पुष्पवराक्षतैः ॥

ॐ ह्रीं ज्ञानदानभावनारतमुनये जलादिकं ॥ २ ॥

रोगशांतिकरं शुद्धं भेषजं यो ददाति वै । तस्य० ॥

ॐ ह्रीं सर्वौषधिऋद्धियुक्तमुनये जलादिकं ॥ ३ ॥

स्थावरजंगमजीवेषु दयादानं ददाति यः ।
करुणामृतसंतृप्तं यजे पुष्पवराक्षतैः ॥ ४ ॥

ॐ ह्रीं अभयदानभावनारतमुनये जलादिकं ॥ ४ ॥

दानेन ज्ञानं च यशस्त्रिलोके, दानेन सौख्यं भुवनोद्भवं च ।
दानेन नाभेय जिनोत्तमोऽभू, त्तस्माद्यजे दानमनल्पपुण्यैः ॥

ॐ ह्रीं दानभावनायै महार्घं ॥

अथ जयमाला ।

सिरि जिणवर कहियं पाटविरहियं चतुविह दाणमनंत फलं ।
गणधर विछरीयं बहुगुणभरियं चंद्रभासदो अतिविमलं ॥
दाणेन जीव आरज होय, दाणेन न वेर मंडेन कोय ।
दाणेन सुरेंदह भोग सार, दाणेन लहइ संसारं पार ॥
दाणेन णरंदह करइ सेव, दाणेण होइ पसण देव ।
दाणेन रोग णवि अंग होय, दाणेण पसण भुवण लोय ॥
दाणेन भोग धरासु सुख, दाणेन वहई परम सुख ।
दाणेन सु वंतरणमइ पाय, दाणेन सुवर्णय होय काय ॥
दाणेन अट्ठ भोगाधि सार, दाणेन पंच विमाणकार ।
दाणेन होय गृहकणध धार, दाणेण रयण चउदसे सु सार ॥

घत्ता ।

रिसिसर कहिवा तिहुयणमहिया दाण भावणा भय हरणी ।
सिरिभूषण भासि गुणपयासि भणण भणाण भवजलतरणी ।

ॐ ह्रीं दानभावनाय महार्घं० ॥

अथ शक्ति स्तप।

कर्मारिभेदने वज्रं किल्विषमेघमारुतं।
इच्छितार्थप्रदं शुद्धं स्थापये तत् तपोवरं॥

ॐ ह्रीं तपोभावनात्रवतर २ संवौषट्। अत्र तिष्ठ तिष्ठ ठः ठः अत्र मम सन्निहितो भव भव वषट्॥

दिनैकांतरे शुद्धं वा आहारं भुनक्ति च।
एकांतरे युतं साधुमष्टद्रव्यैः समर्चये॥

ॐ ह्रीं एकांतरतपसायुक्तमुनये जलादिकं॥ १॥

द्विदिनांतरयुक्तेन तपसा यो मुनीश्वरः।
द्विदिनांतरसंयुक्तमष्टद्रव्यैः समर्चये॥

ॐ ह्रीं द्विदिनांतरतपसायुक्तमुनये जलादिकं॥ २॥

अष्टाह्नंतरं यो वै भुनक्त्याहारपात्रकं।
अष्टान्हांतरसंयुक्तमष्टद्रव्यैः समर्चये॥

ॐ ह्रीं अष्टपवासतपसायुक्तमुनये जलादिकं॥ ३॥

पक्षोपवाससंयुक्ते तपसा यो मुनीश्वरः।
पक्षोपवाससंयुक्तमष्टद्रव्यैः समर्चये॥

ॐ ह्रीं पक्षोपवासतपसायुक्तमुनये जलादिकं॥ ४॥

प्रतिमासं मुनींद्रो यः पारणं कुरुते वरं।
मासोपवाससंयुक्तमष्ट०॥

ॐ ह्रीं मासोपवासतपसायुक्त मुनये जलादिकं॥ ५॥

षण्मासे पारणं यो व करोति कर्महानये।
षण्मासे तपसायुक्तमष्ट०॥

ॐ ह्रीं षण्मासतपसायुक्तमुनये जलादिकं०॥ ६॥

पोपवाससंयुक्तो यो भक्तियतीश्वरः ।
वर्षोपवाससंयुक्तमष्टद्रव्यै० ॥
ॐ ह्रीं वर्षोपवासतपसायुक्तमुनये जलादिकं ॥ ७ ॥
दु:खहानिकरं पुंसां तपो वृद्धि महाबलः ।
स्वाहानि तपसा युक्तमष्ट० ॥
ॐ ह्रीं दुःखहरणतपसायुक्तमुनये जलादिकं ॥ ८ ॥
सदा यो लभ्यते सारं श्रुतज्ञानाभिधस्तपः ।
तस्य भावनया युक्तमष्ट० ॥
ॐ ह्रीं श्रुतज्ञानतपोभावना० जलादिकं ॥ ९ ॥
स्वाध्यानतपे यो वै व्रतानाचरते खलु ।
द्वि॰द्वंद्वतपो युक्तमष्ट० ॥
ॐ ह्रीं द्व द्वन्द्वतपोभावन युक्तमुनये जलादिकं ॥ १० ॥
ग्रा॰ ॰ ॰ दनपोनाम कुरुते यो जितेन्द्रियः ।
ए॰ ग्रा ॰तपो युक्तमष्ट० ॥
ॐ ह्रीं ए॰ग्रा॰ पोभा॰न युक्तमुनये जलादिकं ॥ ११ ॥
मा॰मे चिंतनं यो ॰ करोति तपसोद्भवं ।
मनः चिंतनसंयुक्तमष्ट० ॥
ॐ ह्रीं म चिंतिनतपमायुक्त ॰ये जलादिकं ॥ १२ ॥
त्रिशुद्धय व्र॰संयु॰ ॰तोभद्रनामनि ।
गुणगणना॰युक्त॰ ॰ ॥
ॐ ह्रीं ॰वतो॰द्रत ॰ युक्त ॰ जलादिकं ॥ १३ ॥
सातकुंभाभ्यानय तपसि सर्वदोषघी ।
मनो॰ ॰ायसंयुक्तमष्ट० ॥

ॐ ह्रीं सातकुंभतपसायुक्तमुनये जलादिकं ॥ १४ ॥

सिंहविक्रीडितनामतपसा परिमंडितं ।
कर्माणि खलु नश्यन्ति अष्ट० ॥

ॐ ह्रीं सिंहविक्रमतपसायुक्तमुनये जलादिकं ॥ १५ ॥

वज्रमध्याभिधानेऽपि तपसि संस्थितो मुनिः ।
कर्मारिभेदने वज्रमष्ट० ॥

ॐ ह्रीं वज्रमध्यतपसायुक्तमुनये जलादिकं ॥ १६ ॥

तपो मेरुजमध्याख्यं यः करोति मुनीश्वरः ।
तस्यभावनया युक्तमष्ट० ॥

ॐ ह्रीं मेरुजमध्यतपसा० जलादिकं ॥ १७ ॥

डल्लिनोलीनतपसि संस्थितो यो मुनिसत्तमः ।
कारिकाष्टाभिसादृश्यमष्ट० ॥

ॐ ह्रीं डल्लिनोलीनतपसायुक्त० जलादिकं ॥ १८ ॥

मृदंगमध्यतपसा संयुक्तं धर्मदेशकं ।
कर्मसन्तानहंतारिमष्ट० ॥

ॐ ह्रीं मृदंगमध्यतपस युक्तमुनये जलादिकं ॥ १९ ॥

धर्मचक्रव्रतं सारं करोति धर्मसिद्धये ।
अनाकस्यं सुरैः पूज्यमष्ट० ॥

ॐ ह्रीं धर्मचक्रतपसायुक्त० जलादिकं० ॥ २० ॥

रौद्रोत्तर वसंताख्यतपो यः कुरुते यमी ।
पापारिकुलहंतारमष्ट० ॥

ॐ ह्रीं रौद्रोत्तरवसंततपसायुक्तमुनये जलादिकं ॥ २१ ॥

यो मुनिः कुरुते नित्यमवमौदर्यतपो महत् ।
पंचेंद्रियमदातीतमष्ट० ॥
ॐ ह्रीं अवमोदर्यतपसायुक्तमुनये जलादिकं ॥ २२ ॥

करोति व्रतशुद्ध्यर्थं रसत्यागं तपो महत् ।
धर्मध्यानरतं साधुमष्टद्रव्यैः समर्चये ॥
ॐ ह्रीं रसपरित्यागतपसा युक्त० जलादिकं ॥ २३ ॥

वस्तुसंख्या तपो रम्यं करोति यतिनायकः ।
कषायभटतामैरमष्ट० ॥
ॐ ह्रीं वस्तुसंख्यातपस युक्त० जलादिकं ॥ २४ ॥

कर्मक्षयं संकुरुते प्रशस्यं ह्यनेकसौख्यालयदानदक्षं ।
जलादिद्रव्यैर्वसुभिः सदा त संपूजयामि मुनिं ज्ञानवार्द्धि ॥
ॐ ह्रीं तपोभावनायै महार्घं ॥

अथ जयमाला ।

तव धम्म विचारह गुण भण्डारह, सह सुखकारह कम्महरं
सिसि हेसर कहियं कम्म विदाहियं, तिहुयण महियं धम्म परं ॥

शुद्धतवेण सुजाण भण्डारह, शुद्धतवेण सुजाण विचारह ।
शुद्धतवेण कषाय निणासह, शुद्धतवेण सकल सद्भावह ॥

शुद्धतवेण अमरपद पावइ, शुद्धतवेण सकल चय मारह ।
शुद्धतवेण तिलोयह सिद्ध, शुद्धतवेण जिनंदह रिद्धि ॥

शुद्धतवेण सुदेव सहाय, शुद्धतवेण णमइ अरि पाय ।
शुद्धतवेण कुयोनि छिज्जइ, अहनिशि शुद्ध तवो इम किज्जइ ॥

कम्मकलंक जलंजलि दिज्जइ, शुद्धतवेण परम पद लिज्जइ।
शुद्धतवेण मयमद खण्डण, शुद्धतवेण परम पद मण्डण॥

घत्ता।

बारह तपमारह कम्म निवारणह मासह सुह संपयकरण।
सिरिभूषण कहियो तिहुयण महियो बंभणाण भवभयहरणो॥

ॐ ह्रीं शक्तितस्त्यागतपसे पूर्णार्घं।

अथ साधु समाधि भावना।

श्री सर्वज्ञमुखोत्पन्नं शिवशर्मविधायनीं।
स्थापयामि सदा भक्त्या आह्वाननविधायनैः॥

ॐ ह्रीं साधुसमाधि अत्रावतर२ संवौषट्। अत्र तिष्ठ तिष्ठ ठः ठः
अत्र मम सन्निहितो भव भव वषट्॥

कुष्ठोदरव्यथाशूलैः पीडिता ये मुनीश्वराः।
यः करोति समाधानं यजे तं मुनिनायकं॥
ॐ ह्रीं साधुसमाधिभावनाप्राप्तमुनये जलादिकं॥ १॥

दुष्टोपसर्गसंप्राप्तं वधबंधादिताडने।
यो निवारयते साधोः यजे तं मुनिनायकं॥
ॐ ह्रीं उपसर्गनिवारकभावनाप्राप्तमुनये जलादिकं॥ २॥

मनो दुःखं गते यो वै शुश्रूषाभेषजादिभिः
भावेन कुरुते नित्यं यजे तं०॥
ॐ ह्रीं दुःखविनाशभावना० जलादिकं॥ ३॥

किंचिद्दोषसमायाते निर्मले ते सुशासने ।
तन्निवारयते यो हि यजे तं० ॥
ॐ ह्रीं व्रतरक्षणसाधुसमाधिभावनाप्राप्तमुनये जलादिकं ॥ ४ ॥

सर्वाणि दुःखानि क्षयं व्रजंति सुखानि सर्वाणि भवंति नित्यं ।
यस्याः प्रसादाच्छिवसौख्यमुख्यं यजे जलादिर्मुनिज्ञानवार्द्धिं ॥
ॐ ह्रीं साधुसमाधये महार्घं ॥

अथ जयमाला ।

भवजलतारण शिवसुखकारण साधुसमाधि सुपूरणवरो ।
सविकम्म निवारण धम्म विधारण परमपरा पर सुखःकरो ॥
साधुसमाधि मुणिंदह किज्जइ, साधुसमाधि महाफल लिज्जइ ।
साधुसमाधि सुधम्म सहाय, साधुसमाधि फले सुरराय ॥
साधु०कुरोग निवारण, साधु० अचलपद कारण ।
साधु० महा सुखकारी, साधु० भवोदधि तारी ॥
साधु० दया गुण मंडइ, साधु० महामद छंडइ ।
साधु० विणय संपज्जइ, साधु०करइ दुह वज्जइ ॥
साधु०सुसुह बहुभासिय, साधु० निखिलगुण रासिय ।
साधु०सदा जिण कहिया, साधु०महामुनि महिया ॥

घत्ता ।

सिरिजिण कहिया तिहुयण महिया साहुसमाहि महा फलदा ।
मुणिधम्म विजुत्ता कम्म विखुत्ता बंभणाण भासिय वरदा ॥
ॐ ह्रीं साधुसमाधये पूर्णार्घं० ।

अथ वैयाव्रत भावना ।

धर्मध्यानप्रदां साध्वीं पापाश्रवनिरोधनीं ।
स्थापयामि जिनोदिष्टां वैयावृत्य सुभावनां ॥

ॐ ह्रीं वैयाव्रतभावनात्रावतर२ संवौषट् । अत्र तिष्ठ तिष्ठ ठः ठः । अत्र मम संन्निहितो भव भव वषट् ॥

कासादिकषड्रिदेन तैलेनातिसुमर्दनं ।
वैयावृत्तिं करोत्येव यस्तं चर्चे जलादिभिः ॥

ॐ ह्रीं तैलमर्दनवैयावृतिभावनाप्राप्तमुनये जलादिकं ॥ १ ॥

उष्णेन वारिणा साधोः करोति तनुमार्जनं ।
सदा ज्ञानप्रकाशाय यस्तं चर्चे जलादिभिः ॥

ॐ ह्रीं जलसेवावैयावृतिभावनाप्राप्तमुनये जलादिकं ॥ २ ॥

तनुमार्जनपादाब्जक्षालनं पीठिमर्दनं ।
वैयावृत्तिं करोत्येव यस्तं० ॥

ॐ ह्रीं हस्तोपचारवैयावृतिभावनाप्राप्तमुनये जलादिकं ॥ ३ ॥

शैयासनासने साधोः विनयान्वितमानसः । वैयावृत्तिं० ॥

ॐ ह्रीं शयनासनवैयावृतिभावना० जलादिकं ॥ ४ ॥

यशोवुद्धिर्धनं लोके महत्वं स्यान्महातले ।
जलचन्दनपुष्पौघैर्ददाम्यर्घं महोत्तमं ॥

ॐ ह्रीं वैयावृतिकारणभावनायै महार्घं ॥

अथ जयमाला ।

आइ जिनेसर पदमावि कहिया, वैयाविच्चि तिलोय महिया ।
अमलगुण कलि गणगह भरिया. बाहुबलि मन चक्रम करिया ॥
वैयाविच्चि मुणिसर किज्जइ, वैयाविच्चि महाय बलिज्जइ ।
वैयाविच्चि परम जस पावइ, वैयाविच्चि णिरोस मुवज्जइ ॥
वैयाविच्चि दलिद्द णिवारइ, वैयाविच्चि भवोदधि तारइ ।
वैयाविच्चि अमरपद विज्जइ, वैयाविच्चि सदा फल लिज्जइ ॥
वैयांविच्चि करइ जन सेवा, वैयाविच्चि पसण जु देवा
वैयाविच्चि कुकम्म विणासइ, वैयाविच्चि सुभव पयासइ ॥
वैयाविच्चि गणेंदसु कहिया, वैयाविच्चि मुणिद सु महिया ।
वैयाविच्चि महा तव सिद्धि, वैयाविच्चि अचलपद रिद्धि ॥

घत्ता ।

दिइ वैयाविच्चि गुण संपत्ति, सिरिभूषण मुणिणा कहिया ।
जिनवर मुख जाता भव भय त्राता, बंभणाण मुणिणा कहिया ॥

ॐ ह्रीं वैयावृत्तिकारणाय पूर्णार्घं ॥

अथ अर्हद्भक्ति भावना ।

अर्हतां परमां भक्तिं संसारांबुधितारिणां ।
स्थापयामि महाभक्त्या मिथ्यांधकारनाशिनां ॥

ॐ ह्रीं अर्हद्भक्तिभावनात्रावतर२ संवौषट् । अत्र तिष्ठ तिष्ठ, ठः ठः, अत्र मम संन्निहितो भव भव वषट् ।

दर्शनं जिनदेवस्य स्तवीति च करोति यः ।
स्तोत्रेण परया भक्त्या तं यजे मोक्षमार्गगं ॥

ॐ ह्रीं दर्शनस्तोत्रेणार्हद्भक्तये जलादिकं ॥ १ ॥

आह्वाननं जिनेन्द्रस्य सु पूजासमये सदा ।
यः करोति सदाचारं यजे तं० ॥

ॐ ह्रीं आह्वाननार्हद्भक्तये जलादिकं ॥ २ ॥

स्थापनं श्रीजिनेन्द्रस्य पूजायां शुद्धभावतः ।
यः करोति सदाचारं यजे तं० ॥

ॐ ह्रीं स्थापनार्हद्भक्तये जलादिकं ॥ ३ ॥

सन्निधिकरणसारं जिनेन्द्रस्य जिनागमत । यः करोति० ॥

ॐ ह्रीं सन्निधिकरणार्हद्भक्तये जलादिकं ॥ ४ ॥

अष्टधा श्रीजिनेन्द्रस्य पूजनं परमोत्सवैः । यः करोति० ॥

ॐ ह्रीं पूजनार्हद्भक्तये जलादिकं ॥ ५ ॥

स्नपनं सर्वदोषघ्नं घृतदुग्धदधीक्षुभिः । यः करोति० ॥

ॐ ह्रीं पंचामृतस्नानार्हद्भक्तये जलादिकं ॥ ६ ॥

निरन्तरं सुकंठेन सर्वज्ञकीर्तनस्तवं । यः करोति० ॥

ॐ ह्रीं महागीतेनार्हद्भक्तये जलादिकं ॥ ७ ॥

निर्घोषवाद्यशब्देन जिनभक्तिं निरन्तरं । यः करोति० ॥

ॐ ह्रीं वाद्येनार्हद्भक्तये जलादिकं ॥ ८ ॥

नर्तनं श्रीजिनेन्द्राग्रे हावभावसमन्वितं । यः करोति० ॥

ॐ ह्रीं नर्तनेनार्हद्भक्तये जलादिकं ॥ ९ ॥

गंगाकल्लोलसादृश्यैश्चामरैर्भक्तिमात्मवित । यः करोति० ॥

ॐ ह्रीं चामरेणार्हद्भक्तये जलादिकं ॥ १० ॥

छत्रत्रयेण सद्भक्तिं जिनेन्द्रस्य सुभावतः । यः करोति० ॥

ॐ ह्रीं छत्रत्रयेणार्हद्भक्तये जलादिकं ॥ ११ ॥

पंक्ति श्रीजिनराजस्य सिंहपीठेन शोभिना । यः करोति० ॥

ॐ ह्रीं सिंहासनेनार्हद्भक्तये जलादिकं ॥ १२ ॥

चन्द्रोपकेन सद्भक्ति चीनदेशोद्भवैः नवैः । यः करोति० ॥

ॐ ह्रीं चंद्रोपकेनार्हद्भक्तये जलादिकं ॥ १३ ॥

संसारपीठोधि तरंति भव्या यस्या प्रमादाच्छिवसौख्यमेति ।
तां नीरगन्धैः कुसुमैः शुभाक्षतैश्चरुप्रदीपैरहमर्चये फलैः ॥

ॐ ह्रीं अर्हद्भक्तये महार्घं ॥

अथ जयमाला ।

सिरि जिणवरभत्ति सुह संपत्ति संसारांबुधितरणी ।
जउपाव विणासणि सुगति णिवासिणि बहु सुहरासिणि भयहरणी
जिणवर भक्ति करइ सविभोग, जिणवर भक्ति हरइ सवि रोग ।
जिणवर भक्ति करइ सविकाज, जिणवर० जहइ शिवराज ॥
जिणवर० हरइ कुच्छ दुःख, जिणवर० हरइ महा सुख ।
जिणवर० विणासइ कम्म, जिणवर० करइ जस धम्म ॥
जिणवर० कुविघ्न विणासण, जिणवर० पाप पयासण ।
जिणवर० सु कीर्ति करइ जिणवर० कुदुख हरइ ॥
जिणवर० सुमोख सहाय, जिणवर० णमइ सुर राय ।
जिणवर० जु परम णाण, जिणवर० तिलोय माण ॥

घत्ता ।

इति सिरि जिणभक्ति कम्म विच्छत्ति शिवसंपत्ति सुगईकरं ।
सिरि भूषणभासि सुगुण पयासि बंभणाण भवतापहरं ॥

ॐ ह्रीं अर्हद्भक्तये पूर्णार्घं० ।

अथ आचार्य भक्ति भावना।

श्रीमदाचार्यसद्भक्तिं पुण्यदां सुखदां तथा।
स्थापयामि जिनेन्द्रोक्तां मनोवाक्कायशुद्धितः॥

ॐ ह्रीं आचार्यभक्ति अत्रावतर २ संवौषट्। अत्र तिष्ठ तिष्ठ ठः ठः अत्र मम सन्निहितो भव भव वषट्॥

प्रशक्तऋद्धिसंयुक्तो मोक्षमार्गोपदेशकः।
संपूज्यते मया साधुः कर्म्मराशिविवर्हिणा॥

ॐ ह्रीं प्रशक्तऋद्धिआचार्य भक्तये जलादिकं॥ १॥

श्रेणियुग्मयुतो धीरो गंभीरगुणसागरः॥ संपूज्यते०॥

ॐ ह्रीं युग्मश्रेणियुताचार्यभक्तये जलादिकं॥ २॥

प्रत्यक्षज्ञानसंयुक्तो मुनिनाथो गुणार्णवः॥ संपूज्यते०॥

ॐ ह्रीं प्रत्यक्षज्ञानाचार्यभक्तये जलादिकं॥ ३॥

सधर्म्मामृतसंतृप्तो ह्यनगारो जितेंद्रियः॥ संपूज्यते०॥

ॐ ह्रीं अनगाराचार्यभक्तये जलादिकं॥ ४॥

धर्माधर्मप्रकाशाय प्रजानां हितकारकः॥ संपूज्यते०॥

ॐ ह्रीं राजऋष्याचार्यभक्तये जलादिकं॥ ५॥

परमब्रह्मणो रूपं स्वचित्त धारयंति ये॥ संपूज्यते०॥

ॐ ह्रीं ब्रह्मऋष्याचार्यभक्तये जलादिकं॥ ६॥

देवर्षिः सुगुणांभोधिः पावनो मलहारकः॥ संपूज्यते०॥

ॐ ह्रीं देवऋष्याचार्यभक्तये जलादिकं॥ ७॥

परमर्षिः परो ध्यानी केवलज्ञानदायकः। संपूज्यते०॥

ॐ ह्रीं परमऋष्याचार्यभक्तये जलादिकं॥ ८॥

पुलाको हितसद्बुद्धिः सर्वशास्त्रविशारदः। संपूज्यते० ॥
ॐ ह्रीं पुलाकाचार्यभक्तये जलादिकं ॥ ९ ॥

बकुशो बोधने रक्तो भव्यजीवाहितंकरः। संपूज्यते० ॥
ॐ ह्रीं बकुशाचार्यभक्तये जलादिकं ॥ १० ॥

कुशीलः संयमग्राही शुद्धचारित्रपालकः। संपूज्यते० ॥
ॐ ह्रीं कुशीलाचार्यभक्तये जलादिकं ॥ ११ ॥

स्नातको मुनिशार्दूलः सर्वग्रंथविवर्जितः। संपूज्यते० ॥
ॐ ह्रीं स्नातकाचार्यभक्तये जलादिकं ॥ १२ ॥

आचार्याणां पराभक्तिप्रसूने सुखमुल्वणं।
तां यजे जलगंधेन शिवशर्म्मविधायनी ॥
ॐ ह्रीं आचार्यभक्तये जलादिकं ॥

अथ जयमाला।

जो मुनि तारणतरण समच्छहु, भवसायर वरनाव समं।
परभव जण सुहयं पुण समच्छहु, आयरियभत्ति परमं ॥
जो मुणिवर महव्वय पालन्त, जो मुणिवर कम्मइ काटन्त।
जो मुणिवर चारित धरन्त, जो मुणिवर तप बारह करन्त ॥
जो मुणिवर गुत्ति तय रक्खो, जो मुणिवर शिव सायर दक्खो।
जो मुणिवर दह धम्म पयासे, जो मुणिवर निखिलागम भासे ॥
जो मुणिवर जीवदया पाले, जो मुणिवर मिथ्यामद टाले।
जो मुणिवर परीसहा बावीस, जो मुणिवर तप बारह इस ॥
जो मुणिवर कम्मट्ठइ खण्डे, जो मुणिवर शुभ ध्यानह मण्डे।
जो मुणिवर रयणत्तय जुत्ता, जो मुणिवर तिय सल्ल विमुत्ता ॥

घत्ता ।

जे बहुगुणपूरा कम्म विचूरा शिवपद सूरा भवभय हरणं ।
सिरिभूषण कहिया तिहुयण महिया बंभणाण मह सुहकरणं ॥
ॐ ह्रीं आचार्यभक्तये पूर्णार्घं ।

अथ बहुश्रुत भक्ति भावना ।

धर्मोपदेशदातारं त्रातारं भववारिधौ ।
बहुश्रुतं महाभक्त्या स्थापयामि यथागमं ॥
ॐ ह्रीं बहुश्रुतात्रावतर २ संवौषट् । अत्र तिष्ठ तिष्ठ ठः ठः ।
अत्र मम सन्निहितो भव भव वषट् ॥

लोकालोकप्रकाशक्ति जन्मांतरविशूचिका ।
सर्वदोषविनिर्मुक्ता भक्तिर्या सा बहुश्रुता ॥
ॐ ह्रीं द्विषासांगोपांगयुक्तबहुश्रुतभक्तये जलादिकं ॥

बहुश्रुतगुणाधारं धर्मतत्वप्रदीपकं ।
जलचन्दनपुष्पैश्च पूजयामि बहुश्रुतं ॥
ॐ ह्रीं पूजयाश्रुतभक्तये जलादिकं ॥

वपुषा मनसा वाचा वंदनागुणभाजनं । जलचन्दन० ॥
ॐ ह्रीं वंदनाश्रुतभक्तये जलादिकं ॥

तोयचन्दनाक्षतैः प्रसूनहव्यदीपकैः,
धूपधूम्रनालिकेरसंयुतैः सदार्घकैः ।
कर्ममर्मछेदनं सुपापदाह भेदनं,
बहुश्रुतं यजामहे भवार्तिकंदकंदनं ॥
ॐ ह्रीं बहुश्रुतभक्तये महार्घं ॥

अथ जयमाला ।

बहुश्रुतभावण कम्म विद्रावण मुक्तिलच्छी सुहमं परमं ।
पाव विमोक्खण भवजल सोक्खण धम्म विपोषण शिवचरणं ॥

इह बहुश्रुत भावण भवह पार, इह बहुश्रुत भावण कम्म णास ।
इह बहुश्रुत भावण धम्म रास, इह बहुश्रुत भावण समय सार ॥

इह बहुश्रुत भावण विणय होय, इह बहुश्रुत भावण णमइ लोय ।
इह बहुश्रुत भावण सुफल जाण, इह बहुश्रुत भावण पंच णाण ॥

इह बहुश्रुत भावण कम्म डाह, इह बहुश्रुत भावण लोय माण ।
इह बहुश्रुत भावण अचल गण, इह बहुश्रुत भावण परम धम्म ॥

इह बहुश्रुत भावण गलइ कम्म, इह बहुश्रुत भावण सफल जम्म ।
इह बहुश्रुत भावण मोक्ख मग्ग, इह बहुश्रुत भावण सुह सुमग्ग ॥

घत्ता ।

इह बहुसुद भावण मह सुह दावण शिवसुख पावण गुण लहियं ।
सिरिभूषण महियं जिणवरकहियं बंभणाण मुनि नामनयं ॥

ॐ ह्रीं बहुश्रुतभक्तये पूर्णार्घं ॥

अथ प्रवचन भावना ।

ज्ञानं श्री जिनेन्द्रोक्तं स्थापयामि श्रुताप्तये ।
मतिश्रुतावधिश्चेति मनःपर्ययकेवलम् ॥

ॐ ह्रीं प्रवचनभक्ति अत्र अवतर २ संवौषट् । अत्र तिष्ठ तिष्ठ ठः ठः अत्र मम सन्निहितो भव भव वषट् ।

कर्पाण्यष्टौ तथा सप्ततत्व षट्कायभावना ।
विचारः सर्ववेदानां मोक्षो यत्र तदागमं ॥
ॐ ह्रीं पंचांगोपांगश्रुतप्रवचनभक्तये जलादिकं ॥ १ ॥

जिनेन्द्रवक्त्रसंसक्तं मतिज्ञानं प्रदायकं ।
पूजयामि सदा भक्त्या द्रव्यैः शुद्धैरघापहं ॥
ॐ ह्रीं मतिज्ञानप्रवचनभक्तये जलादिकं ॥ १ ॥

द्वादशांगं जिनोद्रोक्तं श्रुतज्ञानं मदापहं । पूजयामि० ॥
ॐ ह्रीं श्रुतज्ञानप्रवचनभक्तये जलादिकं ॥ २ ॥

रूपिद्रव्यप्रकाशायावधिज्ञानं च षड्विधं । पूजयामि० ॥
ॐ ह्रीं अवधिज्ञानप्रवचनभक्तये जलादिकं ॥ ३ ॥

मनःपर्ययसद्बोधं ऋजुविपुलसंज्ञिकं । पूजयामि० ॥
ॐ ह्रीं मनःपर्ययप्रवचनभक्तये जलादिकं ॥ ४ ॥

केवलज्ञानसंशुद्धं लोकालोकप्रकाशकं । पूजयामि० ॥
ॐ ह्रीं केवलज्ञानप्रवचनभक्तये जलादिकं ॥ ५ ॥

चक्रित्वं भोगिनाथत्वं शक्रत्वं तीर्थनाथता ।
यस्या प्रसादतो नूनं सदा तां पूजयेऽर्घकैः ॥
ॐ ह्रीं प्रवचनभक्तये महार्घं ॥

अथ जयमाला ।

णाण उदयकर पाप तिमिर हर सुह सानाभर बोधमयं ।
मदि सुदि उहि मण पज्जयमदि केवल णाण महो उदयं ॥
पवयण भत्ति भवोदधि तारण पवयण भत्ति कुकम्म निवारण ।
पवयण भत्ति कषाय विहंडणी, पवयण भत्ति कुकम्म विखंडणी॥

पव० सूद णाण पयासे, पवयण० शिव फल भासे।
पव० कुमग्ग विणासइ, पव० सुमग्ग णिवासइ ॥
पव० परमगइ संचइ, पव० महामद वंचइ।
पव० सुगुण भंडारह, पव० सफल संसारह ॥
पव० कुरूप सुरूपी, पव० अखय सुह कूपी।
पव० कुमति छंडइ, पव० सुगति पद मंडइ ॥

घत्ता।

पवयण भत्ति सदा सुहकारी, पव० पालो वय धारी।
सुरिभूषण जिण णाह पयारी, पवयण वदे बह्म विचारी ॥

ॐ ह्रीं प्रवचनभक्तये पूर्णार्घं ॥

आवश्यकापरिहाणी भावना।

आवश्यकाभिधां रम्यां भावनां स्थापयामि ताम्।
यथापूर्वं मुनींद्राणां चाभवन्मोक्षमार्गगाः ॥

ॐ ह्रीं आवश्यकापरिहाणीभावना अत्र अवतर २ संवौषट् अत्र तिष्ठ तिष्ठ ठः ठः अत्र मम सन्निहितो भव भव वषट् ॥

समता वन्दना यत्र प्रतिक्रमणमेव च।
प्रत्याख्यानं तथा स्तोत्रं कायोत्सर्गं च षड्विधं ॥

ॐ ह्रीं षड्विध सांगोपांगावश्यकपरिहाणीविशुद्धये अर्घं०।

समभावसमादिष्टं स्थितः पूर्वोत्तरे मुखं।
त्रिकालयोगसंचारी मन्यते मोक्षदायकः ॥

ॐ ह्रीं समताभावावश्यकापरीहाणिविशुद्धये जलादिकं ॥ १ ॥

दुरितविनाशाय प्रतिक्रमण शुद्धिदं ।
यत्करोति सदा योगी महाते मोक्षदायकः ॥
ॐ ह्रीं प्रतिक्रमणावश्यकापरिहाणिविशुद्धये जलादिकं ॥ २ ॥

जिनेन्द्रस्य गुणांभोधेः वंदनां कुरुते मुनिः ।
जलाद्यैरष्टधा द्रव्यैः महाने० ॥
ॐ ह्रीं वंदनावश्यका० जलादिकं ॥ ३ ॥

अनेकगद्यपद्येन स्तोत्रेणैव जिनोत्तमं ।
स्तूयते यो मुनिः साधुः महाते० ॥
ॐ ह्रीं स्तोत्रैणावश्यका० जलादिकं ॥ ४ ॥

गुणज्ञो गुणवान् साधुः प्रत्याख्यानपरायणः ।
तोयचन्दनपुष्पौघैः । महाते ॥
ॐ ह्रीं प्रत्याख्यानावश्यका० जलादिकं ॥ ५ ॥

कायोत्सर्गं करोत्येव निर्भयः सर्वतो यथा । तोयचन्दन० ॥
ॐ ह्रीं कायोत्सर्गावश्यका० जलादिकं ॥ ६ ॥

तोयचन्दनपुष्पौघैः प्रसूनैश्चाक्षतैः शुभैः ।
हव्यदीपैश्चधूपैश्च तां यजे वरश्रीफलैः ॥
ॐ ह्रीं आवश्यकापरिहाणिदर्शनविशुद्धये महार्घं ॥

अथ जयमाला ।

आवश्यक परीहाणि विशुद्धि, जाय साय णिम्मल वर बुद्धि ।
अणुकम्म पावइ सुर रिद्धि, मोक्खमग्ग संपज्जइ सिद्धि ॥
आवश्यक दो कम्म विणासइ, आवश्यक दो सुगइ णिवासइ ।
आवश्यक दो णाण उपज्जइ, आवश्यक दो मोक्ख संपज्जइ ॥

आवश्यक दो पावइ खण्ड, आवश्यक दो जाण विमण्ड।
आवश्यक दो दंशण शुद्धि, आवश्यक दो निम्मल बुद्धि॥
आवश्यक दो दुगइ विचूकइ, आवश्यक दो सूगइ उपज्जइ।
आवश्यक दो रोय विलज्जइ, आवश्यक दो सुगते मूरजइ॥
आवश्यक दो षटभेद कहिज्जइ समतावंदण स्तोत्र समज्जइ।
थुदि पडिक्कमण वर स्वाध्याय, आवश्यक पाले मुनिराय॥

घत्ता।

आवश्यक कीजिइ पाव विछिज्जइ धम्म धरिज्जइ सुद्धमणि।
सिरिभूषण भास्यो सुगुणपयास्यो बंभणाण मुणि सार भणे॥

ॐ ह्रीं आवश्यकापरिहाणिविशुद्धये पूर्णार्घं॥

अथ मार्ग प्रभावना भावना।

मोक्षमार्गप्रदां सारां जैनमार्गप्रभावनां।
स्थापयामि सदा सम्यक् भावपूरेण निश्चयः॥

ॐ ह्रीं मार्गप्रभावना अत्र अवतर २ संवौषट्। अत्र तिष्ठ तिष्ठ ठः ठः अत्र मम सन्निहितो भव भव वषट्।

रथोत्सवं जिनस्नानं नृत्यं गीतं च चर्चनं।
पूजा यत्र जिनेन्द्रस्य कर्तव्यं तत्र सर्वदा॥

ॐ ह्रीं दशविधसांगोपांगयुक्तमार्गप्रभावनाय जलादिकं॥

श्रुतावधिप्रकाशेन ज्ञानेनैव मुनीश्वरः।
मार्गप्रभावनां सारां करोत्येव यजेतकं॥

ॐ ह्रीं ज्ञानमार्गप्रभावनायै जलादिकं॥ १॥

पक्षमासोपवासेन तपो ये प्रचरंति हि ।
यजे सर्वे भयातीतां सदा मार्गप्रभावनां ॥
ॐ ह्रीं तपसामार्गप्रभावनायै जलादिकं ॥ २ ॥
गद्यपद्यकवित्वेन शास्त्रसंदर्शनेन च ।
मार्गप्रभावनां सारां करोत्येव यजेतकं ॥
ॐ ह्रीं कवित्वेमार्गप्रभावनायै जलादिकं ॥ ३ ॥
सुकंठेन वितर्केण व्याख्यानं वितनोति यः ।
जिनमार्गप्रकाशाय यजे तं धीरमानसं ॥
ॐ ह्रीं व्याख्यानेमार्गप्रभावनायै जलादिकं ॥ ४ ॥
समंतभद्रनामानमकलंकं जितेंद्रियं ।
जिनमार्गप्रकाशाय द्रव्याष्टकैर्महाम्यहं ॥
ॐ ह्रीं वादेनमार्गप्रभावनायै जलादिकं ॥ ६ ॥
जिनसेनं जितारातिं रविषेणं महाम्यहं ।
नेमिचंद्रंगुणैः पूर्णं ग्रन्थकर्तारमुत्तमं ॥
ॐ ह्रीं ग्रन्थोद्धारमार्गप्रभावनायै जलादिकं० ॥ ७ ॥
कैलाशपर्वते रम्ये बिंबानि भरतेशिना ।
करापितानि सद्भक्त्या यजे तं भरताभिधं ॥
ॐ ह्रीं जिनप्रतिमामार्गप्रभावनायै जलादिकं ॥ ८ ॥
चतुर्विधमहासंघगीतनृत्यमहोत्सवैः ।
मंत्रपूर्व प्रतिष्ठां यः करोत्येव हि तं यजे ॥
ॐ ह्रीं प्रतिमाप्रतिष्ठाकृतमार्गप्रभावनायै जलादिकं ॥ ८ ॥
सम्मेदाचलसेत्रुंजोर्जयंतादिनगादिषु ।
संघयात्रा यथा भक्त्या यो करोत्येव तं यजे ॥
ॐ ह्रीं संघयात्रामार्गप्रभावनायै जलादिकं ॥ ९ ॥

पोडशकारणान्यष्टान्हिदशलक्षणपूजनं ।
सद्द्रव्यैर्नृत्यगीतैश्च यः करोत्यत्र तं यजे ॥
ॐ ह्रीं अनेकपूजाविधानमार्गप्रभावनायै जलादिकं ॥११॥
जलेन गंधेन शुभाक्षतेन हव्येन दीपेन सुधूपकेन ।
फलेन सारेण जिनस्य जातां चर्चामि तां मार्गप्रभावनां हि ।
ॐ ह्रीं मार्गप्रभावनायै महार्घं ।

अथ जयमाला ।

वरकीर्तिपसारण भवजलतारण, वारण कम्मकलंक चयं ।
इह धम्म पहावण परमत वारण, भव भय हारण बंभमयं ॥

जय मग्ग पहावण धम्म थंभ, जय मग्ग पहावण सुगुण रंभ ।
जय मग्ग पहावण दह पयार, जय मग्ग पहावण भवह पार ॥
जय मग्ग पहावण कीत्ति रासि, जय मग्ग पहावण लछि दासि ।
जय मग्ग पहावण कुमत खंड, जय मग्ग पहावण स्वमत मंड ॥
जय मग्ग पहावण तित्थसंघ, जय मग्ग पहावण सिद्धि जंघ ।
जय मग्ग पहावण चैत्य देव, जय मग्ग पहावण मुणिव सेव ॥
जय मग्ग पहावण रामसेन, जय मग्ग पहावण रविषेण ।
जय मग्ग पहावण चंदकीत्ति, जय मग्ग पहावण मूढ संपत्ति ॥

घत्ता ।

इह मग्ग पहावण पाव निवारण, सिरिभूषण णिय वयण धरो ।
सिरि जिणमत पोषण कम्म विशोषण, बंभणाण शिव सुक्ख करो॥
ॐ ह्रीं मार्गप्रभवानायै पूर्णार्घं ।

अथ प्रवचन वात्सल्य भावना।

सर्वज्ञवदनोद्भूतं सारसौख्यकरं नृणां।
स्थापये धर्मसिद्धयर्थं वत्सलत्वं प्रवाचकं ॥

ॐ ह्रीं प्रवचनवात्सल्यांग अत्रावतर२ संवौषट्। अत्र तिष्ठ तिष्ठ ठः ठः। अत्र मम सन्निहितो भव भव वषट् ॥

शीलसंपत्तियुक्तानां चारित्रप्रतिपालिनां।
यत्र संक्रियते मानं तद्वात्सल्यं बुधैः स्मृतं ॥

ॐ ह्रीं द्विविधसांगोपांगयुक्तप्रवचनवात्सल्यांगाय जलादिकं ॥

भरतादिकसद्भूमौ ये तिष्ठंति मुनीश्वराः।
श्रुत्वा स्नेहं करोत्येव यजे तं धर्मवत्सलं ॥

ॐ ह्रीं साधुस्नेहप्रवचनवत्सलत्वायै जलादिकं ॥ १ ॥

भरतादिकसद्भूमौ या विहरन्ति चार्जिकाः।
श्रुत्वा स्नेहं करोत्येव यजे तं धर्मवत्सलं ॥

ॐ ह्रीं आर्जिकास्नेहप्रवचनवत्सलत्वायै जलादिकं ॥ २ ॥

भरतादिकसद्भूमौ ये संति सुश्रावकाः।
श्रुत्वा स्नेहं करोत्येव यजे तं धर्मवत्सलं ॥

ॐ ह्रीं श्रावकस्नेहप्रवचनवत्सलत्वायै जलादिकं ॥ ३ ॥

भरतादिकसद्भूमौ या संति सुश्राविकाः।
श्रुत्वा स्नेहं करोत्येव यजे तं धर्मवत्सलं ॥

ॐ ह्रीं श्राविकास्नेहप्रवचनवत्सलत्वायै जलादिकं ॥ ४ ॥

नीरगंधसुगन्धपुष्पसुभाक्षतौघचरुवरैः।
दीपधूपफलाश्रितैर्व्रतनायकं शिवदायकं ॥

रामसेनमुनींद्रचन्द्रकीर्तिवर्णिभिरर्चितं ।
ज्ञानसागरप्रार्थितं भवभंजकं अघनाशकं ॥
ॐ ह्रीं प्रवचनवात्सल्यत्वाये महार्घं ॥ पूर्णार्घं ।

अथ समुच्चय जयमाला ।

इह भवजल तारण कम्म निवारण सोलहकारण कम्महरं ।
जम्म जरामय चउगइ दुस्सय सव्व दु कम्म खयकरणं ॥
तीत्थयकरणधणु दंसण विशुद्धि, जसभावे पावे अमर रिद्धि ।
मण धरउ विणच संघाधिकार, मुणि अजय भाव वसाधिकार ॥
पुण शील रयण पालो विशाल, णव भेदभाव वर हो दयाल ।
मण धरहु जीव णाणोपयोग, जह भावे करे कम्मारि रोग ॥
णय हृदय धरउ संवेग भाव, जाणौ लगि हो अचल पमाण ।
दिज्जइ अक्खय संपत्त दाण, कीजे तिलोय मजे सुमाण ॥
तव तवो जीव बारह पयार, सब साधु समाहि भवाब्धिपार ।
मण धरहु वैयाविचि सु अंग, अरिहंत भक्त कम्मारि भंग ॥
आयार भक्ति भव दुख छेद, बहु सुयण भक्ति अणाण भेद ।
आवश्यकेन कम्मट्ठ णास, पवयण भक्ति मुत्ति णिवास ॥
जिण मग्ग पहावण धम्म धीर, पवयण पालो भव्व सुवीर ।
जे सोलहकारण पालयंत, ते माणव अविचल पद लहन्त ॥

घत्ता ।

भव दुःहछंडण मोक्खविमण्डण कम्म त्रिखण्डण गधुरीयं ।
चन्दकिचि मुनीवर पद परम धर बंभण अंगीकरीयं ॥
ॐ ह्रीं दर्शनविशुद्धयादिषोडशकारणेभ्यो पूर्णार्घं ।

त्रैलोक्ये वरदां शुद्धां जराभयविनाशिनी।
पूजां ते प्रददाम्युच्चैः शांतिधारा त्रयात्मिकां॥
इति शान्ति धारा।

त्रैलोक्योदर संभवासु त्रिसदां लक्ष्मी नयत्यातिकीं।
राज्यकोशयुतं यशः पृथुतरं सौख्यं प्रतापोल्वणं॥
छत्रचामरभूषितं च निजता ज्ञानं च सौख्यास्पद-
मेतद् षोडशकारणव्रतविधौ पूजा प्रसादाद्भवेत्॥
इत्याशीर्वादः।

श्रीमद्ब्रह्मांडभाण्डो प्रकटितसुयशः काष्ठसंघो गुणाद्रि-
स्तस्मिन् श्रीरामसेनो यतिजनविदितः पूर्वमेवाबभूवः॥
वंशेऽनेकशो हि प्रचुरगुणयुताः सूरयो विश्वविद्याः।
संजाता विश्वसेनाभिधजननमिता भावतस्तान् भजेहं॥१॥
विद्यया भूषितं सारं विद्याभूषणमुत्कटं।
तत्पटाचलभास्वंतं श्रीभूषणयतीश्वरं॥ २॥
चन्द्रकीर्तिमहामान्यं तार्किणां हि शिरोमणिं।
तत्पट्टे राजकीर्तिं च वंदे चर्चेति भक्तितः॥ ३॥
सर्वज्ञदेववदनोद्भवमक्षयं च।
नाम्ना व्रतं षोडशकारणं हि॥
तस्याष्टकर्मरिपुखण्डनवज्रतुल्यं।
श्रीज्ञानसागरमुनींद्र मनं चकार॥ ४॥
॥ अथ जाप्य १०८ दीयते॥
जाप्य मंत्र-'ॐ ह्रीं अर्हं दर्शनविशुद्धादि षोडशकारणेभ्यो नमः'
इति श्रीभूषणकृतषोडशकारण व्रतोद्यापनं।

रत्नत्रय व्रत कथा ।

श्रीमत्सन्मतिं नत्वा गौतमं च गणाधिपं ।
भक्तियुक्तः श्रेणिको राजा विनयान्नतमस्तकः ॥ १ ॥
केनेदं विहितं नाथ रत्नत्रयमिदं व्रतं ।
कीदृक्फलं च तेनाप्तं तद्वृत्तं कथय प्रभो ॥ २ ॥
अथाह गौतमस्वामि दिव्यगंभीरया गिरा ।
भव्यं पृष्टं त्वया राजन् शृणु त्वं कथयामि ते ॥ ३ ॥
जंबूवृक्षांकिते जंबूद्वीपे द्वीपेषु मध्यगे ।
लक्षयोजनविस्तीर्णे क्षेत्रं भारतसंज्ञकं ॥ ४ ॥
तस्यास्ति पूर्वदिग्भागे द्वितीयं क्षेत्रमुत्तमम् ।
नाम्ना पूर्वविदेहं स धर्मिजनैः समाकुलं ॥ ५ ॥
पुष्कलावतिप्रमुखानेकदेशसमन्वितं ।
पवित्रं क्षेत्रमत्यन्तं पुरपत्तनशोभितं ॥ ६ ॥
राजा वैश्रवणस्तत्र सम्यक्त्वालंकृतः सुधीः ।
तेनेदं च कृतं पूर्वं व्रतं रत्नत्रयाभिधं ॥ ७ ॥
तत्फलेनैव संबद्धं तीर्थंकृतकुलमुत्तमम् ।
ततः समाधिना मृत्वाहमिंद्रोऽभूतो भूपतिः ॥ ८ ॥
तस्माच्च्युत्वायुषांते सः बंगदेशे मनोहरे ।
मिथुलाक्षापुरिरम्या तस्यां कुंभाभिधो नृपः ॥ ९ ॥
राज्ञी प्रभावती दक्षा तद्गर्भे सोऽवतीर्णवान् ।
रत्नत्रयप्रभावेन मल्लिनाथो जिनेश्वरः ॥ १० ॥
स जातः कर्मनियोगः पंचकल्याणनायकः ।

इति मत्वा बुधैः कार्यं रत्नत्रयमिदं व्रतं ॥ ११ ॥
तस्य पूजा विधिर्वक्ष्येऽर्हन्नामाष्टसहस्रकं ।
पठित्वा देहशुद्ध्यर्थं सकलीकरणं पठेत् ॥ १२ ॥
पूजयेत् प्रथमं देवं सिद्धादिपंचनायकान् ।
वेदिमण्डपयो शोभां कृत्वा पूजां तयोर्मुदा ॥ १३ ॥
गुर्वाज्ञां च समादाय स्वस्तिकेनास्य भक्तितः ।
रत्नत्रयस्य यद्भित्रं चतुर्विंशतिसंयुतं ॥ १४ ॥
तदग्रे विधिना स्थाप्यं सम्यक् यंत्रत्रयं शुभं ।
संस्नाप्य विधिना तत्र वृत्तानामर्चयेत्पुनः ॥ १५ ॥
स्वस्तिकं सुन्दरं कृत्वा त्रिनवतिसुकोष्ठकैः ।
तद्व्रतोद्यापनं कुर्यात भक्त्या शक्त्या शिवं पदं ॥ १६ ॥
नित्वाज्ञां प्रथमं गुरोरपि ततः पूजां समारभ्यते ।
तत्रादौ च सहस्रनामसकलीकरणं त्रिशुद्धया पठेत ॥
पश्चात श्रीजिनदेवसिद्धकलिकुण्डादिश्रुतार्चा गुरोः ।
कृत्वानुक्रमतोऽर्चनं च विधिना दृग्बोधवृत्तं यजेत् ॥ १७ ॥
अस्योद्यापन सद्विधौ च मण्डपादि स्वस्तिकस्यार्चनं ।
कर्तव्यं स्नपनं पठेत्सुविधिना पंचामृतैर्भक्तितः ॥
कार्या च ध्वजसंघ पूजकरणं ताबूलदानादिकं ।
कुर्यात्रांकुहरोपणादिविविधैर्वाद्यैश्च सन्तोरणैः ॥ १८ ॥
आहाराभयभैषजं च मुनये सच्छास्त्रदानं तथा ।
पात्रेभ्यो विनयाच्चतुर्विधमिदं दानं प्रदेयं बुधैः ॥
नृत्याशावरगीतमंगलरवैः कार्यं व्रतोद्यापनं ।
इत्युद्यापनसद्विधिश्च गणिनोक्तश्रेणिकाग्रे पुरा ॥ १९ ॥

अथ रत्नत्रय उद्यापन ।

अथातः संप्रविक्ष्यामि नेषां सद्गुणपूजनं ।
कर्णिका मध्यभागे च पूजयेत् द्रव्यसत्तमैः ॥

ॐ ह्रीं सम्यक्रत्नत्रयधर्मपूजनाय स्वस्तिकोपरि पुष्पांजलिं क्षिपेत् ।

आह्वाननस्थापनसन्निधानैः संस्थापयाम्यत्र सबीजवर्णैः ।
सद्दर्शनस्यापि सुयंत्रराजं रौप्यं तथा हेममयं च ताम्रं ॥

ॐ ह्रीं अष्टांग सम्यग्दर्शन अत्रावतरावतर संवौषट् । स्थापनं ॥ सन्निधि करणं ॥

गंगादितीर्थभवजीवनधारया च ।
संवर्द्धिताखिलसुमंगलपुण्यवल्लिः ॥
सम्पूजयामि भवतापहरं स्वनर्घं ।
सद्दर्शनं परमधर्मतरोश्च मूलं ॥

ह्रीं ॐ सम्यक्दर्शनाय जलं० ॥

श्रीचंदनैः कनकवर्णसुकुंकुमाद्यैः ।
कृष्णागुरुद्रवयुतैर्घनसारमिश्रैः ॥ संपूजयामि० ॥

ॐ अष्टांगविधसम्यक्दर्शनाय चंदनं० ॥

शुभ्रैः सुगंधकलमाक्षतचारुपुंजैः ।
हीरोज्वलैः सुखकरैरिवचंद्रचूर्णैः ॥ संपूजयामि० ॥

ॐ ह्रीं अष्टांग० अक्षतं० ॥

हेमाभचंपकवरांबुजकेतकीभिः ।

सत्पारिजातकचयैर्बकुलादिपुष्पैः ॥ संपूजयामि० ॥

ॐ ह्रीं अष्टांग० पुष्पम् ॥

पट्भिःरसैश्चचरुभिर्घृतपूरयुक्तैः ।

शुद्धैः सुधामधुरमोदकपायसान्नैः ॥ संपूजयामि० ॥

ॐ ह्रीं अष्टांग० नैवेद्यं० ॥

रत्नादिसोमघृतदीपनरैरिवार्कैः ।

ध्वांतहेतुभिरनंतप्रकाशकारैः ॥ संपूजयामि० ॥

ॐ ह्रीं अष्टांग० दीपं० ॥

कृष्णागुरुप्रमुखचूर्णभवैः सुधूपैः ।

कर्मेंधनाग्निभिरहानिसुशोभनीतैः ॥ संपूजयामि० ॥

ॐ ह्रीं अष्टांग० धूपं० ॥

स्वर्गापवर्गफलदैर्वरपक्वसारैः ।

नारिंगलिंबुकदलीफलसाम्रकैर्वा ॥ संपूजयामि० ॥

ॐ ह्रीं अष्टांग० फलम्० ॥

पूजाविशेषकृतमर्घमतीव भक्त्या मोत्तारयामि भवसागरसेतुकल्पं ।
सम्यक्त्ववरत्नमपि भव्यसहायरूपं शंकादिदोषरहितं शुभधर्मबीजं ॥

ॐ ह्रीं अष्टांग० अर्घ्यं० ॥

अथ प्रत्येक पूजा ।

क्षयादुपशमान्मिश्रात् सम्यक्त्वं त्रिविधं मतं ।
निसर्गाधिगमाच्चेत तत्वं श्रद्धानमुत्तमं ॥
ॐ ह्रीं स्वस्तिकोपरिपुष्पांजलि क्षिपेत् ॥

कर्मोपशमतः सम्यक्‌दर्शनं कर्मछेदकं ।
नाम्नोपशममित्याहुर्यजे नीरादिभिर्वरैः ॥
ॐ ह्रीं उपशमसम्यक्त्वरत्नत्रयाय जलादिकं ॥ १ ॥

क्रोधमानादिसप्तानां क्षयोपशमतो भवेत ।
वेदकं दर्शनं रम्यं यजे नीरादिभिर्वरैः ॥
ॐ ह्रीं वेदकसम्यक्‌रत्नत्रयाय जलादिकं ॥ २ ॥

सप्तकर्मक्षयाज्जातमुत्तमं क्षायकं परं ।
मुक्तिहेतुशुभं नित्यं यजे नीरादिभिर्वरैः ॥
ॐ ह्रीं क्षायकसम्यक्त्वरत्नत्रयाय जलादिकं ॥ ३ ॥

शुद्ध यन्निश्चयं ज्ञयं निःकर्म्मात्मगुणं स्थिरं ।
निर्वातं च यथा नीरं यजे तत् दृष्टिरत्नकं ॥
ॐ ह्रीं सिद्धगुणनिश्चयसम्यक्त्वरत्नत्रयाय जलादिकं ॥ ४ ॥

जैनागमे सूक्ष्मविचारशंका, नोदेति यत्रैव पवित्ररूपे ।
तोयादिभिः शंकितदोषहीन, तत् दृष्टिरत्नं परिपूजयामि ॥
ॐ ह्रीं निःशंकितसम्यक्त्वरत्नत्रयाय जलादिकं ॥ ५ ॥

कृत्वा तपोदानसुसंयमानि, सौख्याभिकांक्षां न करोति यत्र ।
निकांक्षिताख्यं सुगुणं जलाद्यैस्तत् दृष्टिरत्नं परिपूजयामि ॥
ॐ ह्रीं निःकांक्षितांगाय सम्यक्त्वरत्नत्रयाय जलादिकं ॥ ६ ॥

संक्लिष्टदेहादिकसाधुवृंदं दृष्ट्वा तदास्यं प्रवदंति चांगे ।
तस्मिन् जुगुप्सा न करोति भव्यः तत्र दृष्टि० ॥

ॐ ह्रीं जुगुप्सितांगाय सम्यक्त्वरत्नत्रयाय जलादिकं ॥ ७ ॥

मौढ्यत्रयाद्दूर तरंगदंगं चामूढताख्यं प्रवदन्ति तज्ज्ञाः ।
शुद्धात्मकंमुक्तिकरं जलाद्यैस्तत्र दृष्टि० ॥

ॐ ह्रीं अमूढतासम्यक्त्वरत्नत्रयाय जलादिकं ॥ ८ ॥

आच्छादनं यत्र गुरुधर्मतीर्थे दोषे कदाचित् क्रियते कुभावात् ।
आहुश्च सोपादिकगूहनाख्यं तत्र दृष्टि० ॥

ॐ ह्रीं उपगूहनाय सम्यक्त्वरत्नत्रयाय जलादिकं ॥ ९ ॥

पुण्यादिवर्गे चलिते सुधर्मात् स्थिरं तनोति विधिना प्रबोधात् ।
तोयादिभिः सुस्थितिकारनाम तत्र दृष्टिरत्नं परिपूजयामि ॥

ॐ ह्रीं स्थितिकरणाय सम्यक्त्वरत्नत्रयाय जलादिकं ॥ १० ॥

आप्तोक्तधर्मव्रतपालकेषु वात्सल्यभावात् विदधाति सेवां ।
अंगं तदाख्यं सुखदं जलाद्यैस्तत्र दृष्टि० ॥

ॐ ह्रीं वात्सल्यांगाय सम्यक्त्वरत्नत्रयाय जलादिकं ॥ ११ ॥

जैनोक्तमार्गस्य तनोति भव्य प्रोत्साहतां दानविद्यादिशक्त्या ।
धर्मार्थमंगं तदहं जलाद्यैस्तत्र दृष्टि० ॥

ॐ ह्रीं प्रभावनांगाय सम्यक्त्वरत्नत्रयाय जलादिकं ॥ १२ ॥

पूजाविशेषैर्वसुद्रव्यमानैर्यंत्रैः सुमंत्रैः खलु दृष्टिसिद्ध्यैः ।
चोत्तारयाम्यर्घमिदं जलाद्यैर्वादित्रनादैः व्यवहाररूपैः ॥

ॐ ह्रीं अष्टांगविधसम्यक्दर्शनाय महार्घं ॥

अथ दर्शन जयमाला ।

जय जय सद्दर्शन कुमत विखंडन मिथ्यामोह निवारण ।
बुध कमल दिवाकर परम गुणाकर मुक्तिवधू सुखं करण ॥
जय वर निःशंकित गुण विशाल, परहित निखिल शंकादि जाल ।
जय पर निःकांक्षित भोग दूर, शिवगति सुखकारण कुमुदसूर ॥
जय निर्विचिकित्सा गुण गरिष्ट, निर्नाशित विचिकित्सादि कष्ट ।
जय निहित सकल मूढत्व भाव, जय भवनिधि भव्य समूह नाव ॥
जय उपगूहन वर निहित दोष, परिकृत मुनिजन बहु हृदय तोष ।
जय वृष पतनादि निवार धीर, दूरीकृत भव भय दोष धीर ॥
जय वत्सलत्व बहुगुण निधान, परिकल्पित सुरनर अखिल मान ।
जय जिनशासन विख्यातकार, विधि गुण संसार समुद्रतार ॥
जय जिनवर गणधर गुण करंड, संकृत मिथ्यासुख पाप दंड ।
जय सुरनरपति पद जन मूल, मिथ्यातम मोहित हृदयशूल ॥
इति दृगगुण संस्तुति ममला महामति ।रह यः पठति परमभक्त्या ।
रत्नत्रयं समं यातिरखिलभुवनपतिरात्मपाणिगतकृतमुक्तिः ॥

सम्यक् पदांकितसुदर्शनमादिधर्मः ।
स्वर्गापवर्गफलदं गुणरत्नपात्रं ॥
सायुर्धनं शुभगमित्रकलत्रपुत्रं ।
देयाद्विमो भुवि सुदर्शन रत्नमर्च्यं ॥

॥ इत्याशीर्वादः ॥

अथ ज्ञान पूजा।

आह्वानसंस्थापनसंनिधापनैः संस्थाप्य चाम्यत्र स बीजवर्णैः।
सद्‌ज्ञानरत्नस्य सु यंत्रमंत्रे रौप्येपदे हेममये च ताम्रे ॥

ॐ ह्रीं सम्यग्ज्ञान अत्रावतरावतर संवौषट्। स्थापनं। सन्निधिकरणं ॥

गंगादितीर्थभवजीवनधारया च।
शीत स्थूलया सदयधर्मसुवृक्षवृद्ध्यै: ॥
स्वात्मस्थशुद्धमपरं व्यवहाररूपं।
सद्बोधरत्नममलं परिपूजयामि ॥

ॐ ह्रीं सम्यग्ज्ञानाय जलं० ॥

श्रीचन्दनैः कनकवर्णसुकुंकुमाद्यैः।
कृष्णागुरुद्रवयुतैर्घनसारमिश्रैः ॥ स्वात्मस्थ० ॥

ॐ ह्रीं सम्यग्ज्ञानाय चंदनं० ॥

स्थूलैः सुगन्धकमलाक्षतचारुपुंजैः।
हीरोज्वलैः शुभतरैरिव पुण्यपुंजैः ॥ स्वात्मस्थ० ॥

ॐ ह्रीं सम्यग्ज्ञानाय अक्षतं० ॥

हेमाभचंपकवरांबुजकेतकीभिः।
सत्पारिजातकचयैर्बकुलादिपुष्पैः ॥ स्वात्मस्थ० ॥

ॐ ह्रीं सम्यग्ज्ञानाय पुष्पं० ॥

शाल्योदनैः सुखकरैर्घृतपूरयुक्तैः।
शुद्धैः सुधामधुरमोदकपायसाद्यैः ॥ स्वात्मस्थ० ॥

ॐ ह्रीं सम्यग्ज्ञानाय नैवेद्यं० ॥

रत्नादिसोमघृतदीपचयैरघघ्नैः ।
ज्ञानैकहेतुभिरलं महतांधकारैः ॥ स्वात्मस्थ० ॥
ॐ ह्रीं सम्यग्ज्ञानाय दीपं० ॥

कृष्णागुरुप्रमुखधूपभरैः सुगन्धैः
कर्मेंधनाग्निभिरहो विबुधोपनीतैः ॥ स्वात्मस्थ० ॥
ॐ ह्रीं सम्यग्ज्ञानाय धूपं० ॥

स्वर्गापवर्गसुखदैर्वरपकवासै-
र्नारिंगलिंबुकदलीफनसाम्रकैर्वा ॥ स्वात्मस्थ० ॥
ॐ ह्रीं सम्यग्ज्ञानाय फलं० ॥

वार्गंधशालिजसुपुष्पचयैर्मनोज्ञै-
र्नैवेद्यदीपवरधूपफलादिभिर्वा ॥
एतैः कृतार्थमिह बोधमये सुयंत्रे ।
प्रोच्चारयामि सह वाद्यसुगीतघोषैः ॥
ॐ ह्रीं सम्यग्ज्ञानाय अर्घं० ॥

अथ प्रत्येक पूजा ।

अवग्रहादिभिर्जातं षट्त्रिंशत्रिशतात्मकम् ।
मतिज्ञानं महद्ज्ञानं यजे तोयादिभिर्मुदा ॥
ॐ ह्रीं सम्यक्मतिज्ञानाय जलादिकं ॥ १ ॥

सर्वार्थावित् क्रियते शास्त्रं द्व्यनेकद्वादशात्मकं ।
मतिपूर्वं श्रुतं ज्ञानं यजे सर्वज्ञवत् श्रुतं ॥
ॐ ह्रीं सम्यक्श्रुतज्ञानायजलादिकं ॥ २ ॥

आचारो वर्ण्यते यत्र चारित्रं मोक्षसाधकं ।
गम्भीरार्थं तदंगं तत् यजे तोयादिभिः श्रुतं ॥

ॐ ह्रीं सम्यक् आचारांगाय जलादिकं ॥ ३ ॥

सूत्रकृतांगनामा यः सहस्रषट्त्रिंशद् पदं ।
द्वितीयांगं जिनेन्द्रोक्तं, यजे० ॥

ॐ ह्रीं सूत्रकृतांगाय जलादिकं ॥ ४ ॥

स्थानानि तत्वजीवानां कथ्यंते यत्र नश्चकैः ।
भव्यार्थानि तदंगं च, यजे० ॥

ॐ ह्रीं स्थानांगाय जलादिकं ॥ ५ ॥

द्रव्यादीनां च सादृश्यं, कथ्यते समवायसः ।
परस्परैस्तदंगं च, यजे० ॥

ॐ ह्रीं समवायांगाय जलादिकं ॥ ६ ॥

प्रश्नषष्टिसहस्राणि व्याख्याप्रज्ञप्तिकेयतः ।
प्रोच्यंते तैस्तदंगं च, यजे० ॥

ॐ ह्रीं व्याख्याप्रज्ञप्त्यांगाय जलादिकं ॥ ७ ॥

ज्ञातृधर्मकथांगं तत् यत्र धर्मकथा भवेत् ।
गंभीरार्था तदंगं च, यजे० ॥

ॐ ह्रीं ज्ञातृधर्मकथांगाय जलादिकं ॥ ८ ॥

श्रावकाचारसद्बोधोपासकाध्ययनं यतः ।
नाम्ना तदंगकं रम्यं, यजे० ॥

ॐ ह्रीं उपासकाध्ययनांगाय जलादिकं ॥ ९ ॥

दशमांतकृतो यत्र वर्ण्यते प्रतितीर्थकं ।
तन्नामाहि तदंगं च, यजे० ॥
ॐ ह्रीं अंतकृद्दशांगाय जलादिकं ॥ १० ॥

प्रति तीर्थं दशोत्पत्ति प्रोच्यते विजयादिषु ।
तदौपपादिकं चांगं, यजे० ॥
ॐ ह्रीं उपपादिकनामांगाय जलादिकं ॥ ११ ॥

प्रश्नानुसारतः यत्र वाच्यायं ते कथा शुभाः ।
प्रश्नव्याकरणं नाम, यजे० ॥
ॐ ह्रीं प्रश्नव्याकरणांगाय जलादिकं ॥ १२ ॥

नाना कर्मोदयं यत्र वर्ण्यते तीर्थचक्रिणां ।
विपाकसूत्रनामांगं, यजे तोयादिभिः श्रुतं ॥
ॐ ह्रीं विपाकसूत्रांगाय जलादिकं ॥ १३ ॥

दृष्टिवादांगसम्भूतं श्रीप्रथमानुयोगकं ।
पुराणरचना यत्र यजे तोयादिभिः श्रुतं ॥
ॐ ह्रीं प्रथमानुयोगाय जलादिकं ॥ १४ ॥

दृष्टिवादे गतं सूत्रं सूत्रसिद्धांतसंज्ञिकं ।
नानाप्रमेयवाराशिं, यजे० ॥
ॐ ह्रीं सूत्रसिद्धांताय जलादिकं ॥ १५ ॥

चन्द्रप्रज्ञप्तिकं नाम श्रुतज्ञानं जिनोदितं ।
वर्णनं तत्र चन्द्रस्य, यजे० ॥
ॐ ह्रीं चन्द्रप्रज्ञप्त्यै जलादिकं ॥ १६ ॥

सूर्यप्रज्ञप्तिस्थज्ञानं सूर्यादिग्रहणादिकं ।
कथ्यते यत्र सर्वज्ञैः, यजे० ॥
ॐ ह्रीं सूर्यप्रज्ञप्त्यै जलादिकं ॥ १७ ॥

जम्बूद्वीपकुलाद्रीणां वर्णनं कथिता यतः ।
तत्प्रज्ञप्ति श्रुतं पुण्यं, यजे० ॥
ॐ ह्रीं जंबुद्विपप्रज्ञप्त्यै जलादिकं ॥ १८ ॥

द्वीपसागरचैत्यानां वर्णनं यत्र कथ्यते ।
तत्प्रज्ञप्तक भव्यार्थे, यजे० ॥
ॐ ह्रीं द्विपसागरप्रज्ञप्त्यै जलादिकं० ॥ १९ ॥

व्याख्याप्रज्ञप्तिकाख्यं यत जीवाजीवादिवर्णनं
क्रियते यत्र तद्बोधं, यजे० ॥
ॐ ह्रीं व्याख्याप्रज्ञप्तिश्रुताय जलादिकं ॥ २० ॥

जलादिस्तभनं यत्र चोक्तं मंत्रादिभैषजैः ।
जलादिचूलिकाख्यं तत, यजे० ॥
ॐ ह्रीं जलगतचूलिकाये जलादिकं ॥ २१ ॥

स्थलादिचूलिकाख्यं तत मेरुकुलाद्रिभूभृतां ।
व्याख्यानं क्रियते यत्र, यजे० ॥
ॐ ह्रीं स्थलगतचूलिकायै जलादिकं ॥ २२ ॥

मायादिचूलिकाख्यं तत, मायारूपेंद्रजालकां ।
कथ्यते यत्र सर्वज्ञैर्यजे० ॥
ॐ ह्रीं मायागतचूलिकाये जलादिकं ॥ २३ ॥

आकाशचूलिकां वंदे खे गत्यादिकवर्णनं ।
यत्र भवेत्प्रबोधं तत्, यजे० ॥
ॐ ह्रीं आकाशगतचूलिकायै जलादिकं ॥ २४ ॥

रूपादिचूलिकामात्रं चित्रकर्मादिवर्णनं ।
गजादीनां च तज्ज्ञानं, यजे० ॥
ॐ ह्रीं रूपगतचूलिकायै जलादिकं ॥ २५ ॥

उत्पादपूर्वमाद्यं स्यात् द्रव्योत्पादादि र्णनं ।
यत्रैतत्पूर्व्वमहं वन्दे, यजे तोयादिभिः श्रुतं ॥
ॐ ह्रीं उत्पादपूर्वश्रुतज्ञानाय जलादिकं ॥ २६ ॥

अग्रायणीयपूर्वं तत्, यत्र मोक्षप्रकाशनं ।
मुख्यत्वं सर्वशास्त्रेषु, यजे० ॥
ॐ ह्रीं अग्रायणीयपूर्वश्रुताय जलादिकं ॥ २७ ॥

यत्र वीर्यानुवादाख्यमात्मनः शक्तिवर्णनं ।
एतत्पूर्वमहं वन्दे, यजे० ॥
ॐ ह्रीं वीर्यानुवादपूर्वश्रुताय जलादिकं ॥ २८ ॥

अस्ति नास्ति प्रवादं तत् यत्र स्याद्वादलक्षणं
एतत्पूर्वमहं वन्दे, यजे० ॥
ॐ ह्रीं अस्तिनास्तिप्रवादपूर्वाय जलादिकं ॥ २९ ॥

ज्ञानप्रवादपूर्वं च वन्दे ज्ञानादिदेशकं ।
ज्ञानप्रमाणसिद्ध्यर्थं, यजे० ॥
ॐ ह्रीं ज्ञानप्रवादपूर्वाय जलादिकं ॥ ३० ॥

सत्यप्रवादसंज्ञं यत् सत्यादिभेदवाचकं ।
एतत्पूर्वं नमस्यामि, यजे० ॥

ॐ ह्रीं सत्यप्रवादपूर्वाय जलादिकं ॥ ३१ ॥

आत्मप्ररूपणं यत्र वन्दे तां भारतीं परं ।
आत्मप्रवादपूर्वाख्यं, यजे० ॥

ॐ ह्रीं आत्मप्रवादपूर्वाय जलादिकं ॥ ३२ ॥

कर्मप्रवादपूर्वं स्यात् यत्र कर्मादिवर्णनं ।
शब्दार्थकं च नानार्थं यजे० ॥

ॐ ह्रीं कर्मप्रवादपूर्वाय जलादिकं ॥ ३३ ॥

प्रत्याख्यानं च तत्पूर्वं यत्र सावद्यवर्जनं ।
वदेऽहं तद्भवं ज्ञानं, यजे० ॥

ॐ ह्रीं प्रत्याख्यानपूर्वाय जलादिकं ॥ ३४ ॥

यत्र मंत्रगमः प्रायो विद्यौषध्यादिवर्णनं ।
विद्यानुवादपूर्वं तत्, यजे० ॥

ॐ ह्रीं विद्यानुवादपूर्वाय जलादिकं ॥ ३५ ॥

कल्याणवादपूर्वं तत् यत्र कल्याणवर्णनं ।
तीर्थंकरादिचक्रिणीं, यजे तोयादिभिः श्रुतं ॥

ॐ ह्रीं कल्याणवादपूर्वाय जलादिकं ॥ ३६ ॥

प्राणवादमिदं पूर्वं चिकित्सादिप्ररूपणं ।
वंदे धर्मफलं यत्र, यजे० ॥

ॐ ह्रीं प्राणानुवादपूर्वाय जलादिकं ॥ ३७ ॥

नृत्यगद्यक्रियागीतं प्रोक्तं च यत्र पावनं ।
क्रियाविशालपूर्वं तत् यजे० ॥

ॐ ह्रीं क्रियाविशालपूर्वाय जलादिकं ॥ ३८ ॥

त्रैलोक्यरचना यत्र प्रोक्ता श्रीजिननायकैः ।
त्रैलोक्यबिन्दुं सारं तत्, यजे० ॥
ॐ ह्रीं त्रैलोक्यबिन्दुसारपूर्वाय जलादिकं ॥ ३९ ॥

अंगबाह्यं श्रुतं वंदे यत्करोत्यघनिर्जरां ।
चतुर्दशविधं तच्च यजे० ॥
ॐ ह्रीं अंगबाह्यचतुर्दशविधश्रुताय जलादिकं ॥ ४० ।

वर्णानं व्यंजनानां च, श्रुतज्ञानं सुलक्षणं ।
स्फुरदर्थं जलाद्यैश्च, तदंगं पूजयाम्यहं ॥
ॐ ह्रीं व्यंजनोर्जिताय जलादिकं ॥ ४१ ॥

अर्थैर्यत्र समग्रं च हीनाधिकार्थवर्जितं ।
विशदार्थं जलाद्यैश्च तदंगं पूजयाम्यहं ॥
ॐ ह्रीं अर्थसमग्राय जलादिकं ॥ ४२ ॥

शब्दार्थैः सुपूर्णांगं, शब्दार्थो भयसंज्ञकं ।
निर्दोषार्थं जलाद्यैश्च, तदंगं० ॥
ॐ ह्रीं शब्दार्थोभयपूर्णाय जलादिकं ॥ ४३ ॥

अकाले पठनं प्रोक्तं सुकालेऽध्ययने मतं ।
तत्कालाध्ययनं ज्ञेयं, तदंगं० ॥
ॐ ह्रीं कालोऽध्ययनोपप्रभावाय जलादिकं ॥ ४४ ॥

उपाधानसमृद्धांगं नियमादि भवं यतः ।
विनयं देवतादीनां, तदंगं० ॥
ॐ ह्रीं उपधानसमृद्धांगाय जलादिकं ॥ ४५ ॥

विनयोन्मुद्रितांगं स्यादधिकविनयादिभिः ।
जलाद्यष्टविधैर्द्रव्यैः, स्तदंग० ॥
ॐ ह्रीं विनयोन्मुद्रितांगाय जलादिकं ॥ ४६ ॥
सम्यग्ज्ञानं च गुर्वाद्यनपह्नं च समेधितं ।
यत्पवित्र जलाद्यैश्च, तदंग० ॥
ॐ ह्रीं गुर्वाद्यनपह्नसमेधितांगाय जलादिकं ॥ ४७ ॥
बहुमानसमृद्धाख्यां मानपूजादिपूर्वकं ।
प्रोक्तं जिनैः जलाद्यैश्च, तदंग० ॥
ॐ ह्रीं बहुमानसमृद्धांगाय जलादिकं ॥ ४८ ॥
पूजाविशेषैर्जनितं महार्घं पंचात्मरूपे वरबोधमूर्ये ।
प्रोत्तारयाम्यत्र महोत्सवे वाद्यप्रघोषैर्वरमंगलाय ॥
ॐ ह्रीं सम्यग्ज्ञानाय महार्घं ।

अथ जयमाला ।

स्वर्मोक्षैकनिबंधनं भवहरं चाज्ञानविध्वंसकं ।
मिथ्यामोहतपोपहं निरूपमं तीर्थेश्वराद्धुद्भवं ॥
लोकालोकपदार्थदीपममलं योगीश्वरैरादृतं ।
ज्ञानं ज्ञानधनाय नौमि वसुधा चारान्वितं संस्तुवे ॥

× × × ×

ये पठंति विमलाक्षरसारं, ते प्रयांति सकलागमपारं ।
पूजयंति परमार्थसमग्रं, ते सजंति संसृतिघनदुर्गं ॥
ये पठंति शब्दार्थमनेकं, ते तरंति विद्यार्णवमेकं ।
ये पठंति काले श्रुतपाठं, लंघयंति ते मिथ्याघाटं ॥

ये कुर्वंत्युपधानसमृद्धिं, ते भजंति सर्वातिमहर्द्धि ।
अर्चयंति ये विनयाचारं, ते गच्छंति शिवालयसारं ॥
ये स्तुवंति विद्यागुरुपूज्यं, ते भजंति तीर्थेश्वरराज्यं ।
ये यजंति शास्त्रे बहुमानं, ते पिबंति सिद्धांतसुपानं ॥
ज्ञानं कृत्स्नेंद्रिय मृगपाशं, ज्ञानं महा मोहविष नाशं ।
निस्संदेहं शिवसुखमूलं, अनंतं पापारि विदूरं ॥
अष्टभेदमाचारविशुद्धं, ये पठंति जैनागमशुद्धं ।
येऽर्चयंति भक्त्याखिलभुक्तिं, ते व्रजंति भुक्त्वाखिलमुक्तिं ॥

घत्ता ।

अमपगुणनिधानं चित्तमातंगसिंहं ।
विषयभुजंगमन्त्रं कर्मशत्रुघ्नमेव ॥
नरसुरपतिमान्यं विश्वसिद्धान्तसारं ।
वसुविधियजनाद्यैश्चार्चयेऽर्घेण मुक्त्यै ॥

ॐ ह्रीं सम्यग्ज्ञानाय जयमाला पूर्णार्घं ।

यः सर्वथैकांतनयांधकारं, ध्वंसत्यवश्यं नयरश्मिजालैः ।
विश्वं प्रकाशं विदधातु नित्यं, पायादनेकांतरविः स युष्मान् ।

इत्याशीर्वादः ।

ज्ञानं पंचविधं सुधारसमयं सौख्याकरं दीपवत् ।
प्रत्यक्षादिपरोक्षभेदममलं स्वान्यप्रकाशात्मकं ॥
धर्माद्येन सुभूषणेन रचितः सद्बोधकल्पद्रुमः ।
कुर्यात् यत्ररमादिभोगसकलं ध्यानं बलं सूरिणां ॥

इत्याशीर्वादः । पुष्पांजलिं ।

अथ चारित्र पूजा ।

सद्वृत्तं सर्वसावद्यं योगव्यावृत्तिरात्मनः ।
गौणं स्याद्वृत्तिरानन्दः ज्ञेयं चारित्रभूषणं ॥१॥
अहिंसादीनि पंचैव समितिं पंचकं तथा ।
गुप्तित्रयं च यत्रस्यादेतच्चारित्ररत्नकं ॥ २ ॥

इति यंत्रस्योपरि पुष्पांजलिं क्षिपेत् ।

आह्वाननस्थापनसन्निधानैः,
संस्थापयाम्यत्र स बीजवर्णैः ।
चारित्ररत्नत्रययंत्रमंत्रं,
रौप्यं तथा हेममयं च ताम्रं ॥

ॐ ह्रीं त्रयोदशविधसम्यक्चारित्र अत्रावतरावतर संवौषट् । स्थापनं । सन्निधिकरणं ।

गंगादितीर्थभवजीवनधारया च,
सत्सारया सुखदपुण्यसुवल्लिवृद्ध्यै ।
स्वात्मस्थशुद्धमपरं व्यवहाररूपं,
चारित्ररत्नममलं परिपूजयामि ॥

ॐ ह्रीं त्रयोदशविधसम्यक्चारित्राय जलं० ॥

श्रीचन्दनैर्विशदकुम्कुमहेमवर्णैः,
कृष्णागुरुद्रवयुतैर्घनसारमिश्रैः । स्वात्मस्थ० ॥

ॐ ह्रीं त्रयोदशविध० चन्दनं० ॥

स्थूलैः सुगन्धकलमाक्षतचारुपुंजैः,

हीरोज्वलैः सुखकरैरिव चन्द्रचूर्णैः। स्वात्मस्थ० ॥

ॐ ह्रीं त्रयोदशविध० अक्षतं ॥

हेमाभचम्पकवरांबुजकेतकीभिः,

सत्पारिजातकचयैर्बकुलादिपुष्पैः। स्वात्मस्थ० ॥

ॐ ह्रीं त्रयोदशविध० पुष्पं० ॥

शाल्योदनैः शुभतरैर्घृतपूरयुक्तैः,

शुद्धैः सुधामधुरमोदकपायसान्नैः। स्वात्मस्थ० ॥

ॐ ह्रीं त्रयोदशविध० नैवेद्यं० ॥

रत्नादिसोमघृतदीपचयैरनर्घैः,

ज्ञानैकहेतुभिरलं महतांधकारैः। स्वात्मस्थ० ॥

ॐ ह्रीं त्रयोदशविध० दीपं० ॥

कृष्णागुरु प्रमुखधूपभरैः सुगन्धैः,

कर्माष्टकाग्निभिरहो विबुधोपनीतैः। स्वात्मस्थ० ॥

ॐ ह्रीं त्रयोदशविध० धूपं० ॥

स्वर्गापवर्गफलदैर्वरपक्ववासै-

र्नारिंगलिम्बुकदलीफनसाम्रकैर्वा। स्वात्मस्थ० ॥

ॐ ह्रीं त्रयोदशविध० फलम्० ॥

वार्गंधशालिजसुपुष्पचयैर्मनोज्ञै नैवेद्यदीपवरधूपफलादिभिर्वा।

एतैः कृतार्थमिहसंयममंत्ररूपे चोच्चारयामि वरवाद्य सुगीतघोषैः॥

ॐ ह्रीं त्रयोदशविधसम्यक्चारित्राय अर्घं ॥

अथ प्रत्येक पूजा।

मनसापि न कर्तव्या हिंसा दुर्गतिकारणं।
तद्व्रतं च जलाद्यैश्च यजे चारित्ररत्नकं॥

ॐ ह्रीं मनोविशुद्धयाकृतहिंसाविरतिसम्यक्त्वचारित्राय जलादिकं॥

वचनेनापि कर्तव्यं हिंसाकर्मनिवारणं॥ तद्व्रतं च०॥

ॐ ह्रीं मनोविशुद्धयाकृतहिंसाविरतिमहाव्रताय जलादिकं॥ २॥

कायेन सर्वसावद्यं त्याज्यं निर्ग्रंथनायकैः। तद्व्रतं०॥

ॐ ह्रीं कायविशुद्धयाकृतहिंसाविरतिमहाव्रताय जलादिकं॥३॥

मनसापि न कर्तव्यं मऽनोसत्यं कर्पनिष्ठुर। तद्व्रत०॥

ॐ ह्रीं मनोविशुद्धयाकृतासत्यविरतिमहाव्रताय जलादिकं॥ ४॥

वचनेन हितं सत्यं वाच्यं जीवसुखाकरं। तद्व्रतं०॥

ॐ ह्रीं प्रवचनविशुद्धयाकृतासत्यविरतिमहाव्रताय जलादिकं॥५॥

कायेनापि न कर्तव्यमसत्ये प्रेरणादिकं। तद्व्रतं०॥

ॐ ह्रीं कायविशुद्धयाकृतासत्यविरतिमहाव्रताय जलादिकं॥६॥

स्तेयं हेयं दुराचारं मनसापि मुनीश्वरैः। तद्व्रतं०॥

ॐ ह्रीं मनोविशुद्धयाकृतस्तेयविरतिमहाव्रताय जलादिकं॥ ७॥

वचनेऽपि च तत् त्याज्यं स्तेयं हिंसाकरं यतः। तद्व्रतं०॥

ॐ ह्रीं वचनविशुद्धयाकृतस्येयविरतिमहाव्रताय जलादिकं॥ ८॥

कायेनापि न कर्तव्यं स्तेयं स्वपरनाशकृत्॥ तद्व्रतं०॥

ॐ ह्रीं कायविशुद्धयाकृतस्तेयविरतिमहाव्रताय जलादिकं॥ ९॥

मनसापि न चिंतव्यं कुशीलं दुःखदायकं॥ तद्व्रतं०॥

ॐ ह्रीं मनोविशुद्धयाकृतब्रह्मचर्यमहाव्रताय जलादिकं॥ १०॥

ब्रह्म [illegible]रोवाग्भिस्त्रीवार्ता सकलां त्यजेत् ॥ तद्व्रतं० ॥

ॐ ह्रीं वचनविशुद्धयाकृतब्रह्मचर्यमहाव्रताय जलादिकं ॥ ११ ॥

कायेन रक्षितं शीलं प्राप्तं तेन शिवालयं ॥ तद्व्रतं० ॥

ॐ ह्रीं कायविशुद्धयाकृतब्रह्मचर्यमहाव्रताय जलादिकं ॥ १२ ॥

परिग्रहः परीहेयः मनसापि मुमुक्षुभिः ॥ तद्व्रतं० ॥

ॐ ह्रीं मनोविशुद्धयाकृतपरिग्रहविरतिमहाव्रताय जलादिकं ॥ १३ ॥

परिग्रह सदा त्याज्यः वचसा पापकारणं ॥ तद्व्रतं० ॥

ॐ ह्रीं वचनविशुद्धयाकृतपरिग्रहविरतिमहाव्रताय जलादिकं ॥ १४ ॥

साधुर्याति शिवं यस्मात् कायत्यक्तपरिग्रहः । तद्व्रतं० ॥

ॐ ह्रीं कायविशुद्धयाकृतपरिग्रहविरतिमहाव्रताय जलादिकं० ॥ १५ ॥

मनसान्वेषणम् कृत्वा गच्छंति साधवो यतः ।
इर्यासमितिसंज्ञं तत् यजे चारित्ररत्नकं ॥

ॐ ह्रीं मनसाकृतैर्यासमितिमहाव्रताय जलादिकं० ॥ १६ ॥

वाग्भिर्दर्शितो मार्गो निरवद्यस्तपोभृतेः ।
इर्यासमितिसंज्ञं तत् यजे चारित्ररत्नकं ॥

ॐ ह्रीं वचनविशुद्धयाकृतैर्यासमितिमहाव्रताय जलादिकं० ॥ १७ ॥

कायेन क्रियते यत्र गमनं दृष्टिगोचरं ।
इर्यासमितिसंज्ञं तत् यजे० ॥

ॐ ह्रीं कायविशुद्धयाकृतैर्यासमितिमहाव्रताय जलादिकं० ॥ १८ ॥

अविष्टुराक्षरं यत्र मनसा कोमलं वचः ।
भाषासमितिसंज्ञं तत् यजे० ॥

ॐ ह्रीं मनोविशुद्धया[illegible]तभाषासमितिमहाव्रताय जलादिकं० ॥ १९ ॥

वाचा मधुरता यत्र वाग्दोषैः रहितं वचः ।
भाषासमितिसंज्ञं तत यजे० ॥
ॐ ह्रीं वचनविशुद्धयाकृतभाषासमितिमहाव्रताय जलादिकं० ॥२०॥
कायदोषविनिर्मुक्तं यतः सत्यार्थवाचकं ।
तत्समिति जलाद्यैश्च, यजे० ॥
ॐ ह्रीं कायविशुद्धयाकृतभाषासमितिमहाव्रताय जलादिकं० ॥२१॥
भुक्तिर्दोषैर्विनिर्मुक्ता नानाशास्त्रार्थसाधिनीं ।
एषणासमितिर्यत्र, यजे० ॥
ॐ ह्रीं मनोविशुद्धयाकृतैषणासमितिमहाव्रताय जलादिकं० ॥२२॥
नानाशुद्धिकरा यत्र वचसाहारशुद्धिता ।
एषणासमितिर्ज्ञेया, यजे० ॥
ॐ ह्रीं वचनविशुद्धयाकृतैषणासमितिमहाव्रताय जलादिकं० ॥२३॥
कायेन शुद्धभावेन विदोषाहार सम्भवा ।
सैषणासमितिर्ज्ञेया, यजे० ॥
ॐ ह्रीं कायविशुद्धयाकृतैषणासमितिमहाव्रताय जलादिकं० ॥२४॥
वस्त्वादानं दयार्द्रेण क्षेपणं मनसा तथा ।
तन्नामा समितिर्यत्र, यजे० ॥
ॐ ह्रीं मनोविशुद्धयाकृतादाननिक्षेपणसमितिमहाव्रताय जला० ॥२५
आदाननिक्षेपणं यत्र दयार्द्रवचसा तथा ।
तन्नामा समितिर्यत्र यजे० ॥
ॐ ह्रीं वचनविशुद्धयाकृतादाननिक्षेपणसमितिमहाव्रताय जला०॥२६॥
वस्त्वादानं दयार्द्रेण कायेन क्षेपणं तथा ।
तन्नामा समितिर्यत्र यजे० ॥
ॐ ह्रीं कायविशुद्धयाकृतादाननिक्षेपणसमितिमहाव्रताय जलादिकं ॥२७॥

मनसा क्षांतिः दयायुक्ता प्रतिष्ठापनसंज्ञिका ।
तन्नामा समितियत्र, यजे० ॥

ॐ ह्रीं मनोविशुद्धयाकृतप्रतिष्ठापनासमितिमहाव्रताय जलादिकं ॥२८॥

शुद्ध्या वचसा च युक्ता प्रतिष्ठापनसंज्ञिका ।
समितियत्र नीराद्यैः, यजे० ॥

ॐ ह्रीं वचनविशुद्धयाकृतप्रतिष्ठापनासमितिमहाव्रताय जलादिकं ॥२९॥

शुद्ध्या युक्ता च कायेन प्रतिष्ठापनसंज्ञिका ।
समितिर्यत्र तोयाद्यैः यजे० ॥

ॐ ह्रीं कायविशुद्धयाकृतप्रतिष्ठापनासमितिमहाव्रताय जलादिकं ॥३०॥

मनसा ध्ययनोद्भूता मनोगुप्तिरघापहा ।
तत्प्राप्त्यैर्यत्र तोयाद्यैः यजे० ॥

ॐ ह्रीं मनसाविशुद्धयाकृतमनोगुप्तिमहाव्रताय जलादिकं ॥ ३१ ॥

यत्र स्वाध्यायतो जाता वचोगुप्तिस्तपोभृतां ।
वाग्विशुद्ध्या जलाद्यैश्च यजे० ॥

ॐ ह्रीं वाग्विशुद्धयाकृत वाक्गुप्तिमहाव्रताय जलादिकं ॥ ३२ ॥

कायोत्सर्गविशुद्ध्या च कायगुप्तिः सुनिश्चला ।
जाता यत्र जलाद्यैश्च यजे० ॥

ॐ ह्रीं कायविशुद्धयाकृतकायगुप्तिमहाव्रताय जलादिकं ॥ ३३ ॥

चारित्ररत्नमनघं परमं पवित्रं ।
प्रोत्तारयामि वरमर्घमहं जलाद्यैः ॥
पूर्णं सुवर्णकृतभाजनसंस्थितं च ।
स्वर्गापवर्गफलदं जयघोषणैश्च ॥

ॐ ह्रीं परमचारित्ररत्नाय महार्घं० ॥

अथ जाप्य: १०८–मालतीकुसुमैः ॥

जाप्य मंत्र–ॐ ह्रीं अ सि आ उ सा सम्यग्दर्शनज्ञानचारित्रेभ्यो नमः ॥

अथ जयमाला ।

सत्यैवात्र महाव्रतानि सततं गुप्तित्रयं मुक्तिदं ।
पंचैव समितिव्रतानि सुहितं कुर्वंति भव्यात्मनां ॥
तस्मात्पुण्यचरित्ररत्ननिकरं सेव्यं मुदा शंकरं ।
मुक्तेर्मार्गमिदं भवाब्धिशरणं भव्यैरहं संस्तुवे ॥ १ ॥

× × ×

अहिंसाव्रतं विश्वसत्वानुकंपं, यजेऽनंतशर्माकरं निःप्रकंपं ।
असत्यादिदूरं ज्ञानविज्ञानमूलं, सुसत्यं स्तुवे सर्वकर्मानुकूलं ॥२॥
अदत्तातिगं कृत्स्नलोभादिदूरं, महांतं महासद्व्रतं धर्मपूरं ।
परं ब्रह्मचर्यं जगद्धर्म हेतुं, वरं चर्चयेऽनंतकर्माब्धिसेतुं ॥ ३ ॥
व्रतंधर्मशर्माकरं सक्तसंगं, खलैर्लोभतृष्णादिसर्वैरभंगं ।
मनोवाक्यकायत्रयं गुप्तिगुप्तं यजाम्यत्र हिंसादिपापैरमीष्टं ॥४॥
सुवाचां सुभाषेषणां यत्र भूतां किलादाननिक्षेपणां धर्मसुतां ।
प्रतिष्ठापनां चार्चयेऽहं पवित्रां, समित्याख्यकात्वृत्तधात्रिं विचित्रां ॥
परं पावन विश्वभव्यैकबंधुं, महादृष्टि चिद्वृत्तरत्नादि सिंधुं ।
जगत्पूज्यमानदशर्मादिहेतुं, व्यथानिष्टरोगादि दुःखादिसेतुं ॥६॥
सुरेंद्रादिभूतिप्रदं पापदूरं, जिनेन्द्रादिसेव्यं वृषांभोतिपूरं ।
यजे वृत्तसार प्रमादादित्यक्तं, परंपालयामक्षघातेति सक्तं ॥७॥

× × ×

---

१ वृत्ता ।

विविधफलसमूहै दिव्यपक्वान्नवर्गैः ।
ज्वलितबहुसुदीपैश्चार्चये वाद्य सद्भैः ।।
रचितममलमर्घं हेमपात्रेति रम्यं ।
त्रिदशविधचरित्रस्यैव चोत्तारयामि ।।
ॐ ह्रीं त्रयोदशविधसम्यक्चारित्राय महार्घं ।
समस्तार्चनमांगल्यं द्रव्यपूर्णशुभावहं ।
सुदृग्ज्ञानचरित्राणां मर्घमुत्तारयाम्यहम् ।।
ॐ ह्रीं सम्यग्दर्शनज्ञानचारित्ररत्नत्रयधर्मेभ्यो पूर्णार्घं ।
धर्मः कल्पतरुसदाफलतरुः सोऽयं महामंगल ।
सोऽयं देवजिनेन्द्रपादजनितः संसारदुखावहः ।।
तस्मात्पुत्रकलत्रशांतिकमला कीर्तिप्रदो वः सतां ।
भूयात् संतति वल्लरी जलधरः वंशान्वयेऽस्मिनिजे ।।
इत्याशीर्वादः ।

दृग्बोधादिकशुद्धवृत्तजनितं रत्नत्रयं सद्व्रतं ।
तत्पूजा रचिता मुनीन्द्रगणिना पुण्यात्मना सूरिणा ।।
सद्भट्टारकधर्मचन्द्रपदभृद् धर्मादिभूषात्मना ।
भव्योपासकशीतलेश विहितं प्रश्नात् जिनार्थात वरं ।।
गच्छे श्री शारदायाः सदतिबलगणे पावने मूलसंघे ।
भव्यो दाक्षिण्यभूषो जनिकुमुदविधोः धर्मचन्द्रो मुनीन्द्रः ।
तत्पट्टाभोजसूर्यो जयति भुविसुखं धर्मभूषो गणेंद्रः ।
तत्कृत्या शंभव यज्जयंतु शिवकरं श्री व्रतोद्यापनं च ।।
पुष्पांजलिं क्षिपेत् ।
।। इतिश्री रत्नत्रयव्रतोद्यापनं ।।

अथ अनन्त व्रतोद्यापनं ।

श्रीनाभिसूनुचरणाब्जयुगं प्रणम्य देवेन्द्रनागेन्द्रनरेन्द्रपूजितं ।
वक्त्रादनन्तजिनपात् प्रविनिर्गतं यदुद्यापनं बृहदनन्ततपोविधानं॥

सम्यक्त्वशुद्धिपरितं हृदयं नरो यो,
भक्त्या स्वनन्ततपसा परिधार्य नित्यं ।
शृण्वन्तु तस्य तपसो विधिमाहितस्य,
यस्यान्नराः सुखकरं फलमाप्नुवन्ति ॥

मासे भाद्रपदे शुक्ले, पक्षे च दशमी तिथौ ।
एकभुक्तिविधानेन भुक्त्वा गत्वा जिनालयम् ।
जलगन्धादिभिर्द्रव्यैः पूजयित्वा जिनाधिपान् ।
त्रिशुद्धिभक्तिभावेन स्तुत्वा नत्वा पुनः पुनः ॥ ४ ॥
गुरूणां चरणौ नत्वा गृहीत्वा प्रोषधं व्रतं ।
गृहीत्वाद्रव्यसामग्रीं जलगन्धादिशुद्धिकां ॥ ५ ॥
श्रीवृषभाद्यनन्तान्तान् चतुर्दशजिनेश्वरान् ।
स्थापयित्वा महोत्साहैः गीतैश्च मंगलाष्टकैः ॥ ६ ॥
चतुर्दशांकाः सम्यक् ते पूजनीया पृथक् पृथक् ।
आर्तिका जयमालाभिर्गंधपूगादि पूर्वकम् ॥ ७ ॥
एकभुक्तिर्दिने चैकादश्यां त्रिकालपूजया ।
धर्मध्यानेन तत्रैव तिष्ठेव श्रीजिनसद्मतिः ॥ ८ ॥
गृहारंभपरित्यक्तः स्वल्पोपाधिसमाहितः ।
द्वादश्यां जिनपूजांते चैकभुक्तिः प्रजायते ॥ ९ ॥

त्रयोदश्यामेकवारं भोजनं निरवद्यकम् ।
त्रिकालपूजनं तद्वद् गृहव्यापारवर्जितम् ॥ १० ॥
शुद्धत्रयोदशीयोग गंधकूटीस्थवेदिकां ।
चतुप्रस्थप्रमाणे हि पंचचूर्णेन कारयेत ॥ ११ ॥
मण्डलं वर्त्तुलाकारं चतुस्रं वर्गतशोभनं ।
द्रव्यग्रह सु चन्द्रकं सुदकं ध्वज मण्डितं ॥ १२ ॥
श्रीगंधकुट्यां च विधाय मंडले तस्याग्रवेद्यां च विधाय स्वस्तिकं ।
भक्त्या विशुद्धया महतीं सुयज्पां, अनन्तवृत्तस्य तु वैभवेन वा॥ १३
म कोष्ठकान् संप्रविधाय सादरं विविधचंद्रोपकचारुमंडपैः ।
कुर्वंतु सुभव्यजनाः सुयज्ञकं तथा जिनेशा वरदा भवंति वै ॥ १४ ॥
श्रीखंडागरुकर्पूरकाश्मीरैः कुम्कुमादिभिः ।
चित्रितो मृन्मयताम्रधौतकुम्भो विलेपितः ॥ १५ ॥
स्थापनीयोऽर्जुनधौतवस्त्रेणाच्छादितः परः ।
तस्योपरि च संस्थाली स्थापनीया मनोहरा ॥ १६ ॥
तस्यां श्रीजिनबिंबं हि चतुर्दश जिनेशिनां ।
चतुर्विंशतिदेवानां बिंबं वा स्थापयेद्बुधः ॥ १७ ॥
अथवानन्ततीर्थस्य बिम्बं च स्थापयेन्मुदा ।
स्थापनीयं तदग्रे चानंतयंत्रेण मन्वितं ॥ १८ ॥
यंत्राभावे सुगंधेन लेखनीयः शलाकया ।
यो यंत्रोऽनंतनाथेन दर्शितो दिव्यभाषया ॥ १९ ॥
यंत्रोपरि विधातव्यं शुद्धमनंतमंडलं ।
प्रतिष्ठादिविधानेन प्रतिष्ठया सुमुक्षुभिः ॥ २० ॥

यंत्राद्योऽपि सर्वेषु पदार्था विकुर्वरे ।
जपनीयं ततो मंत्रं वनस्पति सुपुष्पकैः ॥ २१ ।
पंचामृतेन संस्नाप्य क्षालनीयो जलैर्वरैः ।
पूर्ववदर्चनं कृत्वा रात्रौ जागरणं चरेत ॥ २२ ॥
चतुर्दश्यां विधातव्यं चतुराहारवर्जनं ।
महासंस्थापनं कृत्वा पूजनं च त्रिकालजं ॥ २३ ॥
पौर्णिमायां प्रभाते च पूजयित्वा जिनेश्वरान् ।
प्रोषधं पारयित्वा च क्षयं कृत्वा परस्परं ॥ २४ ॥
साधर्मिजनैः सार्द्धं स्वगृहे भोजनं व्रजेत ।
मानवोऽस्य भवो येन जायते सफलो नृणाम् ॥ २५ ॥

एवं विधानेन मयोदितं शुभं कृत्वा तपोऽनंतव्रताभिधानम् ।
उद्यापनं श्री जिनयज्ञकल्पं कुर्वंतु यस्मात् सफलं तपो भवत् ॥

एतत् पठित्वा वेदिकोपरि पुष्पांजलिं क्षिपेत् ।

श्रीमंतं देवदेवौघैः, पूजितं यस्य पंकजं ।
वृषभं वृषदातारं, स्तुवेहं जगदुत्तमं ॥ १ ॥

मदननाग विदारण केशरी, घनभवोदधितारण नौसमः ।
नरवरेंद्र सुरेंद्रसुपूजित स्मभवतुश्च जगत्स्थजितोव्रतात ॥२॥

स्तुवे शंभवं यस्य पादारविंदं, सुरैः पूजितं पूज्यपादारविंदं ।
स्फुरन्फुल्लराजीव पादारविंदं, चरच्चारनैरूप्य पादरविंदं ॥३॥

विविधदुःखदवानलकंदकं, विबुधहृत्कमलांतरनंदकं ।
खचरनागनरामरवंद्यकं, समभिनंदनदेवमहं स्तुवे ॥ ४ ॥

देवेन्द्रवृन्दमुकुटोत्करघृष्टपादो
दिव्यध्वनिप्रकटितामृतमेघनादः ॥
तत्वानुशासनपराजित दुष्टवादः ।
संस्तूयते जिनपतिः सुमतिः सुभव्यः ॥ ५ ॥

कमलांचितसुक्रमलेऽपि परैः कमलेऽपि जनाश्रितहृत्कमलं ।
कमलां कमलोज्जितसद्वपुषे कमलप्रभदेव नमो भवते ॥ ६ ॥

नीलरत्नभास्सपद्मभांचितोग्रविग्रहो ।
ध्यानवन्हिसन्निशानकर्मकक्षनिग्रहः ॥
अस्तबाह्यमध्यवर्तितुर्यविंशतिग्रहो ।
नूयते सुपार्श्वकोऽस्तकुत्सवाक्कदाग्रहः ॥ ७ ॥

शीतरश्मिरश्मिजालगौरकांतिदेहभाक् ।
सप्ततत्वदेशनैकसप्तभंगगर्भवाक् ॥
शीतदीधितीद्धलक्ष्मणार्च्यचन्द्रमः प्रभः ।
स्तूयते मनोवचः सुकाययोगशुद्धितः ॥ ८ ॥

कुन्दपुष्पशुभ्रदेवैवत्तया प्रसिद्धिता
आगमप्रमाणयुक्तियुक्तधर्म्यनव्यवाक् ॥
पुष्पदन्तइत्यभूत्समस्तदेव देवराट् ।
यः ममेस्तु बुद्धये समृद्धये जिनेश्वरः ॥ ९ ॥

शीतरश्मिचन्दनौघगांगवारिशीतता ।
धर्मदेशनांशुगर्भशीतवाक्यरश्मिभिः ॥
यस्य शीतलस्य तं नमाम्यहं गिरस्तुता ।
वेदनीयकर्मधर्मनाशनाय वं जिनं ॥ १० ॥

श्रेयांसं देवदेवं सुरपतिमहितं पूज्यपादं जिनेन्द्रं ।
भक्तिप्रह्वेन्द्रनम्रोन्मुकुटमकरिकोद् घृष्टपादारविंदं ॥
केवलज्ञानभानु त्रिदशनरजनैर्गीतकीर्तिसुमूर्तिं ।
शांतं गम्भीरनादं निरुपमसुखदं भावतोऽहं नमामि ॥ ११ ॥

श्रीवासुपूज्यमनघं जगतां दयानं ।
[illegible]गमनाकचरिञ्चवानं ॥
[illegible]कुलकलितानिमादहान ।
सुज्ञानरूढ [illegible]लक्षणमादधानं ॥ १२ ॥

विमलेशमलं जिनराजवरः ।
सव [illegible] दवनाहरु लक्षमरः ॥
[illegible]मोहनिनभञ्जनरः ।
[illegible] भवतु सदोऽतिहरः ॥ १३ ॥

अनन्तमपारपरं पराणं ।
विनयनकं सौख्यकरं नराणां ॥
अनन्तनाथं करुणानिधानं ।
वन्देऽहमष्टापदमानमाप ॥ १४ ॥

इति चतुर्दशतीर्थकरस्तुतिं पठित्वा मण्डलकोपरि पुष्पाक्षतान् क्षिपेत् ।

अथ वृषभादि चतुर्दशतीर्थकराष्टकं ।

श्री पञ्चाशीतिमेकजान् वृषादिन् वृषनायकान् ।
संस्थापयामि सद्भक्त्या वृषभाद्यांश्चतुर्दश ॥

ॐ ह्रीं वृषभादिचतुर्दशतीर्थंकराः अत्र अवतरत अवतरत संवौषट् । अत्र तिष्ठ तिष्ठ ठः ठः । अत्र मम सन्निहिता भवत भवत वषट् स्वाहा ।

गंगादितीर्थोद्भववारिपूरैः ।
शीतैः सुगन्धैः प्रयजे जिनेन्द्रान् ॥
द्विः सप्तसंख्यादिजिनान् सुभक्त्या ।
नार्हद्गणाधिपादपद्मान् ॥

ॐ ह्रीं वृषभादिचतुर्विंशतितीर्थंकरेभ्यो [illegible] निर्वपामीति स्वाहा।

श्रीचन्दनैर्हिमभृङ्गकूरैः शीतसुगन्धमलयाद्रिजातैः ।
द्विः सप्त संख्यादि० ॥ चन्दनम्० ॥
सन्मौक्तिकैर्वा कलमाक्षतौघैः ।
शुभ्रैः सुदीर्घैः कमलादिवा हि ॥ द्विसप्त० ॥ अक्षतान्० ॥
मल्लीजपाकुन्दकदम्बजाती ।
सच्चंपकैः पद्म सुपारिजातैः ॥ द्विसप्त० ॥ पुष्पम्० ॥
सन्मोदकैः खज्जकशर्कराघैः ।
सद्राजनम्र्यश्चरुभिर्मनोज्ञैः । द्विसप्त० ॥ नैवेद्यम्० ॥
सद्रत्नकर्पूरघृतादिभवैः सुदीपैः ।
दीपैस्तमोनाशकरैर्वरिष्ठैः ॥ द्विसप्त० ॥ दीपं० ॥
धूपैः सुगन्धैरगुरुद्भवैर्वा संधूपिताशैर्बहुलुब्धभृंगैः । द्वि० ॥ धूपं० ॥
सन्नालिकेराम्रसुदाडिमौघैः फलैः सुनारिंगकपित्थपुंगैः ।
द्विः सप्त० ॥ फलं० ॥

सद्वारिचन्दनशुभाक्षतकुन्दपुष्पै-
र्नैवेद्यकैर्वरसुदीपसुधूपपुंगैः ॥
नारायणो यजति देवनरेन्द्रपूज्यान् ।
द्विःसप्तसंख्यजिनपान् वरपात्रसंस्थैः ॥ अर्घं ॥

अथ प्रत्येक पूजा।

सद्दर्शनावगमचारुचरित्रयुक्तं ।
विश्वामरार्चितपदांबुजसन्निरुक्तं ॥
नाभेयनंदनमहं वसुकर्ममुक्तं ।
शुद्धोदकादिभिरिमैर्जिनमर्चयामि ॥ १ ॥

ॐ ह्रीं सद्धर्मप्रवर्तकाय वृषभतीर्थंकराय जलादि अर्घं० ॥ १ ॥

मिथ्यांधकारविनिवारणपद्ममित्रं ।
भव्यांगिपद्मवरबोधनपद्ममित्रं ॥
कर्मोद्भटैरजितसज्जितशत्रुपुत्रं ।
वारादिभिर्जिनमहं प्रयजे सुभक्त्या ॥ २ ॥

ॐ ह्रीं कर्माष्टकरहिताय श्री अजितजिनदेवाय अर्घं० ॥ २ ॥

शैवं सौख्यं संभवत्यस्य लोके ।
भक्त्या स्तुत्या चंदनेनार्चया च ॥
तत्संप्राप्तं संभवाख्यं जिनेंद्रं ।
जेतारेयं पूजयाम्यंबुमुख्यैः ॥ ३ ॥

ॐ ह्रीं शिवंकराय श्री संभवतीर्थंकराय अर्घं० ॥ ३ ॥

यश्च दर्शनादिभिः सुनंदयत्यनुद्धतान् ।
पन्नगाधिपामरेंद्रनाकिनः समुत्सुकान् ।
मोहनीयकर्मधर्मघातनैकदक्षकं ॥
तं सदाभिनंदनं यजेऽष्टधोदकादिभिः ॥ ४ ॥

ॐ ह्रीं लोकाभिनंदकाय श्री अभिनंदनजिनाय अर्घं० ॥ ४ ॥

क्रोधलोभमानमोहमारसारमल्लको-
माथनैकमल्लतुल्यदोषहारकं सदा ॥
क्षीरनीरदिव्यहीरनीरचंदनादिभिः ।
संयजे जिनेश्वरं सु पंचमं सुभक्तितः ॥ ५ ॥

ॐ ह्रीं क्रोधाद्युन्मथकाय श्री सुमतितीर्थंकराय अर्घं० ॥ ५ ॥

नीलकंजपत्रनेत्ररक्तकंजचक्रभं ।
रक्तपंकजातगात्रसत्सुसीममातृकं ॥
रक्तपंकजोज्वलक्षकर्मकक्षहंतृकं ।
वारिचन्दनादिभिर्यजे सुषष्टमं जिनं ॥

ॐ ह्रीं श्रीपद्मप्रभतीर्थंकराय अर्घं० ॥ ६ ॥

कंदर्पसिन्धुरविदारणपंचवक्त्रः ।
सन्नीलरत्नसमभांचितपुण्यगात्रः ॥
सद्द्रव्यपकजविकस्वरबालमित्रः ।
संपूज्यते वनसुगन्धमुखैः सुपार्श्वः ॥ ७ ॥

ॐ ह्रीं कंदर्पोन्मथकाय श्रीसुपार्श्वतीर्थंकराय अर्घं० ॥ ७ ॥

सम्पूर्णचन्द्रोज्वलदिव्यगात्रं ।
सम्पूर्णचन्द्रांकसुबोधपात्रं ॥
चन्द्रप्रभं चन्द्रमिवद्वितीयं ।
द्रव्यैर्वनादिप्रमुखैर्यजेऽहं ॥ ८ ॥

ॐ ह्रीं श्री चन्द्रप्रभतीर्थंकराय अर्घं० ॥ ८ ॥

भूरिभव्यचित्तहारि सौख्यकारिवाग्भिरं ।
पुष्पदन्तनामधर्मपंकमं दिगम्बरं ॥

भुक्तिमुक्तिसारसौख्यसम्पदाकरं परं ।
पूजयामि भक्तितोष्टधोदकादिभिर्जिनं ॥ ९ ॥
ॐ ह्रीं श्रीपुष्पदंततीर्थंकराय अर्घं० ॥ ९ ॥

त्रैकाल्यवस्तु निचयं स चराचरं च ।
जानाति पश्यति सदा युगपज्जिनो यः ॥
दिव्याविचित्रशुभशक्तिधरं प्रभुं तं ।
चर्चे जलादिकचयैर्जिनशीतलेशं ॥ १० ॥
ॐ ह्रीं श्रीशीतलनाथतीर्थंकराय अर्घं० ॥ १० ॥

श्रेयान् जिनः परमसंततसौख्यकारी ।
रूपप्रभृत्यककराष्टमदापहारी ॥
सम्पूज्यते जिनवरोऽष्टजलादिसारैः ।
द्रव्यैर्मनोवचनकायविशुद्धिभाजः ॥ ११ ॥
ॐ ह्रीं श्रीश्रेयांसतीर्थंकराय अर्घं० ॥ ११ ॥

श्री वासुपूज्यं वसुनाथपूज्यं
तत्वार्थसार्थं प्रतिबोधदक्षं ॥
सद्बोधनिर्भर्त्सितवादिपक्षं ।
चर्चाम्यहं वारिसुचन्दनाद्यैः ॥ १२ ॥
ॐ ह्रीं श्रीवासुपूज्यतीर्थंकराय अर्घं० ॥ १२ ॥

विमलं मलवर्जितगात्रधरं ।
कमलापतिसेवित पत्कमलं ॥
वरशूकरलांछनमर्तिहरं ।
प्रयजे कमलप्रमुखैः सुजिनं ॥
ॐ ह्रीं श्रीविमलनाथतीर्थंकराय अर्घं० ॥ १३ ॥

मव्यांभोरुहबोधनैकतरणिं सेधांकविभ्राजितं ।
कंदर्पोद्भटकुंभिकुंभदलने सत्यं च वक्रोपमं ॥
अज्ञानभुविभेदनैकपरशुं दुर्वादिगर्वापहं ।
चर्चेऽनन्तमनन्तसद्गुणमणिव्रातास्पदं वार्मुखैः ॥ १४ ॥
ॐ ह्रीं श्रीअनन्तनाथतीर्थंकराय अर्घं० ॥ १४ ॥
देवेन्द्रवृन्दमुनिवंदितपादपद्मान ।
आदीश्वरप्रमुखधर्ममुतीर्थनाथान् ॥
द्रव्यैश्चतुर्दशजलादिवसुप्रमैस्तान् ।
अर्घेण संयजतिवर्णिनरायणाख्यः ।
ॐ ह्रीं वृषभादिचतुर्दशतीर्थंकरेभ्यो महार्घं ।

अथ जयमाला ।

घत्ता ।

नतकल्पमहेन्द्रा नमितमुनीद्राश्चंद्रार्चित पदकमलवरा ।
नुतबुद्धिगणींद्रा दीप्तिदनेंद्रास्तेजयंतु जिनवरनिकरा ॥
जय वृषभ वृषभ मुनि सेव्यपाद, जय नमित सुरासुर दिव्य नाद ।
जय अमलकमलदल नयनसार, जय अजित जिनेश्वर तरणतार ॥
जय शंभव शंकर सुख निधान, जय अजरामर पद धर विमान ।
जय अभिनंदन नंदित मुनींद्र, जय सुरनर खेचर मही वितंद्र ॥
जय सुमति जिनेश्वर सुमतिकार, जय सुमनोमल गुणगण सुधार ।
जय रक्त कमलसम गात्र देव, जय कमलापति यति विहित सेव ॥
जय शोभन पार्श्व सुपार्श्वराज, स्वस्तिक लांछन सुजिनपराज ।
जय चंद्रप्रभ वर चंद्र गात्र, जय चंद्रेंदित जिन परम पात्र ॥४॥

जय पुष्पदंत सित पुष्प दंत, जय मकर सुलांछन परम शांत ।
जय शीतल शीतल वचन भंग, जय द्रुत कनकाभ शरीर चंग ॥
जय श्रेयो जिनवर परम धाम, जय विजित सुदुर्जय विकटकाम ।
जय वासुपुज्य वर महिष लक्ष, जय विजित सुदुर्जय मोह पक्ष ॥
जय विमल विमल गुण निर्विकार, जय प्रवर वराह सु ऋक्ष धार ।
जय अनंत परम गुण गण गरिष्ट,जय त्रिभुवनपति नुत पद वरिष्ट॥

घत्ता ।

सकलगुण गरिष्टान्निर्जितानंगदुष्टान् -
र्नमितसुरमहिष्टान् क्षिप्तकर्मारिकष्टान् ॥
वसुसुगुणवरिष्टानर्घयामीह शिष्टान् ।
मनसि परमनिष्टो वर्णि नारायणाख्यः ॥

ॐ ह्रीं वृषभादिचतुर्दशजिनेभ्यः जयमाला महार्घं ।

आनन्दाब्धिविवर्धनैकविधवः संसारविध्वंसकाः ।
अज्ञानांधविभेदनेन सदृशास्त्रैलोक्यलोकार्चिताः ॥
कंदर्पोत्कटकुम्भिदारुणहरिप्रायाः सुशांतिप्रदाः ।
श्रीमंतो वृषभादयो जिनवराः कुर्वंतु मे मंगलं ॥

इत्याशीर्वादः ।

स्तुति ।

छप्पा ।

वृषभाजित जिनदेव सम्भव अभिनन्दन जाणो ।
सुमति पद्म पहपास विधुपह सुविधि वखाणो ॥
शीतल ने श्रेयंस द्वादश वासुपुजेसर ।
विमल कमल दलनेन अनन्तगुणअनन्त जिनेश्वर ॥

एह चतुर्दश जिनवरा, धर्मतीर्थपद उद्धरण ।
नारायण ब्रह्मचारी कहे, सकल संघ मंगलकरण ॥

इति चतुर्दश तीर्थंकर प्रत्येक पूजा समाप्तम् ।

अथ चतुर्दश प्रकीर्णक गुणपूजा ।

सामायिकादिसुचतुर्दशभेदभांजि ।
प्रकीर्णकानि जिनदेवमुखोद्भवानि ॥
वैराग्यभावजनकानि सुनिर्मलानि ।
संस्थापयामि सुविधिपूर्वकमाह्वयेऽहं ॥

ॐ ह्रीं चतुर्दशप्रकीर्णा अत्रावतरावतर संवौषट् स्वाहा । अत्र तिष्ठ२ ठः ठः । अत्र मम सन्निहितो भव भव वषट् स्वाहा ।

सर्वभूतसमाकारं सामायिकयुतं मुनिं ।
जलाद्यष्टविधैर्द्रव्यैः पूजयामि तमुत्तमं ॥

ॐ ह्रीं सामायिकक्रियायुक्तमुनये जलादिकं ॥ १ ॥

१–व्रत कथाओंमें और कोई कोई जगह १४ प्रकीर्णककी जगह सिद्धोंके १४ गुणोंकी पूजा की है, सो उसी माफिक नीचे सिद्धोंके १४ गुणोंकी पूजा दीजाती है ।

सिद्धके चतुर्दश गुण पूजा ।

त्रिकालसंभवाः सिद्धाः चतुर्दशगुणोज्वलाः ।
अत्रैवानन्तसंस्थाने सम्यक्तिष्ठंतु सादरात् ॥

इति पठित्वा आह्वानन स्थापनं सन्निधिकरणं ।

चतुर्विंशतिदेवानां स्तवनं प्रतिपादकं ।
पूजयाम्यष्टधा द्रव्यैर्जलादिभिरहं मुनिं ॥
ॐ ह्रीं चतुर्विंशतिजिनस्तुतिप्रतिपादकाय मुनये जलादिकं ॥२॥

सिद्धस्य चतुर्दशगुणाः ।

ये सिद्धाः कर्मनिकृत्य तपोभिर्द्वादशात्मकैः ।
यजेऽहं जलगंधाद्यैः सिद्धान्तान् तत्पदाप्तये ॥
ॐ ह्रीं तपसिद्धेभ्य नमः जलादिकं ॥ १ ॥

ये विनयादिभिः सिद्धाः पंचसज्ज्ञानसत्तमाः ।
यजेऽहं जलगन्धाद्यैः सिद्धान्तान्तत्पदाप्तये ॥
ॐ ह्रीं विनयसिद्धेभ्यो नमः जलादिकं ॥ २ ॥

कर्मनिर्मूलनं कृत्वा संयमे सिद्धतां गताः । यजेऽहं० ॥
ॐ ह्रीं संयमसिद्धेभ्यो नमः जलादिकं ॥ ३ ॥

चारित्रादिगुणैः सम्यक् कर्मनिर्मूल्यसिद्धिगाः । यजेऽहं० ॥
ॐ ह्रीं चारित्रसिद्धेभ्यो नमः जलादिकं ॥ ४ ॥

श्रुतज्ञानेन संसिद्धाः कर्मनिर्मूल्य सिद्धिपाः । यजेऽहं० ॥
ॐ ह्रीं श्रुताभ्याससिद्धेभ्यो नमः जलादिकं ॥ ५ ॥

निश्चयात्मकभावेन सिद्धाः कर्मविघातकाः । यजेऽहं० ॥
ॐ ह्रीं निश्चयात्मकभावसिद्धेभ्यो नमः जलादिकं ॥ ६ ॥

नष्टशरीरिणः सिद्धाः ज्ञानदेहविजृंभिताः । यजेऽहं० ॥
ॐ ह्रीं ज्ञानगुणसिद्धेभ्यो नमः जलादिकं ॥ ७ ॥

अनन्तबलसंबाधाः क्षयाति कर्मजालिनः । यजेऽहं० ॥
ॐ ह्रीं बलगुणसिद्धेभ्यो नमः जलादिकं ॥ ८ ॥

प्रातर्मध्यान्ह संध्यासु देवानां पूजने रतं ।
पूजयाम्यष्टधाद्रव्यैर्मुनींद्रं विधिपूर्वकं ।
ॐ ह्रीं त्रिकालदेववंदनायुक्तमुनये जलादिकं ॥ ३ ॥

अनन्तदर्शनोपेताः पश्यंति ये चराचरं । यजेऽहं ॥
ॐ ह्रीं दर्शनगुणसिद्धेभ्यो नमः जलादिकं ॥ ९ ॥
अन्तरायक्षयात् सिद्धा वीर्यानन्तविवर्धिताः । यजेऽहं० ॥
ॐ ह्रीं अनन्तवीर्यसम्पन्नसिद्धेभ्यो नमः जलादिकं ॥ १० ॥
शुद्धशूक्ष्मगुणोपेताः क्षयाच्च नामकर्मणः । यजेऽहं० ॥
ॐ ह्रीं सूक्ष्मगुणोपेतसिद्धेभ्यो नमः जलादिकं ॥ ११ ॥
अवगाहनेन संसिद्धाः मिलिता ये परस्परं । यजेऽहं० ॥
ॐ ह्रीं अवगाहनगुणोपेतसिद्धेभ्यो जलादिकं ॥ १२ ॥
अगुरुलघुसद्भावात निराश्रयास्तपः श्रिताः । यजेऽहं० ॥
ॐ ह्रीं अगुरुलघुगुणगरिष्ठसिद्धेभ्यो नमः जलादिकं ॥ १३ ॥
वेदनीयक्षयादव्याबाधसंगुणगोचराः । यजेऽहं ॥
ॐ ह्रीं अव्याबाधगुणसमृद्धिसिद्धेभ्यो नमः जलादिकं ॥ १४ ॥

नवसुलक्षसरातपयोजनैः परमितं वरलोकसुमूर्धकं ।
यममवाप्य सुसिद्धगुणस्थितं वरमहार्घमहं वितरामितं ॥
ॐ ह्रीं चतुर्दशगुणपूरितसिद्धेभ्यो पूर्णार्घं ।

वृषभादिवर्धमानन्ताः षोडशचाष्टसंयुताः
देवादिचक्रवादीनां तस्मै पुष्पांजलिं क्षिपेत ॥
पुष्पांजलिः ।

आश्रवानां निरोद्धारं प्रतिक्रमणकारकं ।
पूजयाम्यष्टधाद्रव्यैर्मुनींद्रं विधिपूर्वकं ॥
ॐ ह्रीं प्रतिक्रमणक्रियायुक्तमुनये जलादिकं ॥ ४ ॥
गुर्वादियेतिवृद्धेषु विनयक्रियया युतं । पूजया० ॥
ॐ ह्रीं गुर्वादिकधर्मवृद्धविनयक्रियायुक्तमुनये जलादिकं ॥ ५ ॥
दीक्षाग्रहणशिक्षादि कृतिकर्मपरं वरं । पूजया० ॥
ॐ ह्रीं दीक्षाग्रहणशिक्षादियुक्तमुनये जलादिकं ॥ ६ ॥
यत्याचारोपदेष्टारं दशवैकालिकं परं । पूजया० ॥
ॐ ह्रीं दशवैकालिकोपदेशकायमुनये जलादिकं ॥ ७ ॥
उपसर्गाः सहे धीरमुत्तराध्ययने रतं । पूजया० ॥
ॐ ह्रीं उत्तराध्ययनरतमुनये जलादिकं ॥ ८ ॥
कल्पादिव्यवहारेण युतं दोषविघातकं । पूजया० ॥
ॐ ह्रीं कल्पव्यवहारयुक्तयुनये जलादिकं० ॥ ९ ॥
कल्पाकल्परतं काले योग्यवस्तुग्रहे परं । पूजया० ॥
ॐ ह्रीं कल्पाकल्पयुक्तमुनये जलादिकं० ॥ १० ॥
षट्कालाचरणोद्युक्तं प्राणपोषकदेशकं । पूजया० ॥
ॐ ह्रीं महाकल्पोपदेशकायमुनये जलादिकं० ॥ ११ ॥

दुर्वारावारुणेन्द्राजितपवनजवा वाजिनश्चेन्द्रनोद्या ।
लीलास्वस्रोस युक्तयः कृतकरचमरोद्भासिताराज्यलक्ष्मीः ॥
उच्चैश्चातापपत्रं नवनिधिसहितं मेदनी सागरान्ताः ।
प्राप्यंते त्वत्प्रसादात त्रिभुवनमहिता शाश्वती धर्मवृद्धिः ॥
इत्याशीर्वादः ।

१ धर्म ।

पुण्डरीकपरं देवं सुचिकित्सोत्पत्युपदेशकं । पूजया० ॥
ॐ ह्रीं पुण्डरीकोपदेशकाय मुनये जलादिकं० ॥ १२ ॥
महादि पुण्डरीकाख्य देष्टारं करुणाकरं । पूजया० ॥
ॐ ह्रीं महापुण्डरीकोपदेशकाय मुनये जलादिकं० ॥ १३ ॥
अशीतिकोपदेष्टारं व्यवहारनये परे । पूजया० ॥
ॐ ह्रीं अशीतिकोपदेशकाय मुनये जलादिकं० ॥ १४ ॥
प्रकीर्णकान्यंगबहिर्भवानि सामायिकादीनि चतुर्दशानि ।
संपूजयाम्यर्घवरेण भक्त्या जलादिभिर्वर्णिनरायणाख्यः ॥
ॐ ह्रीं चतुर्दशप्रकीर्णकेभ्यो महार्घं ।

अथ जयमाला ।

नतपरम सुरेन्द्रा, नमित नरेन्द्रा, कीर्ति कांतिवर दीप्तिधराः ।
वरऋक्ष दिनेन्द्रा, बुद्धि गणेन्द्रास्तेजयंतु मुनिवरनिकराः ॥
श्री सामायिक गुणसहित नमो, वर त्रिविध दूषण रहित नमो ।
स्तुत चौविस जिनवर पाय नमो, जिन क्रोधादिक कुकषाय नमो ॥

जिनवन्दनशुभकृतकाय नमो, पद नमित सुरासुर राय नमो ।
प्रतिक्रमणप्रकाशितबोध नमो, कृत पंच दुराश्रवरोध नमो ॥
कृत गुरु मुनीवर जन विनय नमो, वर तत्व प्रकाशित सुनय नमो ।
निरुपम शुभ संयम सहित नमो, नरवर सुख रंजनमहित नमो ॥

उपदिष्ट यती जन चरण नमो, नव नय कलितागम धरण नमो ।
उपसर्ग सहन महाधीर नमो, दोइविंशति परिषह वीर नमो ॥
व्यवहार क्रिया गुण कथित नमो, अष्ट मदरहित मुनि नयित नमो ।
हेयाहेय विचार सुधरण नमो, कमलापति सेवित चरण नमो ॥

गुणिजन गण पोषण सहित नमो सुरनर विद्याधर महित नमो।
वर द्वादश विधि तप चरण नमो, सुरनर खेचर पद धरण नमो ॥
षट् द्रव्य दरसावन वीर नमो, सम तत्व प्रकाशन धीर नमो।
पचास्ति काय गुण धरण नमो, विकार प्रमाद दूरीकरण नमो ॥

घत्ता।

परम गुणांबुज दुरित तिमिरहर, ज्ञानादि शासन कुमत ने हरो।
गुणगण कमलाकर नमित सुरासुर, नारायण ब्रह्म सौख्य करो ॥

ॐ ह्रीं चतुर्दशप्रकीर्णकेभ्यो पूर्णार्घं।

शांति वृद्धि सुनरेन्द्रऋद्धि।
स्फूर्ति सुकीर्ति वरस्तु प्रलब्धि ॥
सत्कर्म सिद्धि धृतिमातिशंतु।
प्रकीर्णकज्ञानदरास्त्वकं वः ॥

इत्याशीर्वादः।

छप्पय।

सामायिक जिनस्तववन्दन जिन पूजनि हि जाणो।
प्रतिक्रमण मुनि विनय सुनय कृति कर्म वखाणो ॥
दशवैकालि नाम उत्तराध्ययन मन आणो।
कल्पव्यवहार सु नवम कल्पाकल्प वखाणो ॥
महापुण्डरीक सु महा-पुण्डरीक अशीति लह्या।
नारायण एवं वदंतं चौदप्रकीर्णक जिन कह्या ॥

इति चतुर्दश प्रकीर्णक पूजा समाप्तम्।

अथ चतुर्दश कुलकर पूजा ।

मतिज्ञानप्रगल्भांगान सुमनून् परमायुषः ।
संस्थापयामि सद्बुद्ध्यै प्रतिश्रुतिपूर्वकान ॥

ॐ ह्रीं प्रतिश्रुतिप्रमुखचतुर्दशकुलकराः अत्रावतरतावतरत । अत्र तिष्ठत तिष्ठत ठः ठः । अत्र मम सन्निहिता भवत भवत वषट् स्वाहा ।

यात्रं मन्दशृणोत्स्वमाञ्चन्द्रार्कज्योतिषां प्रभां ।
प्रतिश्रुतिः समाख्यातः पूज्यतेऽसौ गुणाग्रणीः ॥

ॐ ह्रीं प्रतिश्रुतिकुलकराय अर्घं० ॥ १ ॥

नक्षत्रांकितशुभ्राभ्रदर्शनाज्ज्योतिषां प्रभां ।
भीतिं न प्राप सन्मत्या सन्मतिः पूज्यते मया ॥२॥

ॐ ह्रीं सन्मतिकुलकराय अर्घं० ॥ २ ॥

क्षेमं चकार यो लोके प्रजानां भोगभुज्जुषां ।
क्षेमंकरत्वमाप्तोऽसौ पूज्यते पुण्यभाजनः ॥ ३ ॥

ॐ ह्रीं क्षेमंकरकुलकराय अर्घं० ॥ ३ ॥

क्षेमंधरो सदा लोके प्रजानां क्षेमधारणात् ।
जलाद्यष्टविधैर्द्रव्यैः पूज्यतेऽसौ प्रगल्भवाक् ॥ ४ ॥

ॐ ह्रीं क्षेमंकरकुलकराय अर्घं० ॥ ४ ॥

भोगभूमिजुषां नृणां सीमकृत्वा नरोत्तमः ।
सीमंकर इति ख्यातिं गतोऽसौ पूज्यते गुणी ॥ ५ ॥

ॐ ह्रीं सीमंकरकुलकराय अर्घं० ॥ ५ ॥

तरुभिः क्षेत्रमर्यादां यो करोद्भोगभुज्जुषां ।
सीमंधर इति ख्यातिं प्राप्तो सः चर्च्यते गुणी ॥ ६ ॥

ॐ ह्रीं सीमंधरकुलकराय अर्घं ॥ ६ ॥

वाहोप-देशकाकेऽस्मिन् ख्यातो विमलवाहनः ।
कमलाद्यष्टधाद्रव्यैः पूज्यते कमलापतिः ॥ ७ ॥
ॐ ह्रीं वाहनोपदेशकाय विमलवाहनकुलकराय अर्घं० ॥ ७ ॥

पुत्रास्यलोकसंदानाच्चक्षुष्मान् भवद्भुवि ।
भोगभूमिभवां योऽसौ पूज्यते गुणवान् प्रभुः ॥ ८ ॥
ॐ ह्रीं चक्षुष्मान् कुलकराय अर्घं० ॥ ८ ॥

भोगभूमिभवार्याणां संस्तुवात्परमादरात् ।
यशस्वदाख्यतां प्राप्तः पूज्यतेऽसौ मनोहरः ॥ ९ ॥
ॐ ह्रीं यशस्वान् कुलकराय अर्घं० ॥ ९ ॥

चंद्रेणाक्रीडयद्बालान् भोगभूमिभुवां मुदा ।
अभिचंद्राख्यतां प्राप्तः पूज्यते चंद्रमप्रभः ॥
ॐ ह्रीं अभिचंद्रकुलकराय अर्घं० ॥ १० ॥

हायनान्यजीवन्यस्मिन् राज्यं कुर्वंति भूतले ।
चंद्राभकोऽर्च्यते नित्यं भोगभूमिभुवांप्रजा ॥
ॐ ह्रीं चंद्राभकुलकराय अर्घं ॥ ११ ॥

राज्यं कुर्वंति सापत्या जीवंतिस्म चिरंप्रजाः ।
यस्मिन्मरुं वसुद्रव्यैः पूज्यते कमलादिभिः ॥
ॐ ह्रीं मरुदेवकुलकराय अर्घं० ॥ १२ ॥

भोगभूमिभुवामपत्यानां गर्भमलापहा ।
प्रसेनदितिति आख्या प्राप्तो सः चर्च्यते मया ॥
ॐ ह्रीं प्रसेनजित कुलकराय अर्घं० ॥ १३ ॥

नाभिरित्या प्रसंख्याति र्नाभिनालनिवर्तनात् ।
प्रजानां यो महाबुद्धिः पूज्यतेऽसौ मया मुदा ॥ १४ ॥
ॐ ह्रीं नाभिरायकुलकराय अर्घं ॥ १४ ॥

सद्वारिचंदनशुभाक्षतपुण्यपुष्प-
-नैवेद्यरत्नवरदीपसुधूपपुंगैः ।
अर्घं ददाति विजयार्द्दसुकीर्तिशिष्यो ।
नारायणः कुलकरेभ्य इह प्रमोदात् ॥
ॐ ह्रीं चतुर्दशकुलकरेभ्यः पूर्णार्घं० ।

अथ जयमाला ।

घत्ता ।

कमलाननरुचिरा गुणगणनिचिता नीलोत्पलदलनयनवरा ।
शुभमार्गविवर विभवा रतिपति समवा एते जयंतु कुलकरा पुरुषाः ॥
प्रतिश्रुति कुलकर गुणगण निधान. शुभ भोग भरांकृत परम मान ।
शुभ तारकिताभ्र समार्य भीत, विनिवारण सन्मति सरल चित्त ॥
वरभोग धराज मनुष्य लोक, कृत भावुक गत मल विगत शोक ।
कृत भोग धराज सु भव्यकार वर निर्मल भावुक नाम धार ॥३॥
सकलार्य महानग सीमकार, जगती जसु सीम कृत निहार ।
वर वृक्ष लता कृत सीम धार, धृत सीमंधर वर नाम भार ॥४
वर वाहन दर्शित विभव सार, विमलादि सु वाहन नाम धार ।
वर पुत्रानन लोकन सुदेश, विधि दानजु चक्षुष्मदाभिधेश ।५॥

सुयशस्वदिति प्रथिताभिधान, परमार्थानुति स्तुति धृत वितान ।
रमयन् सु प्रजावर चंद्रकेण, स्वभिचंद्र इति श्रुति मायतेन ॥६॥
वर चन्द्राभक इति नाम धार, सकलामल विधु सम कांतिभार ।
सुर राज समान मरु सु देव, चिरजीवन संततिकृत सु सेव ॥
सु प्रसेन विजिद्वर नाम धार, कृत बालक गर्भ पलापहार ।
वर नाभिराज नत नर समाज, कृत नाभि निवर्तन सुखसमाज॥

घत्ता ।

कुलकर वर देवा सुरकृत सेवा, भांतु वरिष्टसुगुणानिकरा ।
सु चतुर्दश संख्या मन बहु कांक्षा, भोगधराज सु सौख्य करा ॥

ॐ ह्रीं चतुर्दशकुलकरेभ्यो ऽर्घ्यमात्रा महार्घं ।

शांति समृद्धिं वरसौख्यवृद्धिं, बुद्धिं सुलब्धिं परमार्थसिद्धिं ।
स्फूर्तिं सुकीर्तिं वरपूजकानां, करोति नित्यं कुलभृत्समूहः ॥

इत्याशीर्वादः ।

छप्पा ।

प्रति श्रुति सन्मति नाम क्षेमंकर क्षेमंधर जाणो ।
सीमंकर सुख धाम सीमंधर बहु बखाणो ॥
विमलवाह वर चक्षु यशस्वदभिचन्द्र मनोहर ।
चन्द्राभक मरुदेव प्रसेनजित नाभि नरवर ॥
एह चतुर्दश कुलकरा भोगभूमिज कुल उद्धरण ।
नागादण एवं वदत आर्लोक बहु सुखकरण ॥

इतिश्री चतुर्दशकुलकर पूजा सम्पूर्ण ।

अथ चतुर्दश अतिशय प्रत्येक पूजा।

द्विसप्तसंख्यान्वरदेवनिर्मितान्,
सद्द्रव्यपूज्यातिशयान्मनोहरान् ।
आह्वाननस्थापनसन्निधापनै-
र्भक्त्या यजेऽहं विधिपूर्वकं प्रभो ॥

ॐ ह्रीं चतुर्दशातिशयात्रावतरावतर संवौषट् स्वाहा। अत्र तिष्ठ तिष्ठ ठः ठः। अत्र मम सन्निहितो भव भव वषट् स्वाहा।

सर्वार्द्धमागधीया वै भाषा यस्य प्रवर्तते।
पूज्यते परया भक्त्या पूजया परमादरात् ॥
ॐ ह्रीं सर्वार्द्धमागधीभाषावर्तभगवते अर्घ्यं ॥ १ ॥

मैत्रीह सर्वजनना विषया यस्य विद्यते।
पूज्यते परया भक्त्या पूजया परमादरात् ॥
ॐ ह्रीं मैत्रीयुक्ताय भगवते अर्घ्यं ॥ २ ॥

सर्वर्तुफलपुष्पाद्या भवेयुर्यस्य पादपाः। पूज्यते०।
ॐ ह्रीं सर्वऋतुफलपुष्पाद्यपादपाय जिनाय अर्घ्यं ॥ ३ ॥

आदर्शतलसंकाशं रत्नं यस्य प्रजायते। पूज्यते० ॥
ॐ ह्रीं आदर्शतलसन्निभरत्नोभूयुक्ताय भगवते अर्घ्यं ॥ ४ ॥

शीतो मंदः सुगंधिश्च वायुरन्वेति यं जिनं ॥ पूज्यते० ॥
ॐ ह्रीं सुगंधिवायुयुक्ताय जिनाय अर्घ्यं० ॥ ५ ॥

यस्मिन्विहरतीळायां जनानंदोऽभवत्सदा ॥ पूज्यते० ॥
ॐ ह्रीं सर्वजनानंदकराय जिनाय अर्घ्यं० ॥ ६ ॥

योजनांतरभूभागं देवाः कुर्वंति निर्मळं ॥ पूज्यते० ॥
ॐ ह्रीं निर्मळभूभागयुक्ताय जिनाय अर्घ्यं० ॥ ७ ॥

मेघाः कुर्वंति यस्योच्चैर्वृष्टिं गंधोदकात्मिकां ॥ पूज्यते० ॥
ॐ ह्रीं दिव्यगंधोदकवृष्टियुक्ताय जिनाय अर्घं० ॥ ८ ॥

सप्ताग्रे पृष्ठतः सप्तपद्मानि यत्पदे पदे ॥ पूज्यते० ॥
ॐ ह्रीं पद्मोपरि पादन्यासाय जिनाय अर्घं० ॥ ९ ॥

यस्य व्रीह्यादि युक्ताभूरभवद्यत्रभावतः ॥ पूज्यते० ॥
ॐ ह्रीं व्रीह्यादि यस्यसंपत्तियुक्ताय जिनाय अर्घं० ॥ १० ॥

यस्मिन्विहरतीहाभूद्गगनं मलवर्जितं ॥ पूज्यते० ॥
ॐ ह्रीं निर्मलगगनातिशययुक्ताय जिनाय अर्घं० ॥ ११ ॥

आह्वयंतिस्म चान्येऽन्यान् देवादेवान् सुभक्तितः ॥ पूज्यते० ॥
ॐ ह्रीं अन्यदेवाह्वाननयुक्ताय जिनाय अर्घं० ॥ १२ ॥

धर्मचक्रं भवेद्यस्य सहस्रारं सुसूर्यभं ॥ पूज्यते० ॥
ॐ ह्रीं धर्मचक्रयुक्ताय जिनाय अर्घं० ॥ १३ ॥

भृंगाराद्यष्टधा यस्य मंगलं चाभवत्सदा ॥ पूज्यते० ॥
ॐ ह्रीं अष्टमंगलद्रव्ययुक्तायजिनाय अर्घं० ॥ १४ ॥

जलादिगंधाक्षतपुष्पकाद्यै नैवेद्यकैर्दीपशतैः सधूपैः ।
फलैर्महार्घं प्रददाति शिष्यो नारायणः श्री विजयादिकीर्तेः ॥
ॐ ह्रीं चतुर्दशअतिशयप्राप्तेभ्यो जिनाय महार्घं० ॥

अथ जयमाला ।

सकलविबुधवंद्या देवदेवाभिनंद्याः ।
कृतदुरितनिकंदा भव्यपद्माभिनन्दाः ॥
अतिशयगुणवृंदा नष्टकर्मारिकंदा-
स्त्रिभुवनजनवंदास्ते जिनेंद्रा जयंतु ॥ १ ॥

शुद्धसर्वार्थसन्मागधी वागवादा ।
विश्वकर्मापहा निर्मळा निर्मदादा ॥
सर्वविद्याधिपा धर्मबुद्धिश्वरा ।
सत्वबाधातिगा मित्रता मंदिरा ॥ २ ॥

सर्वपुष्पांचितांगस्थितेः षट्पदैः ।
संस्तुता वा मुदुत्कर्षगैः स्वास्पदैः ॥
निर्मळादर्शतुल्याध्वभूमीश्वराः ।
सर्व भव्यार्च्यपादाब्ज देवेश्वराः ॥ ३ ॥

वायुरन्वेति यान् सद्विहारेश्वरां–
स्तानहं संस्तुवे सिद्धिगामीश्वरान् ॥
सर्वभव्यार्चितान् भव्यमुक्तारिणो ।
दर्शनज्ञानचारित्रसद्धारिणः ॥ ४ ॥

देवदेवाशुभं कुर्वते भूतले ।
शांतधूळी तृणं शांतकीटोपलं ॥
देवदेवाज्ञया कुर्वते निर्मळा ।
मंदगंधोदकां वृष्टिमामोदकां ॥ ५ ॥

देवदेवाधिपाः पद्मसंचारिणः ।
शुद्धभावं गताः सर्वशंकारिणः ॥
भूश्च येषामभूभव्यशाल्यन्विता ।
देवदेवीभभृत्यंगिभिः संस्तुता ॥ ६ ॥
निर्मळं खं सरोवासरं जळामयं ।
यद्विहारे भवत्सर्वदिग्मंडलं ॥

देवदेवीगणा व्यंतराः किन्नरा ।
यद्विहारेऽग्रगामि नः सन्पुत्सुकाः ॥ ७ ॥
दर्पणाद्यष्टधामंगलैर्भक्तितः ।
पूजिता देवदेवीगणैः शक्तितः ॥ ८ ॥

घत्ता ।

श्रीजिनवरदेवाः सुरकृतसेवा अतिविशेषगुणगणनिकराः ।
विकथादिसुकीर्तैरनुपममूर्तैः शिष्यनरायणसौख्यकराः ॥
ॐ ह्रीं चतुर्दशातिशयेभ्यो महार्घं० ॥

सकलदेवमनुष्यगणार्चिताः सकलकर्ममदोद्धति वर्जिताः ।
सकलसत्वदयानिधिसंस्तुता सकलसंघसुखाय भवंतु ते ॥

इत्याशीर्वादः ।

छप्पा ।

मागधी भाषा मित्री ऋतुफलमही मनोहर ।
अनुगत अलि आनंद सुरनर कृत भूमि सुंदर ॥
गंधोदक वर पद्म शालि सुक्षेत्र अनोपम ।
निर्मल गगन सुदेव सेव वर चक्र अनोपम ॥
मंगलाष्ट दर्पण प्रमुख एव अपूर्व वखाणीए ।
नारायण एवं वदति अतिशय चउद वखाणीए ॥

इति चतुर्दशातिशय पूजा संपूर्ण ।

अथ चतुर्दश पूर्वाणाम् प्रत्येक पूजा।

देवदेववक्त्रपद्मनिर्गतानि संवदे।
संस्तुतानि चन्द्रवेन्द्रनागमानुषेन्द्रकैः॥
भुक्तिमुक्तिसारसौख्यदायि पूर्वकाणि च।
स्थापयामि मोदतः सुभक्तितश्चतुर्दश॥

ॐ ह्रीं श्रीजिनमुखोद्भवचतुर्दशपूर्वाणि अत्रावतरावतर संवौषट् अत्र तिष्ठ २ ठः ठः। अत्र मम सन्निहितो भव भव वषट्॥

आद्यमुत्पादपूर्वं वैचैककोटी प्रमाणकं।
यजेऽहमष्टधाद्रव्यैर्जलचन्दनमुख्यकैः॥

ॐ ह्रीं एककोटीपदप्रमाणाय उत्पादपूर्वांगाय जलादिकं०॥ १॥

अग्रायणीयपूर्वं वै लक्षपणमति प्रभं। यजेऽहं०॥

ॐ ह्रीं षणवतिलक्षपदप्रमाणाय अग्रायणी पूर्वाय जलादिकं०॥२॥

वीर्यानु सुप्रवादं च प्रोक्तं सप्ततिलक्षकं। यजेऽहं०॥

ॐ ह्रीं सप्ततिलक्षपदप्रमाणवीर्यानुवादपूर्वाय जलादिकं०॥३॥

अस्तिनास्तिप्रवादं वै षष्टिलक्षप्रमाणकं। यजेऽहं०॥

ॐ ह्रीं षष्टीलक्षपदप्रमाण अस्तिनास्ति पूर्वाय जलादिकं॥४॥

ज्ञानप्रवादसत्पूर्वं व्येककोटीप्रमाणकं। यजेऽहं०॥

ॐ ह्रीं एकोनकोटीपदप्रमिताय ज्ञानप्रवादपूर्वाय जलादिकं०॥५॥

षड्भिः संयुक्तकोट्योक्तं सत्यप्रवादपूर्वकं। यजेऽहं०॥

ॐ ह्रीं षडधिककोटीपदप्रमाणा सत्यप्रवादपूर्वाय जलादिकं॥६॥

आत्मप्रवादपूर्वं वै कोटीषड्विंशतिः स्मृतं। यजेऽहं०॥

ॐ ह्रीं षडविंशति कोटीपदप्रमाण आत्मप्रवादपूर्वाय जल०॥७॥

कर्मप्रवादपूर्वं चाशीतिलक्षाधिककोटिकं । यजेऽहं० ॥

ॐ ह्रीं अशीतिलक्षाधिककोटीपदप्रमाणकर्मप्रवादपूर्वाय जला०॥८

प्रत्याख्यानं हि पूर्वं च चतुरशीतिलक्षकं । यजेऽहं० ॥

ॐ ह्रीं चतुरशीतिलक्षपदप्रमाण प्रत्याख्यानपूर्वाय जलादिकं०॥९

पृथुविद्यानुप्रवादं षष्ठीलक्षद्विकोटिकं । यजेऽहं० ॥

ॐ ह्रीं षष्ठीलक्षद्विकाधिकद्विकोटीपदप्रमाणविर्यानुवादपूर्वाय जलादिकं ॥ १० ॥

कल्याणनामधेयं च षड्विंशति हि कोटिकं । यजेऽहं० ॥

ॐ ह्रीं षड् विंशतिकोटीपदप्रमाणकल्याणवादपूर्वाय जलादिकं०॥

प्राणानुवादसत्पूर्वं कोटयस्ति हि त्रयोदशं । यजेऽहं० ॥

ॐ ह्रीं त्रयोदशकोटीपदप्रमाणप्राणानुवादपूर्वाय जलादिकं० ॥

क्रियाविशालपूर्वं च नवकोटीप्रमाणकं ॥ यजेऽहं० ॥

ॐ ह्रीं नवकोटीपदप्रमाणक्रियाविशालपूर्वाय जलादिकं० ॥१३॥

लोकबिंदुसुपं पूर्वं सार्द्धद्वादशकोटिकं ॥ यजेऽहं० ॥

ॐ ह्रीं सार्द्ध द्वादशकोटीपदप्रमाणलोकबिंदुपूर्वाय जलादिकं० ॥

अतिसुरभिजलौघैश्चंदनैरक्षतौघै-
र्बकुलचरुसुदीपैर्धूपकैर्नालिकेरैः ॥
मुनिविजयसुकीर्तेः पादसेवाभिशक्तो ।
यजति सकलपूर्वाणीह नारायणाख्यः ॥

ॐ ह्रीं चतुर्दशपूर्वेभ्यः पूर्णार्घं ॥

अथ जयमाला।

श्री जिनवरवाणी गुणगणखाणी, अमीय समान सोहामणिय।
मिथ्यामत रहिता बहुगुणसहिता, गंभीर मधुररलीयरमणिय॥
सुउठविकंठवि रहित अभंग, सुअंग विवेदवि सहित सु चंग।
सुमतिपूर्वक आगम सुविशाळ, ते पूजो चउद पूरव गुणमाळ॥
सु एक अनेक अरथ गुण खाण, सु एक मना थई सुण हो सुजाण।
सु शीतळ चंद्र कळासु विशाळ, ते पूजो चउदह पूरव गुणमाळ॥
सुद्रव्यप्रकाशन निर्मल तेज, सु भवियण जन मन उपजे हेज।
कुज्ञान तिमिर नाशन सुविशाळ, ते पूजो चउद पूरव गुणमाळ॥
सु पहेलो उपपाद पूर्व सु जाण, सु दुजो अग्रायणीय वखाण।
सु त्रीजो वीर्यानुवाद विशाळ, ते पूजो चउद पूरव गुणमाळ॥
सु चोथो अस्ति नास्ति सुचंग, सु पांचमो ज्ञान प्रवाद अभंग।
सु छट्ठो सत्य प्रवाद विशाळ, ते पूजो चउद पूरव गुणमाळ॥
सु सातमो आत्म प्रवाद सुसंत, सु आठमो कर्मप्रवाद अनंत।
सु नवमो प्रत्याख्यान विशाळ, ते पूजो चउद पूरव गुणमाळ॥
सु दशमो पृथु विद्यानुप्रवाद, सु अग्यारमो कल्याण नाम सुवाद।
सु बारमो प्राणानुवाद विशाळ, ते पूजो चउद पूरव गुणमाळ॥
सु तेरमो क्रियाविशाळ आख्येय, सु चौदमो लोकबिंदु वरध्येय।
सु जिनवर गणधर कथित विशाळ, ते पूजो चउद पूरव गुणमाळ॥

घत्ता ।

मिथ्यात्व तिमिर हर बोध दिवाकर पढे गणे जे भाव धरी।
नारायण भासे तत्व प्रकाशे मनवांछित फल लछी घणी ॥
ॐ ह्रीं चतुर्दशपूर्वेभ्यो जयमाला महार्घं० ॥

श्रीमज्जिनेंद्रमुखपंकजनिर्गतानि ।
धर्मार्थकामफलदानि सुपूर्वकानि ॥
सत्पूजकं प्रमुखसंघजनस्य नित्यं
देवेंद्र मानुष नुतानि भवंतु लोके ॥

॥ इत्याशीर्वादः ॥

छप्पा ।

उत्पाद अग्रायणी नाम त्रिजोवीर्यानुवादह ।
अस्तिनास्ति सुखधाम ज्ञान सु सत्य प्रवादह ॥
आतमकर्म प्रवाद नवम सु प्रत्याख्या यह ।
पृथु विद्यानुप्रवाद कल्याण सु पाणावायह ॥
क्रिया विशाल सु लोकबिंदु चउद पूरवह जाणीए ।
नारायण ब्रह्मचारी कहे, जिन सिद्धांत वखांणीए ॥

इति चतुर्दश पूर्वाणां पूजा समाप्त।

अथ चतुर्दश गुणस्थान पूजा ।

गुणस्थानानि पूर्वाणि भाषितानि जिनेश्वरैः ।
संस्थापयामि सद्बुद्ध्या विधिनाहं चतुर्दशं ॥

ॐ ह्रीं चतुर्दशगुणस्थानानि अत्र अवतरावतर संवौषट्, अत्र तिष्ठ तिष्ठ ठः ठः, अत्र मम सन्निहितो भव भव वषट् स्वाहा ॥

मिथ्यात्वेनं तता प्राप्ता ये जीवा भव्यतां गता । ?
पूजयामीह सद्भक्त्या जलादिभिरमैः शुभैः ॥

ॐ ह्रीं मिथ्यात्वगुणस्थानस्थितानंत भव्य जीवराशये जलादिकं० ॥ १ ॥

षडावलिसमायुष्का ये च सासादना स्मृताः । पूजयामी० ॥

ॐ ह्रीं सासादनगुणस्थानवर्तिसम्यग्दृष्टिजीवराशये जलादिकं० ॥

ये जीवाः श्रीजिनैः प्रोक्तास्तृतीयस्थानवर्तिनः । पूजया० ॥

ॐ ह्रीं मिश्रगुणस्थानस्थितभव्यजीवराशिभ्यो जलादिकं० ॥३॥

तत्वार्थश्रद्धया युक्ता ये सम्यग्दृष्टयो मताः । पूजया० ॥

ॐ ह्रीं अविरतगुणस्थानस्थितसम्यग्दृष्टि भव्यराशिभ्यो जलादिकं० ॥ ४ ॥

देशव्रतसमायुक्ता ये जीवाः शुद्धमानसाः । पूजया० ॥

ॐ ह्रीं देशव्रतगुणस्थानस्थितभव्यराशिभ्यो जलादिकं० ॥५॥

प्रमत्तमुनयो ये वै दृगविद्याचारित्रधारकाः पूजया० ॥

ॐ ह्रीं प्रमत्तगुणस्थानस्थितमुनिभ्यो जलादिकं० ॥ ६ ॥

प्रमादरहिता ये चाप्रमत्तामुनिपुंगवाः । पूजया० ॥

ॐ ह्रीं अप्रमत्तगु[illegible]भ्यो जलादिकं० ॥ ७ ॥

अपूर्वकरणा ये वै मच्छ्रेणिद्वयसुस्थिताः । पूजया० ॥
ॐ ह्रीं अपूर्वकरणगुणस्थानश्रेणिद्वयमुनिभ्यो जलादिकं० ॥ ८ ॥
करणानाप निवृत्तेस्त्वनिवृत्ताश्च ये स्मृताः । पूजया० ॥
ॐ ह्रीं अनिवृत्तिकरणगुणस्थानस्थितमुनिभ्यो जलादिकं० ॥९॥
मत्सूक्ष्मसांपरायस्था ये लिंगत्रयवर्जिताः । पूजया० ॥
ॐ ह्रीं सूक्ष्मसांपरायस्थितमुनिभ्यो जलादिकं० ॥ १० ॥
उपशांतकषायस्था ये नराः कश्मलोभिताः । पूजया० ॥
ॐ ह्रीं उपशांतकषायस्थितमुनिराशिभ्यो जलादिकं० ॥ ११ ॥
क्षीणाः कषाया येषां वै द्वादशस्थानवर्तिनः । पूजया० ॥
ॐ ह्रीं क्षीणकषायगुणस्थानस्थितमुनिराशये जलादिकं० ॥१२॥
घातिकर्मक्षयाद्ये च केवलज्ञानधारकाः । पूजया० ॥
ॐ ह्रीं सयोगकेवलीगुणस्थानस्थितमुनिभ्यो जलादिकं० ॥१३॥
अ इ उ ऋ ऌ स्वायुष्काश्चतुर्दशगुणाधिपाः । पूजया० ॥
ॐ ह्रीं चतुर्दशगुणस्थानवर्तिमुनिभ्यो जलादिकं० ॥ १४ ॥

जलादिचन्दनमवक्षतपुष्पचारु ।
नैवेद्यदीपवरधूपफलैर्महार्घं ॥
नारायणो विजयकीर्तिगुणप्रसादात् ।
यच्छ्यनर्घममलं मुनिपुंगवेभ्यः ॥

ॐ ह्रीं चतुर्दशगुणस्थानस्थितभव्यजीवेभ्यो महार्घं० ॥

अथ जयमाला ।

सिरि गुणगण ठाणा अमिय समाणा भवियण मुनिवर बोधकरा।
अइ सुमइ णिहाणा मुणिपणमाणा कुमइविणासण दुरियहरा ॥१॥
पठम मिथ्यातह ठाण यहिं भव्व राशि अणंत।
जिणेसर देव कहा।
चउदसि बावण गणहर मुणिवर भव्व कहा ते वदामि य निम्मल
निस्सय सिद्ध पहा ॥ २ ॥
सासादण वर दिट्ठि भणा एक सम कोडि चार।
जिणेसर देव कहा।
चउदसि बावण गणहर मुनिवर भव्व कहा—ते वंदामिय निम्मल
निस्सय सिद्ध पहा ॥ ३ ॥
तिदिय ठाणे णाण मणवरा दो पंचासय कोडि—
जिणेसर देव कहा। चउदसि बावण० ॥ ४ ॥
अविरदथि सय सत्त कोडि समकितवंत पहन्न जिणेसर देव कहा।
चउदसि बावण० ॥ ५ ॥
देस विरद वर सावयए तेरइ कोडपमाण जिणेसर देव कहा।
चउदसि बावण० ॥ ६ ॥
रस खदु अठंकर यणंकड बाण सराण पमत्त जिणे सर देव कहा।
चउदसे बावण० ॥ ७ ॥
रयणख चंदण वइरसहि णवदोसत्तम ठाण जिणेसर देव कहा।
चउदसे बावण० ॥ ८ ॥
अठय ठाणे मुणिव सहा, पूजंता भयहाणि जिणेसर देव कहा।
चउदसे बावण० ॥ ९ ॥

अणियट्टिवर गणयहि मुणिवर गुणगण ठाण जिणेसर देव कह्या।
चउदसे बावण ॥ १० ॥

सुहुमे ठाणे मय रहिता जाण अणुवयपाप जिणेसर देव कह्या।
चउदसे बावण० ॥ ११ ॥

एकादह वर ठाणम्मियें उवसम पच्च कसाय जिणेसर देव कह्या।
चउदसे बावण० ॥ १२ ॥

क्षीण कसाय सु द्वादसवें पंच महव्वय धार जिणेसरदेव कह्या।
चउदसे बावण० ॥ १३ ॥

सयोगेवर केवलीए परम पयत्थ पकास जिणेसर देव कह्या।
चउदसे बावण० ॥ १४ ॥

पंच लहु खर ठिदि धरए कम्म रहिन जिणदेव जिणेसरदेव कह्या
चउदसे बावण० ॥ १५ ॥

घत्ता।

इह चउदह गणे मुणिकयजाणे तत्तपमाणे दुरिय हरे।
सिरि विजय सुकीत्ति अविचल तुत्ति सिहम नरायण सुमइकरे ॥

ॐ ह्रीं चतुर्दशगुणस्थानस्थित भव्यराशिभ्यो जलादिकं०।

लक्षाण्यष्टतथाष्टभिर्नवतिरुक्तासा सहस्राहताः।
पंचाव्येकशतानि चोत्तरय मन्येते जिनाः कीर्तिताः॥

सांयांताष्टमुख्याश्च षड्क नवकामध्ये सदंक त्रिताः।
सर्वे ते मुनयो दिशंतु भवतां भूरिश्रियं वंदिताः॥

॥ इत्याशीर्वादः ॥

छप्पा ।

मिछा सासादय दिठि मिस्स अविरय गुण ठाणइ ।
देसविरय परमत्त सत्तम उपमत्त बषाणइ ॥
अपूव्वकरण अनिवत्त सुहम सांपराय सु जाणइ ।
उवसंतइ खीण कसाय जोग अजोग पमाणइ ॥
चउदह ठाणा णामसु जिणवर मणहर मुणिमण्या ।
नारायण ब्रह्मचारी कहिं भव्य जीव श्रवणे सुण्या ॥

इति चतुर्दश गुणस्थान पूजा समाप्त ।

अथ चतुर्दश मार्गणा पूजा ।

गत्यादिभेदतः संति चतुर्दश सुमार्गणाः ।
आह्वानयामि सद्भक्त्या जैनसिद्धान्तमार्गतः ॥

ॐ ह्रीं चतुर्दशमार्गणात्रावतरावतर संवौषट् अत्र तिष्ठ तिष्ठ ठः ठः, अत्र मम सन्निहितो भव भव वषट् स्वाहा ॥

स्वर्गादिगतिहेतूनां देशको ये गतस्मयाः ।
यजेऽहमष्टधा द्रव्यैर्मार्गणाश्रितमानसान् ॥

ॐ ह्रीं स्वर्गादिगतिहेतूपदेशकेभ्यो जलादिकं० ॥ १ ॥

एकेन्द्रियादिजीवानां ये वै रक्षणतत्पराः । यजे० ॥

ॐ ह्रीं एकेंद्रियादिजीवरक्षकेभ्यो जलादिकं० ॥ २ ॥

पृथिवीकायिकादीनां रक्षणे लुब्धमानसाः । यजे० ॥

ॐ ह्रीं षट्कायरक्षकमुनिभ्यो जलादिकं० ॥ ३ ॥

मनोवाक्काययोगानां हेयाहेयप्रकाशकान् । यजे० ॥

ॐ ह्रीं योगमार्गणाप्रकाशकेभ्यो जलादिकं ॥ ४ ॥

वेदत्रयविमुक्तानां पूर्णसंयमशालिनः ॥ यजे० ॥
ॐ ह्रीं वेदत्रयरहितमुनिभ्यो जलादिकं० ॥ ५ ॥

कर्महेतुकषायाणां ये नरा भेदने वराः । यजे० ॥
ॐ ह्रीं कषायविध्वंसकेभ्यो जलादिकं० ॥ ६ ॥

ज्ञानोपयोगयुक्ता ये मुनींद्रा मानवर्जिताः । यजे० ॥
ॐ ह्रीं ज्ञानोपयोगयुक्तजिनेभ्यो जलादिकं० ॥ ७ ॥

संयमोद्धरणे दक्षाः संयमानां प्रकाशकाः ॥ यजे० ॥
ॐ ह्रीं सामायिकसंयमोद्धारकमुनिभ्यो जलादिकं० ॥ ८ ॥

चक्षुर्णां दर्शनानां ये ज्ञायका मुनयो वराः ॥ यजे० ॥
ॐ ह्रीं चक्षुरादिदर्शनज्ञापकेभ्यो मुनिभ्यो जलादिकं० ॥ ९ ॥

शुक्ललेश्यारता ये च लेश्याषट्कोपदेशकाः ॥ यजे० ॥
ॐ ह्रीं षट्लेश्योपदेशकेभ्यो जिनेभ्यो जलादिकं० ॥ १० ॥

भव्याभव्यप्रभेदज्ञाः ज्ञानध्यानधनाश्च ये ॥ यजे० ॥
ॐ ह्रीं भव्याभव्यमार्गणाप्रकाशकेभ्यो जलादिकं० ॥ ११ ॥

सम्यक्त्वादि गुणोपेता ये सम्यक्त्वप्रकाशकाः ॥ यजे० ॥
ॐ ह्रीं सम्यक्त्वोपदेशकेभ्यो जलादिकं० ॥ १२ ॥

संज्ञासंज्ञिप्रभेदानां मार्गणा ये रताः सदा ॥ यजे० ॥
ॐ ह्रीं संज्ञासंज्ञिमार्गणाभेदकथकेभ्यो जलादिकं० ॥ १३ ॥

आहारमार्गणोद्युक्ता ये तद्भेदप्रकाशकाः ॥ यजे० ॥
ॐ ह्रीं आहारकमार्गणोपदेशकेभ्यो जलादिकं० ॥ १४ ॥

गत्यादिवेदपृथिवीमित मार्गणाश्रिताः ।
संसारसागरसमुत्तरणैकनिष्ठिताः ॥

अर्घेण रत्नवरभाजनसुस्थितेन तान्।
नारायणो यजति भक्तिभरेण सन्मुनीन् ॥
ॐ ह्रीं चतुर्दशमार्गणेभ्यो महार्घं ।

अथ जयमाला ।

पणविवि जिणदेवा, सुरकयसेवा, पुणु पणविवि मुणिणाण घणा।
चउदश वर मगणा, जिण गणहरभणा, ता कहामि सुणु भव्वजणा।

सुरगइ णरगइ तिरिय णाय गइ णायहरा।
इन्द नरिंद फणिंद सुचन्द तिलोय वरा॥
ते वंदामिय सामिय णिम्मल भावधरा।
पुणु पणमामिय सत्तिय भत्तिय भाव मुदा॥ २॥

फासण रासण, घाण णयण, वरकणमया।
सत्ताविसदि माणाविजय इन्दिय विसया॥ ते वंदामि० ॥३॥
पुढवी आइसु थावर तस्स दया विमला।
इरिया जुमंतर दिठिम सुछिय पय कमला॥ ते वंदामि० ॥४॥
मणवय काय तिण्णिमित जोग सुभेय करा।
अणुभय भासयमासिय तचाय मणहरा॥ ते वंदामि० ॥५॥
पुरुस चेयथीवेय नपुंसयवेय वहा।
झाणवणासिय कम्मपभासिय मुत्ते पहा॥ ते वंदामि० ॥६॥
कुछिय कोह कुपाण कुमाया लोह जया।
णिज्जिय हासरदीरदिसाकहु मत्त भया॥ ते वंदामि० ॥७॥
कुमइ सुमइ मणपज्जय णाणुवदेमवरा।
केवलणाण पकासिय भासिय अट्ठवरा॥ ते वंदामि० ॥८॥

सामाइयादिय संजम खयकय कम्मगणा ।
दीव धुणी पयिबोहिय सोहिय भव्व जणा ॥ ते वंदामि० ॥९॥
वर कुस्मादिय दंसण भेय पकास करा ।
केवल दंसण पेक्खिय लोय अलोय वरा ॥ ते वंदामि० ॥१० ॥
सुक्क सुपउपक वोत .... ।
लेस्सा छक्खयभेय पभासण भव्व हिदा ॥ ते वंदामि० ॥११॥
भव्व सु मग्गण मग्गिय भव्व सु जीव जणा ।
भव्व भवोदहि तारण णाव समाण मणा ॥ ते वंदामि० ॥ १२॥
मिच्छत्तादि सम्मत्त पयार पयास बुहा ।
जिय मय जिय उठ सग्ग पमाद खुहाय मुहा । ते वंदामि० ॥१३
सणमग्गण दरिसय सणिय जीव पहा ।
दुट्ठ कम्मट्ठ गयट्ठ विहट्टण सिंह जहा ॥ ते वंदामि० ॥१४॥
आहारय मग्गण दरिसय आहारह जीव पहा ।
विग्गहगइ अणाहारय संसण वोहवहा ॥ ते वंदामि० ॥१५॥

घत्ता ।

सिरि जिण मुणि वन्दा, णयणाणन्दा भव्वकुमुयवर बोहकरा ।
सिरि विजय मुणिंदा पापणिकन्दा, सिस्स नरायण दुरिय हरा॥

ॐ ह्रीं चतुर्दशमार्गणोपदेशकेभ्यो पूर्णार्घं० ।

तीर्थंकरा गणधरा मुनीपुंगवा नः ।
श्रीमज्जिनेन्द्र वरयज्ञ विधिप्रणिष्ठाः ॥
कारुण्यबुद्धिकलिताशयभव्यसार्था ।
नरायणेन महिताः प्रदिशंतु भव्यं ॥

॥ इत्याशीर्वादः ॥

छप्पय ।

चउगइ इंद्रिय पंच काय फुनि छक्क भणिजे ।
पणदस जोग पमाण वेय फुनि तीन्ह गणीजे ॥
चउकसाय फुनि णाण संयम फुनि दंसण चउक्कह ।
लेस्सा छक्क वखाण भव्व फुनि सम्मक वन्तह ॥
सणि आहारय णायसे चउदस मग्गण जाणीए ।
नारायण वाणी वदन्त जिन सिद्धांत वखाणीए ॥

इति चतुर्दशमार्गणा पूजा समाप्तम् ।

अथ चतुर्दश जीवसमास पूजा ।

द्विसप्तसंख्यत्वरजीवसमासरक्षा-
नेकेन्द्रियप्रमुखजीवविवेकदक्षान् ॥
नागेन्द्रचन्द्रमनुजेन्द्रसुरेन्द्रवक्षान् ।
संस्थापयामि विधिना वृषतीर्थनाथान् ॥

ॐ ह्रीं चतुर्दशजीवसमासरक्षकमुनिगणा अत्रावतरावतर संवौषट् । अत्र तिष्ठ२ ठः ठः । अत्र मम सन्निहितो भव भव वषट् स्वाहा ।

पर्याप्तपार्थिवानां ये जीवानां रक्षणोद्यताः ।
संपूजयामि तान् भक्त्या सद्द्रव्यैः कमलादिभिः ॥

ॐ ह्रीं पर्याप्तपृथ्वीकायिकजीवरक्षकेभ्यो जलादिकं० ॥ १ ॥

अपर्याप्तकजीवानां पार्थिवानामहिंसकाः ।
संपूजयामि तान् भक्त्या सद्द्रव्यैः कमलादिभिः ॥

ॐ ह्रीं पर्याप्तकअपकायिकजीवरक्षकेभ्यो जलादिकं० ॥ २ ॥

अप्कायिकाख्यपर्याप्तसत्त्वरक्षणतत्पराः । संपूज० ॥
ॐ ह्रीं पर्याप्तकअपकायिकजीवरक्षकेभ्यो जलादिकं० ॥ ३ ॥
अपर्याप्ताख्य जीवानां जलानां ये प्ररक्षकाः । संपूज० ॥
ॐ ह्रीं अपर्याप्तकाप्कायिकजीवरक्षकेभ्यो जलादिकं० ॥४॥
तैजस्कायिकजीवानां पर्याप्तानां दयापराः । संपूज० ॥
ॐ ह्रीं पर्याप्तकतैजस्कायिकजीवरक्षकेभ्यो जलादिकं० ॥५॥
तैजसानामपर्याप्तसत्वानां ये दयान्विताः । संपूज० ॥
ॐ ह्रीं अपर्याप्तकतैजस्कायिकजीवरक्षकेभ्यो जलादिकं० ॥६॥
पर्याप्तकाख्यवायूनां रक्षणे ये हि तत्पराः । संपूज० ॥
ॐ ह्रीं पर्याप्तकवायुकायिकजीवरक्षकेभ्यो जलादिकं० ॥ ७ ॥
अपर्याप्तकवायूनां रक्षा संसक्तमानसाः । संपूज० ॥
ॐ ह्रीं अपर्याप्तकवायुकायिकजीवरक्षकेभ्यो जलादिकं० ॥८॥
वनस्पतिसमुद्भुत पर्याप्तांगिप्रपालकान् । संपूज० ॥
ॐ ह्रीं पर्याप्तकवनस्पतिजीवरक्षकेभ्यो जलादिकं० ॥ ९ ॥
वनस्पतिसमुत्पन्नापर्याप्तांग्यप्रपालकान् संपूज० ॥
ॐ ह्रीं अपर्याप्तकवनस्पतिजीवरक्षकेभ्यो जलादिकं० ॥१०॥
द्वींद्रियादि त्रयाणां ये पर्याप्तानां प्रपालकाः । संपूज० ॥
ॐ ह्रीं पर्याप्तद्विंद्रीयादिविकलत्रयरक्षकेभ्यो जलादिकं० ॥११॥
अपर्याप्तकभेदानां रक्षका विकलात्मनां । संपूज० ॥
ॐ ह्रीं अपर्याप्तकद्विन्द्रीयादिविकलत्रयजीवरक्षकेभ्यो जला० ॥१२
ये प्ररक्षंति पंचाक्षान् पर्याप्तभेदभाजिनः । संपूज० ॥
ॐ ह्रीं पर्याप्तकपंचेन्द्रीयजीवरक्षकमुनिभ्यो जलादिकं० ॥१३॥
अपर्याप्तक पंचाक्षप्राणरक्षणवर्तिनः । संपूज० ॥
ॐ ह्रीं अपर्याप्तकपंचेन्द्रियजीवरक्षकमुनिभ्यो जलादिकं० ॥१४

द्विसप्तसंख्यवरजीवसमासरक्षा-
नेकेन्द्रीयप्रमुखसत्त्वविवेकदक्षान् ।
संपूजयामि कमलप्रमुखैर्मुनींद्रान्-
द्रव्यैरहं विजयकीर्तिमुनींद्रशिष्यः ।

ॐ ह्रीं चतुर्दशजीवसमासरक्षकेभ्यो महार्घं ।

अथ जयमाला ।

णासियमय ठाणे, चउविहणाणे, झाणट्ठिय णियमय कमले ।
जीव चउद्द समासे, विविह पकासे, णिम्मल भासे मुणि विमले ॥

पुढवी पज्जय भेय विवेय करं सुकरं ।
तह अपज्जय भेय विवेय करं पवरं ॥
तं वन्दे सिरणामिय सामिय पापहरं ।
पुणु पणमामिय गणहर मुणिवर साहु भरं ॥ १ ॥

अपसु पज्जय जीय विणीयमणो विमळं ।
तह अपज्जय सत्तय सत्त मणो कमळं ॥ तं वंदे० ॥ २ ॥

तेउ सुभेउ पभायि पज्जय भेय वरं ।
तह अपज्जय तेउ सुभेउ उपमाणकरं ॥ तं वंदे० ॥ ३ ॥

पज्जय वायु सुभाउ अमेय पमेय धरं ।
तह अपज्जय वाउ सुकाउविदेशहरं ॥ तं वंदे० ॥ ४ ॥

वणप्फदि पज्जय जीव समासय भीदिहरं ।
तह अपज्जय वणप्फदिसत्तय संतिकरं ॥ तं० वंदे० ॥ ५ ॥

पज्जय छिंदिय तिदिय चउरिंदि भेय वयं ।
तह अपज्जय छिति चउरिंदिय सत्त दयं ॥तं वंदे०॥६॥
पज्जय पंचवि इंदिय जीउवि भेदहरं ।
तह अपज्जय सणि असणिय संतिकरं ॥ तं वंदे०॥७॥

घत्ता ।

सिरि गणहर मुणिवर, साहु सयमधर जीउ समास पयास करा।
सिरि विजय सुरीसा गुणगणइसा सिस्स नारायण दुरिय हरा॥

ॐ ह्रीं चतुर्दशजीवसमासरक्षकमुनिभ्यो महार्घं ।

श्रीमद्गणाधिपतयो यतयो मुनीशाः ।
सत्साधवो विबुधवृन्दविवन्द्यधीशाः ॥
सच्छास्त्रपाठपठनोद्यतपाठकेशाः ।
क्षेमं दिशन्तु यजते भजते गिरीशाः ॥

॥ इत्याशीर्वादः ॥

छप्पय ।

पुढवी अप्पह तेज वायु फुनि तरुकय भेयह ।
एक विइंदिय भेय गोय फुनि तिंदिय वे यह ॥
चउरिंदिय फुनि जात खात विकलत्तय णामह ।
सणि असणि गणभात पञ्च इंदिय सुधामह ॥
सत्तह पज्जय भेयस्सु सत्त अपज्जय जाणीये ।
नारायण ब्रह्मचारी कहे, चउदह जीव वखाणीये ॥

इति चतुर्दश जीवसमास पूजा समाप्तम् ।

अथ चतुर्दश नदी पूजा ।

जम्बूपलक्षिते द्वीपे नद्यश्चतुर्दशस्मृताः ।

आह्वानयामि ताः सर्वा गंगाद्या मंगलप्रदाः ॥

ॐ ह्रीं गंगादिचतुर्दशनद्योऽत्रावतरावतर संवौषट्, अत्र तिष्ठ तिष्ठ ठः ठः, अत्र मम सन्निहितो भव भव वषट् स्वाहा ॥

गंगा हिमवदुद्भूतां जिनबिंबसमन्वितां ।

सलिलाद्यष्टधाद्रव्यैः पूजयामि प्रभक्तितः ॥

ॐ ह्रीं जिनबिंबसमन्वित गंगानद्यै जलादिकं० ॥ १ ॥

सिन्धुहिमवदुद्भूतां जिनबिम्बसमन्वितां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितसिन्धुनद्यै जलादिकं० ॥ २ ॥

रोहित हिमवद्जातां जिनबिम्बसमन्वितां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितरोहितायै जलादिकं० ॥ ३ ॥

महाहिमवदुद्भूतां रोहितास्यां जिनान्वितां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितरोहितास्यायै जलादिकं० ॥ ४ ॥

महाहिमदुद्भूतां हरितां जिनसंयुतां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितहरिते जलादिकं० ॥ ५ ॥

निषधाचलसम्भूतां हरिकांतां जिनांकितां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितहरिकांतायै जलादिकं० ॥ ६ ॥

निषधाचलसम्भूतां सीतां श्रीजिनसंश्रितां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितसीतानद्यै जलादिकं० ॥ ७ ॥

नीलभूभृत्समुत्पन्नां सीतोदां प्रतिमान्वितां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितसीतोदानद्यै जलादिकं० ॥ ८ ॥

नीलभूभृत्समुत्पन्नां नारीं प्रतिममांकितां । सलिला० ॥

ॐ ह्रीं जिनबिम्बसमन्वितनारीनद्यै जलादिकं० ॥ ९ ॥

रुक्म्यद्रिप्रोत्थितां रम्यां नरकांतां जिनान्वितां । सलिला० ॥

ॐ ह्रीं जिनबिंबसमन्वितनरकांतानद्यै जलादिकं० ॥१०॥

रुक्मिपर्वतसंभूतां सुवर्णकूलसंज्ञिका । सलिला० ॥

ॐ ह्रीं जिनबिंबसमन्वितसुवर्णकुलानद्यै जलादिकं० ॥ ११ ॥

शिखरिप्रोत्थितां रम्यां रौप्यकूलां जिनांकितां । सलिला० ॥

ॐ ह्रीं जिनबिंबसमन्वितरौप्यकुलायै जलादिकं० ॥ १२ ॥

शिखरिप्रोत्थितां रक्तां श्रीजिनप्रतिमांकितां । सलिला० ॥

ॐ ह्रीं जिनबिंबसमन्वितरक्तानद्यै जलादिकं० ॥ १३ ॥

शिखरिप्रोत्थितां रम्यां रक्तोदां श्रीजिनांकितां । सलिला० ॥

ॐ ह्रीं जिनबिंबसमन्वितरक्तोदानद्यै जलादिकं० ॥ १४ ॥

गंगादिवाहिनि सुमध्य जिनेन्द्रबिंबा–
नर्चाम्यहं प्रवरभक्तिभरेण युक्ताः ॥
अर्घेण सज्जलसुचन्दनपुष्पचारु-
नैवेद्यदीपवरधूपफलैः कृतेन ॥

ॐ ह्रीं गंगादिचतुर्दशनद्यै महार्घं० ॥

अथ जयमाला।

णिम्मलवर सरिया गुणगणभरिया चउदह णिम्मल जलभरिया।
कुलाचल धरिया द्रह उद्धरिया जिण अणुसरिया मल हरिया॥१
भरह सरासण उवमय जाणो, गंगा सिन्धु नदीय बखाणो।
तिहांपण श्रीजिनवर सुविशाल, ते पूजो भविपण गुणमाल॥२
जह णह भोय भूमि गुण भरिया, रोहिद रोहिदासा दोइ सरिया।
तिहांपण श्रीजिनवर सु विशाल, ते पूजो भवियण गुणमाल॥२॥
मध्यम भोय धरा अणुसरिआ,
हरिय हरिकांता मणो हरिया। तिहां० ॥ ४ ॥
दाहिण उत्तर कुरु परसरिया,
सीता सीतोदा सुइ मरिया। तिहां० ॥ ५ ॥
हिमवद अज्जगरा परिसरीया,
णारी णरकांता दुइ हरिया। तिहां० ॥ ६ ॥
हिरणवदइ वर खेत्त पसारा,
सुवणइ रुव्वकुला जुय धारा। तिहां० ॥ ७ ॥
एरावद पुणु खेत्त विशाल,
रत्ता रत्तोदा गुण पाल। तिहां० ॥ ८ ॥
क्षेमकीर्तिसुरि पट्टमुणिन्दा, नरेन्दकीर्ति गुरु कुवलयचंदा।
तसपट पंकज सुर सोहाय, विजयकीर्ति भट्टारक राय॥९॥
तसपद पंकज भृंग कहाया, नारायण यतिवर गुण गाया।
जे नर पूजें जिण समुदाया, ते नर अजरअमरपद पाया॥१०

घत्ता ।

सिरिसरिय जिणन्दा कुवळय चंदा इंद नरिंद सुगुण कहिया।
सूरि विजय मुणिंदा पापणिकन्दा सिस्स नरायण यति महिया ॥

ॐ ह्रीं गंगादिचतुर्दशनदीस्थितजिनेभ्यो महार्घं ॥

सरित्सुस्थिता श्रीजिनानां सुबिंबा ।
द्विसप्तादिसंख्यानमन्नाकिमुख्याः ॥
सदा पूजिताः संस्तुताः पूजकानां ।
मनोऽभीष्टसत्कार्यदास्ते भवन्तु ॥

इत्याशीर्वादः ।

छप्पा ।

गंगासिंधु आद्य रोहिता रोहितासा जाणह ।
हरिद हरिकांता णाम सीता सीतोदा माणह ॥
नारी नरकांता सरिद सुवर्ण रुपकुळ वखाणह ।
रक्ता रक्तोदा सरिद खेत एरावत धामह ॥
नदीयचउदस जिणवरा, शुद्धसरुपे जाणीये ।
नारायणवर्णी कहे, जिनसिद्धांत वखाणीये ॥

इति चतुर्दश नदी पूजा संपूर्ण ।

अथ चतुर्दशभुवन भव्यजीव पूजा।

द्विगुणमुनिसमाना लोकभेदा समुत्थाः।
जिनवर गणिदिष्टा ये स्थितास्तत्र जीवाः।
निरुपमवरभक्त्या भाविनो मुक्तिनाथान्।
सकलगुणगरिष्ठान् स्थापयेऽहं प्रमोदात्॥

ॐ ह्रीं चतुर्दशभुवस्थभव्यजीवाः अत्रावतरावतरसंवौषट्। अत्र तिष्ठ ठः ठः, अत्र मम सन्निहितो भव भव वषट् स्वाहा॥

निगोदेषु स्थिता जीवाः भविष्यन्मुक्तिनायकाः।
अर्चाम्यहं सुद्रव्येण जलाद्यष्टविधेन तान्॥

ॐ ह्रीं निगोदस्थभव्यजीवराशिभ्यो जलादिकं० ॥ १ ॥

महातमःप्रमोद्भूता ये जीवभव्यतां गताः। अर्चाम्यहं०॥

ॐ ह्रीं महातमःप्रमोद्भूतभव्यजीवराशिभ्यो जलादिकं० ॥२॥

तमः प्रभासमुत्पन्ना भव्यराश्यभिधेयकाः। अर्चाम्यहं०॥

ॐ ह्रीं तमःप्रभोद्भूतभव्यराशिभ्यो जलादिकं० ॥ ३ ॥

धूम प्रभाश्रिताः सत्वा मोक्षसूत्रोपधारिणः। अर्चाम्यहं०॥

ॐ ह्रीं धूपः प्रभाद्भूतभव्यराशिभ्यो जलादिकं० ॥ ४ ॥

पंकप्रभासामुत्पन्ना भव्या मानविवर्जिताः। अर्चा०॥

ॐ ह्रीं पंकप्रभाश्रितभव्यराशिभ्यो जलादिकं० ॥ ५ ॥

वालुकास्थितयो ये वै जीवानां राशयो मताः। अर्चा०॥

ॐ ह्रीं वालुकास्थितभव्यजीवराशिभ्योः जलादिकं० ॥ ६ ॥

ये जीवा भव्य भावाग्राः शर्कराप्रभवाः स्मृताः । अर्चा० ॥

ॐ ह्रीं शर्कराप्रभाश्रितभव्यजीवराशिभ्यो जलादिकं० ॥ ७ ॥

रत्नप्रभाश्रिता जीवाः भव्या ये जिनमार्गगाः । अर्चा० ॥

ॐ ह्रीं रत्नप्रभाश्रितभव्यजीवराशिभ्यो जलादिकं० ॥ ८ ॥

तिर्यग् लोकगता जीवा ये भव्या भव्यभावुकाः । अर्चा० ॥

ॐ ह्रीं तिर्यग्लोकस्थितभव्यजीवराशिभ्यो जलादिकं० ॥ ९ ॥

ज्योतिपटलधामानो ये भव्याः जीवराशयः । अर्चा० ॥

ॐ ह्रीं ज्योतिपटलाश्रितभव्यजीवराशिभ्यो जलादिकं० ॥ १० ॥

ये कल्पवासिनो देवाः सौधर्माद्यच्युतांतकाः । अर्चा० ॥

ॐ ह्रीं कल्पवासिभव्यदेवराशिभ्यो जलादिकं० ॥ ११ ॥

अधो मध्योर्ध्वग्रैवेयकोद्भवा भव्यराशयः । अर्चा० ॥

ॐ ह्रीं ग्रैवेयकाश्रितभव्याहमिंद्रेभ्यो जलादिकं० ॥ १२ ॥

नवानुदिशधामानो ये देवा निर्मलाशयाः । अर्चा० ॥

ॐ ह्रीं नवानुदिशविमानस्थाहमिंद्रेभ्यो जलादिकं० ॥ १३ ॥

येऽहमींद्रा हि भव्याश्च पंचानुत्तरवासिनः । अर्चा० ॥

ॐ ह्रीं विजयादिपञ्चविमानस्थाहमिंद्रेभ्यो जलादिकं० ॥ १४ ॥

त्रिलोकाश्रिताभव्यजीवा सुभावा ।
भविष्यात्सुमुक्तिस्त्रियोनायकास्तान् ॥
जलाद्यष्टधार्घेण नारायणाख्यो ।
यजामि प्रभक्त्या त्रिशुद्ध्या नमामि ॥

ॐ ह्रीं चतुर्दशभुवनस्थितभव्यजीराशिभ्यो महार्घं० ॥

अथ जयमाला।

इय भव्व सु सत्ता, गुणगणमत्ता, सत्ता मुत्ति जुवइ सुसया।
दंसण वरणाणा, चरिय णिहाणा, डहिय कुकम्म सुधम्म रया॥
जे छत्तिम कारण वरुत गया, णिगोय कु भूमिय ऊद्ध पया।
ते चउदह भुवण सु भव्व लरा, वंदामिय भाविय मुत्तिवरा॥
जे सत्तम माधवी पुढवी धरा, वर तेतीस सायर आउ लरा।
ते चउदह भुवण सु भव्य लरा. वंदामिय भाविय मुत्तिवरा॥

जे मघवी णायसु जीव घणा।
दोइ वंसदि सायर आउ भणा। ते चउ० ॥ ४ ॥
जे धूम यहां वर भूमि सधा।
दस सत्त सु सायर आउ जुया। ते चउ० ॥ ५ ॥
जे पंक यहां पुढवी सुजणा।
दस सायर आउ जिणेस भणा। ते चउ० ॥ ६ ॥
जे मेघा भूमिय वास करा।
वर सत्तसु सायर आउ धरा। ते चउ० ॥ ७ ॥
जे वंसा पुढवी कयप सरा।
वर तिन्हसु सायर आउ धरा। ते चउ० ॥ ८ ॥
रयणप्पह पुढवीसु वास करा।
वर एकसु सप्पर आउ धरा। ते चउ० ॥ ९ ॥
जे मज्झह कोयसु उयधरा।
वर तिरिय गइसुद्ध वासकरा। ते चउ० ॥ १० ॥

जे पचह भेदहिं जोइ गणा।
जिण देवगणिंदहिं भव्य भणा। ते चउ० ॥ ११ ॥
जे सुहमादिय वर कप्पसुरा।
वरभव्व सुरामिय मंख धुरा। ते चउ० ॥ १२ ॥
जे अधो मध्य सु उर्द्ध कहा।
ग्रैवेयकदेव जिणंद लहा। ते चउ० ॥ १३ ॥
जे अणुदिस णाम विमाण हुण्या।
जिण णाह गणिंदहि भव्व गुण्या। ते चउ० ॥ १४ ॥
जे पंचाणुत्तर वास भणा।
अहमिंद अपुव्व णाम घणा ॥ ते चउ० ॥ १५ ॥

घत्ता।

इय चउदह लोया गुणगुण उया भवीण मुत्ति णयरी वसहा।
सुगि विजय मुणींदा तिहुमण चंदा सिस्स नरायण विबुध कहा ॥

ॐ ह्रीं चतुर्दशलोकभव्यजंवराशिभ्यो महार्घं०।

श्रीमच्चतुर्दशसुलोकभवाः सुभव्याः।
जीवा अनन्तवरराशिमिता गुणाढ्याः।
सत्पूजक प्रमुखसंघजनाय नित्यं।
देया सुरुत्तमसुभक्ति विमुक्तिसौख्यं ॥

इत्याशीर्वादः।

छप्पा।

घमावंसामेघा अंजण अरिट्ठा फुनि दोयह।
मघवी माघवी णाम अट्ठमि फुनि जाण णिगोयह ॥

तिरियलोय जो इस सगा फुनि सोलगिवेय ।

... ...

एह चउदह लोकमें भव्य अणंता जाणीये ।
नारायण ब्रह्मचारी कहे जिनसिद्धांत वखाणीये ॥

अथ चतुर्दशभुवनस्थित भव्यजीव पूजा समाप्तम् ।

चतुर्दश रत्नाधिपति चक्रवर्तिपूजा ।

सेनापतिस्थपतिहर्म्यपतिद्विपाश्च,
स्त्रीचक्रचर्ममणिकाकिणी कापुरोधः ।
छत्रासिदण्डवररत्नपतीन्मनोज्ञान,
संस्थापयामि विधिना गुणरत्नलब्धैः ॥

ॐ ह्रीं चतुर्दशरत्नाधिपतिचक्रवर्तिनोऽत्रावतरावतर संवौषट् । तिष्ठ २ ठः ठः । अत्र मम सन्निहितो भव भव वषट् ॥

सेनापतिमहारत्ननमिताखिलभूभृतः ।
अर्चाम्यहं सुद्रव्येण नानभक्त्या चक्रवर्तीनः ॥

ॐ ह्रीं सेनापतिरत्नाधिपतिचक्रवर्तिभ्यो जलादिकं० ॥ १ ॥

स्थपत्याख्याः सुरत्नेन ये सं वित पंकजाः । अर्चा० ॥

ॐ ह्रीं स्थपतिरत्नाधिपतिचक्रवर्तिभ्यो जलादिकं० ॥ २ ॥

हर्म्यपत्यभिधानेन रत्नेन श्रितपंकजाः । अर्चा० ॥

ॐ ह्रीं हर्म्यपतिरत्नाधिपति चक्रवर्तिभ्यो जलादिकं० ॥ ३ ॥

द्विपाख्यरत्नसंश्रिताः वरिष्ठाभिर्मितासनाः । अर्चा० ॥

ॐ ह्रीं द्विपरत्नेकृतासनेभ्यश्चक्रवर्तिभ्यो जलादिकं० ॥ ४ ॥

विजयार्द्धोपपन्नस्याश्वस्यारोहिणतत्पराः । अर्चा० ॥

ॐ ह्रीं विजयार्द्धोपपन्नाश्वाधिपतिचक्रवर्तिभ्यो जलादिकं० ॥५॥

दशांगभोगभोक्तारो ये सुस्त्रीपतयो नराः । अर्चा० ॥

ॐ ह्रीं स्त्रीरत्नाधिपतिचक्रवर्तिभ्यो जलादिकं० ॥ ६ ॥

बुद्धिरत्नप्रभाभासिपादानतपुरोध सः । अर्चा० ॥

ॐ ह्रीं पुरोहितरत्नसंसेवितचक्रवर्तिभ्यो जलादिकं० ॥ ७ ॥

चक्ररत्नप्रभावेन दण्डो नाराति मण्डलाः । अर्चा० ॥

ॐ ह्रीं चक्ररत्नधिपति चक्रवर्तिभ्यो जलादिकं० ॥ ८ ॥

चर्मरत्न प्रतापेन रक्षितस्वप्रसैनिकाः । अर्चा० ॥

ॐ ह्रीं चर्मरत्नाधिपतिचक्रवर्तिभ्यो जलादिकं० ॥ ९ ॥

स्फुरद्रत्नप्रभाजाला धिपतिमणिभासितः । अर्चा० ॥

ॐ ह्रीं मणिरत्नाधिपतिचक्रवर्तिभ्यो जलादिकं० ॥ १० ॥

काकिण्याख्या सुरत्नेन लिखितस्वाभिधानका । अर्चा० ॥

ॐ ह्रीं काकिणीरत्नाधिपति चक्रवर्तिभ्यो जलादिकं० ॥ ११ ॥

चंद्रबिंबसमाकार छत्ररत्नाधिभासिनः ः अर्चा० ॥

ॐ ह्रीं छत्ररत्न धिपतिचक्रवर्तिभ्यो जलादिकं० ॥ १२ ॥

समुल्लसद्भ्रबिंब प्रभाभ पन्महासयः । अर्चा० ॥

ॐ ह्रीं असिरत्नाधिपतिचक्रवर्तिभ्यो जलादिकं० ॥ १३ ॥

प्रचंडदंडरत्नेन प्रोध्वारितगुहारशः । अर्चा० ॥

ॐ ह्रीं दंडरत्नाधिपतिचक्रवर्तिभ्यो जलादिकं ॥ १४ ॥

श्रीमच्चतुर्दश सुरत्नमहाप्रभावं ।
चक्राधिपेभ्य इह संपत्प्रदामनर्घं ॥
नारायणो विजयकीर्तिमुनींद्रशिष्यो ।
वाश्रंद्रनादिकृतमर्घमहं प्रभक्त्या ॥
ॐ ह्रीं चतुर्दशरत्नाधिपतिचक्रवर्तिभ्यो महार्घं ।

अथ जयमाला ।

इह पुण्य पवित्ता गुणगणचित्ता, छित्तापिछा पइणिपुणा ।
चउद्दह रयणना दिज्जयपत्ता चक्कवट्टि पयपत्त गुणा ॥
पुंणेण रयणपइपद लहंति, पुंणेण सु णरयइ गुण कहंति ।
पुंणेण मणाणइ रयण सार, पुंणेण ठहइ गुणगण भंडार ॥१॥
पुंणेण सुणरसुर णवइ सिरस, पुंणेग सुगयवर भमइ दीस ।
पुंणेणह सारवोहय करंति, पुंणेग सु जुवइ रयण वरंत ॥२
पुंणेण सुचक्कह कवइ सेव, पुंणेण सुचम्मह रयण हेव ।
पुंणेण सुरहसम मणि विशाल, पुंणेणसु काकिणी गुणहपाल ॥३
पुंणेण पुरोधह करइ सेव, पुंणेण सुछत्तह धरइ देव ।
पुंणेण असिय वर रयण पत्ति, पुंणेण सुदंड रयण पसत्ति ॥
पुंणेण सुजलणिहि थल हवंति, पुंणेण अगणिमयसुर अवंति ।
पुंणेण कुरोग दलिद्द णाम, पुंणेण धरणपइ पय विलाम ॥५॥
पुंणेण सुकुल णा लहइ जम्म, पुंणेण सु जिणवर लहइ धम्म ।
पुंणेण सु मुणिवर खवइ कम्म, पुंणेण सुभोयह भूमि सुसम्म ॥
पुंणेण सु अगणिय लच्छि सार, पुंणेण सुकुलपइ चतुर णार ।
पुंणेण हवंति सुपुत्त पुत्त, पुंणेण पराभव इणहि भुत्त ॥ ७ ॥

पुंणेण कुडायणी ण रहे पास, पुंणेण कु साइणी हवइ दास ।
पुंणेण कुदेव पिसाय जाय, पुंणेण लहइ णरपइ पसाय ॥ ८ ॥
पुंणेण सुणर लहइ सुहगसग्ग, पुंणेण सुलहइ णर सु अपवग्ग ।
पुंणेण सुतिहुयण जस अभंग, पुंणेण सुणर लहइ सुयण संग ॥
पुंणेण णिरय गइ विलय जाइ, पुंणेण तिरिय गइ दूर धाय ।
पुंणेण कुपक्खुह हवइ मित्त, पुंणेण सगुरुजण धरइ चित्त ॥ १० ॥

घत्ता ।

चउदह वर रयणा अणुछयपयणा, पुणय सु सिरिणार विभत्ता ।
सिरि विजयसूरिसा मुणि जणइसा सिरस नरायण कयसु तत्ता

ॐ ह्रीं चतुर्दशरत्नाधिपतिचक्रवर्तिभ्यो महार्घं० ।

सेनापतिप्रमुखरत्नमहाप्रभावा-
श्चक्राधिपा विमलबुद्धिमहस्वभावाः ॥
संपूजकप्रमुखभव्यजनानसु पूज्याः ।
कीर्तिसुबुद्धिविभवं सततं दिशन्तु ॥

इत्याशीर्वादः ।

छप्पा ।

सेनापति वर रयणय पति गृहपति वरख्यातह ।
गयवर हय वर रयण युवति सुचक्र विभातह ॥
चर्म नाम मणि रयण काकिणी फुनि रयण पुरोधह ।
छत्र खड्ग फुनि रयण दंड फुनि रयण प्रबोधह ॥
एह चउदह रयण धर, चक्रवर्ति नायक हरा ।
नारायण ब्रह्मचारी कहे, सकल संघ मंगलकरा ॥

इति चतुर्दशरत्नाधिपतिपूजा समाप्तम् ।

....

अथ चतुर्दश स्वराणां पूजा ।

अकारादि स्वराणां ये वक्तारो विश्वदीपकाः ।
आह्वाननादि सद्भक्त्या विधिना प्रयजे जिनान् ॥

ॐ ह्रीं चतुर्दशस्वरप्रकाशकजिना अत्रावतरावतर संवौषट् स्वाहा
अत्र तिष्ठ २ ठः ठः । अत्र मम सन्निहितो भव भव वषट् ॥

युगादौ वृषदातारमकारस्वरमादिमं ।
यजामहेऽष्टधा द्रव्यैर्वृषभं वृषलांछनं ॥
ॐ ह्रीं अकारस्वरवादिने वृषभाय जलादिकं० ॥ १ ॥

आकारस्वरवक्तारं प्रकाशितमहागमं । यजा० ॥
ॐ ह्रीं आकारस्वरवादिनेवृषभाय जलादिकं० ॥ २ ॥

इकारं यो विजानाति तमिना रहितं परं । यजा० ॥
ॐ ह्रीं इकारस्वरवादिने वृषभाय जलादिकं० ॥ ३ ॥

ईकारस्य प्रवक्तारं भावीगजितमत्मतं । यजा० ॥
ॐ ह्रीं ईकारस्वरवक्त्रे वृषभाय जलादिकं० ॥ ४ ॥

उकारस्य प्रभेदज्ञं सर्वज्ञं विमलप्रभं । यजा० ॥
ॐ ह्रीं उकारस्वरभेदकथकाय जलादिकं० ॥ ५ ॥

ऊकारस्यापि वेत्तारमनुद्धतमयं जिनं । यजा० ॥
ॐ ह्रीं ऊकारस्वरभेदज्ञायकेभ्यो जलादिकं० ॥ ६ ॥

ऋकारस्योपदेष्टारमर्त्तिहंतारमादिमं । यजा० ॥
ॐ ह्रीं ऋकारस्वरोपदेष्टृवृषभाय जलादिकं० ॥ ७ ॥

ॠकारस्योपदेष्टारमानन्दितजगज्जनं । यजा० ॥
ॐ ह्रीं ॠकारस्वरोपदेशकाय वृषभाय जल.दिकं० ॥ ८ ॥

प्रकाशितलृस्वरस्यो वै सवर्णपृस्वरस्यतं यजा० ॥
ॐ ह्रीं लृकारस्वरस्य प्रवक्तारवृषभाय जलादिकं० ॥ ९ ॥
लृकारोच्चारदक्षो यो देवार्चितांघ्रिपंकजः यजा० ॥
ॐ ह्रीं लृकारस्वरोच्चारकायवृषभाय जलादिकं० ॥ १० ॥
एकारस्वरनामश्रमेकारस्वरदेशिनं । यजा ॥
ॐ ह्रीं एकारस्वरदेशने वृषभाय जल दिकं० ॥ ११ ॥
ऐकारस्वरजानान मेकारस्योपदेशकं । यजा० ॥
ॐ ह्रीं ऐकारस्वरप्रकाशकाय वृषभाय जलादिकं० ॥ १२ ॥
ओकारस्योपदेष्टारमोकारस्थानवादिनं ॥ यजा० ॥
ॐ ह्रीं ओकारस्वरदेशकाय जलादिकं० ॥ १३ ॥
औकारोच्चारणे शक्तं विश्वविद्याप्रकाशकं ॥ यजा० ॥
ॐ ह्रीं औकारस्वरकथकाय जिनाय जलादिकं० ॥ १४ ॥

अकारप्रभृत्यन्यशुद्धस्वराणां वराणां प्रवक्तारमाद्यं जिनेंद्रं ।
वरैरौप्यपात्रस्थितैः सज्जलाद्यैर्यजे ब्रह्मनारायणो भक्तियुक्तः॥
ॐ ह्रीं चतुर्दशस्वरप्रवक्तारं जिनाय महार्घं० ।

अथ जयमाला ।

आदि जिनेसर परम दिनेसर भविय कमल परकास करु ।
तिहुयर परमेसर ज्ञान दिवाकर सेवक जन मन दुरिय हरु॥
जय जय नाथ नीरंजन योगी, जय जय शांति सकल भोगी ।
जय जय त्रिभुवन जन हितकारी, जय जय मुक्ति रमा अधिकारी ॥
जय जय काम गियंद विहंडन, जय जय मुक्ति नयरि वर मंडन ।
जय जय मान महा मद भंजन, जय जय क्रोध महाभट गंजन ॥

जय जय दिव्यधुनी मुख राजे, जय जय सकल घनाघन छाजे।
जय जय त्रिभुवनना दुःख भाजे, जय जय देव दुंदुभी वाजे ॥
जय जय त्रिभुवन जनमन राचे, जय जय सूत्र एकावन वाचे।
जय जय तत्त्व पदारथ माखे, जय जय तप संजम भेद याखे ॥
जय जय भवियण कर्म विहंता, जय जय धर्मरथांग नियंता।
जय जय तोरण ध्वज लहकंता, जय जय सुरनर साद करंता ॥
जय जय दंसण णाण चरित्ता, जय जय निर्मळ नित्य पवित्ता।
जय जय अधरीकृत मन राजा, जय जय इंद्र विकट भय छाजा ॥
जय जय आम्रोपल्लवकृत छाया जय जय धृत चामर देवगाया।
जय जय सुंदर फल महकारा, जय जय कोयल करे टहुकारा ॥
जय जय चंपकना पन सोहे, जय जय त्रिभुवनना मन मोहे।
जय जय सप्तच्छदकृत शोभा, जय जग निर्जित दुर्द्धर लोभा ॥
जय जय निर्जित दुर्जय माया, जय जय हरिहर पाय लगाया।
जय जय सिद्ध निरञ्जन धाया, जय जय अजर अमर पद पाया ॥
जय जय अरहंत भगवंत देवा, जय जय सुरनर करतुजु सेवा।
जय जय अजर अमर पद दाता, जय जय संसार सागर त्राता ॥
जय जय एक अनेक कहाया, जय जय गणधर देव पढाया।
जय जय दर्शनसे दुख नाशे, जय जय सेव करे तुम पासे ॥
जय जय जे नर हृदय धरन्ता, जय जय मन गुप्ति ते हरंता।
जय जय वयणे स्तवन करंता, जय जय वचन गुप्ति परिहंता ॥
जय जय अष्टांगे जे नमन्ता, जय जय काय गुप्ति निगमंता।
जय जय धर्म धुरंधर देवा, जय जय जनम जनम करू सेवा ॥

जय जय क्षेमकीरती पद धारी, जय२ नरेंद्रकीर्ति मनोहारी।
जय२ तसपर विजय मुनींद्रा, जय२ सरसति गुच्छ सु चंदा॥
जय जय तस पद पंकज भृंगा, जय जय नित्य सेव सुरंगा।
जय जय सेवक जन साधारी, जय जय कहे नारायण ब्रह्मचारी॥

घत्ता।

सिरि जिणवर देवह सुरकृत सेवह, जनम जनम तुव चरण नमूं।
करूं पूजा भावीय अष्ट प्रकारिय अर्घ उतारिय दुःख गमूं॥

ॐ ह्रीं चतुर्दशस्वरप्रकाशकवृषभाय जिनाय महार्घं०।

दयादानदाता जगज्जंतु पाता।
महामोहजेता च नेता जिनाना॥
सुमुद्घात भेता चहु कर्महंता।
जिनो नाभि पुत्रो भवं शं करोतु॥

इत्याशिर्वादः।

छप्पा।

वृषभ जिनेश्वर देव देव करे बहु सेवह।
गावे गीत रसाल भमरि वर करे सेवह॥
नाभिराय कुलचन्द मात मरु देवी नन्दह।
इन्द्र नमे तस पास नमे राय धरणिंदह॥
सेवा मनवांछित फले, जुग आदि जग वासीया।
नारायण ब्रह्मचारी कहे जाणे चौद स्वर प्रकाशिया॥

इति चतुर्दश स्वर पूजा समाप्तम्।

अथ चतुर्दश तिथी पूजा।

मुख्या चतुर्दशाद्याय:स्तिथयो मुनिनिर्मिता: ।
आह्वनन स्थापनादि विधिना तासमर्चये ॥
ॐ ह्रीं धर्माद्यर्थप्रसिद्ध चतुर्दशतिथ्यं ऽत्रावतरावतर संवौषट् ।
अत्र तिष्ठ ठ: ठ: । अत्र मम सन्निहितो भव भव वषट् स्वाहा ।

मुख्या प्रतिपदं बुध्वा मुख्यदेवं जिनेश्वरं ।
दोषनिर्मुक्तसत्पूज्यमर्चयामि जलादिभिः ॥
ॐ ह्रीं प्रतिपदिस्वरूपनिरूपक अष्टादशदोषरहिताय जिनाद जला० ॥१॥

द्वितीयां तिथिमाश्रियदयामूलं जिनोदितं ।
सागारमुनिभेदाख्यं द्विधाधर्मं समर्चये ॥
ॐ ह्रीं द्वितीयतिथिमाश्रित्यसागारानगारधर्माय जलादिकं० ॥२॥

तृतीयां तिथिमाध्यायदर्शनादिप्रभेदत: ।
रत्नत्रयंजिनै: प्रोक्तं प्रार्चयेऽहं जलादिभिः ॥
ॐ ह्रीं तृतीयातिथिमाश्रित्यदर्शनादिरत्नत्रयाय जलादिकं० ॥३॥

चतुर्थीतिथिमाश्रित्य वेदाश्चत्वार ईशिना ।
ये प्रोक्तास्तानहं यजिम कमलाद्यष्टधार्चनै: ॥
ॐ ह्रीं चतुर्थितिथिमाश्रित्य प्रथमानुयोगादिवेदेभ्यो जलादिकं० ।४।

पंचमींतिथिमुद्दिश्य ये पंचपरमेष्ठिन: ।
जलादिभिरिमैद्रव्यैरर्चयामि प्रभक्तित: ॥
ॐ ह्रीं पंचमीतिथिमुद्दिश्य पंचपरमेष्ठिभ्यो जलादिकं० ॥५॥

षष्ठीमाश्रित्य द्रव्याणि सर्वज्ञ: कथितानि वै: ।
षडिमतानि जेतानि जलाद्यष्टविधार्चनै: ॥
ॐ ह्रीं षष्ठीतिथिमाश्रित्य सर्वज्ञोदितषट्द्रव्येभ्यो जलादिकं ॥६॥

सप्तमीतिथिमुद्दिश्य संयमाः सप्तसंख्यया ।
प्रोक्ता जिनैर्मुनीन्द्राणां यायज्मि तानहं मुदा ॥
ॐ ह्रीं सप्तमीतिथिमुद्दिश्य सामायिकादिसप्तसंयमेभ्यो जला-
दिकं० ॥ ७ ॥

अष्टमीचाष्टकर्माणिमाश्रिताष्टगुणान्मताः ।
सिद्धानां तानहं यज्मि जलाद्यष्टविधार्चनैः ॥
ॐ ह्रीं अष्टमीतिथिमाश्रित्य सिद्धाष्टगुणेभ्यो जलादिकं० ॥८॥

उद्दिश्य नवमी सद्भिर्नया नवमता जिनैः ।
गंभीरार्थाऽविरुद्धार्था दूरगास्तानहं यजे ॥
ॐ ह्रीं नवमीतिथिमाश्रित्य सर्वज्ञोक्तनवनयेभ्यो जलादिकं० ॥९॥

दशमीतिथिमाश्रित्य यो धर्मो दशधास्मृतः ।
दयामूलो हि सर्वज्ञैरर्चयाम्यहमष्टधा ॥
ॐ ह्रीं दशमीतिथिमाश्रित्य दशलक्षणिकधर्मेभ्यो जलादिकं० ॥१०॥

अङ्गान्येकादशोक्तान्येकादशी तिथिसंज्ञया ।
तान्यहं प्रयजे नित्यं जलाद्यष्टविधार्चनैः ॥
ॐ ह्रीं एकादशमीतिथिमाश्रित्य एकादशांगेभ्यो जलादिकं० ॥११॥

आश्रित्य द्वादशीं प्राज्ञरुक्तानि परमार्थतः ।
तपांसि द्वादशोद्देशानि यजे तानीह भक्तितः ॥
ॐ ह्रीं द्वादशीतिथिमुद्दिश्य द्वादशविधतपेभ्यो जलादिकं० ॥१२॥

त्रयोदशीं समाश्रित्य त्रयोदशविधं स्मृतं ।
चारित्रं श्री जैनेन्द्रैस्तैः यायज्मि शुद्ध्यान्वितः ॥
ॐ ह्रीं त्रयोदशीतिथिमाश्रित्य त्रयोदशप्रकारचारित्रेभ्यो जला-
दिकं० ॥ १३ ॥

चतुर्दशीतिथि प्रोक्तानन्तचतुर्दशं जिनं ।
पूजया परया भक्त्या पूजयामि प्रवुद्धये ॥
ॐ ह्रीं चतुर्दशी तिथमाश्रित्य अनन्ततीर्थङ्काराय जलादिकं ॥१४॥

धर्मप्रधानास्तिथयश्चतुर्दशः प्रोक्ता जिनेन्द्रैः परमार्थज्ञातृभिः ।
अर्घेण वारादिकृतेन संकृताः सद्बुद्धये संयजतां भवन्तु ताः ॥
ॐ ह्रीं चतुर्दशतिथिभ्यः महार्घं० ।

अथ जयमाला ।

चतुदहवर तिथि हो, परम अतिथि हो, धम्मह कारण मुमण धरी ।
भवियण जण रंजण कम्म निभंजण काम विगंजण जिणउ धरी ॥

छंद ...की चालमें ।

प्रथम तिथि समकित साधो, ए संसार अपार अगाधो ।
मनमें अरहंत देव आराधो, भमतां भमतां मानव भव लाधो ॥
बीजे धर्म द्विधा जिन भाख्यो, अनागार सागारह दाख्यो ।
मनमें अरहंत देव आराधो, भमतां भमतां मानव भव लाधो ॥
त्रीजे दंसण णाण चरित्र, पूजो अष्ट प्रकार पवित्र । मन० ॥
चोथे वेद चतुष्टय जाणी, पूजो निम्मल भवियण प्राणी । मन० ॥
पूजो पांचम पंच परमेष्ट, टाले जनम जनमनां कष्ट । मन० ॥
छट्ठे छद्रव्य कह्या जिनदेवा, पूजा नित्य करो बहुसेवा मन० ॥
सेवो संजम सातमे सात, सु सामायिक करो परभात मन० ॥
शुभ कर्म दहन पूजा कीजे, आठमे आठ कर्म हणीजे । मन० ॥
नवमें नव नय अर्थ गंभीरा, मनमें जे धरसे तेह धीरा । मन० ॥

दशमी दश लाक्षणीक पूजो, उत्तम क्षमयादिक गुण बूझो। मन० ॥
अगीयारसें अङ्ग अग्यार, पूजो पाप तणो परिहार। मन० ॥
बारे व्रत बारसें पालो, सुधो श्रावकाचार संभालो मन० ॥
पूजें तेरसि चारित्र तेर, देव अभिषेक करें तम मेर। मन० ॥
जे नर चउदशे पूजे अनंत, तेहनि आश पूरे भगवंत मन० ॥

घत्ता।

तिथि चउदह जाणो धर्म वखाणो सहु मन आणो भाव धरी।
श्री विजय सुकीर्ति शिष्य सुमूर्ति नारायण जयमाल करी॥

ॐ ह्रीं धर्मकार्यप्रसिद्धचतुर्दशतिथिभ्यो महार्घं० ॥

तिथयो तिथिभिः सुकृताय कृताः।
शुभकर्म सुखधा जगत्प्रथिताः॥
शुभमर्चकधर्मजिनाय सदा।
सु दिशं त्विह शं जगति प्रथितं॥

इत्याशीर्वादः।

छप्पा।

प्रतिपद बीज सु त्रीज समकित धर्म सुदंसण।
चौथा पंचमी वर छठि वेद परमेष्ठि द्रवांचण॥
सातिम आठिम तुम संजक्रम यहन नया नव।
दशम अग्यारस द्वादशी धर्म अंग तप संभव॥
तेरसे चारित्र पुजिये चउदशे अनन्त जिनेसरु।
नारायण ब्रह्मचारी कहे, चउदश तिथि मंगल करु॥

इति चतुर्दश तिथि पूजा समाप्तम्।

अथ चतुर्दश मलत्यक्ताहार मुनि-पूजा।

पूयादिकद्विगुणसप्तमलापहारा।
ये त्यजंति तान्कुमलान् वरशुद्धिभाजः॥
भद्रादशव्रतविधानविधौ समर्थाः।
संस्थापयेऽहमधुना विधिना मुनींद्रान्॥

ॐ ह्रीं चतुर्दशमलोज्झिताहारग्राहकमुनयोऽत्रावतरतावतरत संवौषट् अत्र तिष्ठ २ ठः ठः। अत्र मम सन्निहितो भव भव वषट्।

पूयदोषपरित्यक्तमाहारं विष्वणंति ये।
पूजयामीह सद्भक्त्या कमलाद्यष्टधार्चनैः॥

ॐ ह्रीं पूयमलातिरिक्ताहारग्राहकमुनिभ्यो जलादिकं० ॥१॥

अस्राख्यमलसंत्यागाद्यन्नमश्नंति शुद्धितः॥ पूजया० ॥

ॐ ह्रीं अस्रमलरहिताहारग्राहकमुनिभ्यो जलादिकं० ॥२॥

पलाख्यमलसंत्यागाद्यन्नमश्नंति शुद्धिभाक्॥ पूजया० ॥

ॐ ह्रीं पलमलरहितपिंडविशुद्धये जलादिकं० ॥ ३ ॥

अस्थिरिक्तं च भोज्यं ये भुजंति परमार्थतः॥ पूजया० ॥

ॐ ह्रीं अस्थिरिक्तमलरहितपिंडविशुद्धये जलादिकं० ॥ ४ ॥

चर्म्माख्यमलसंत्यागाच्छुद्धमन्नमदंति ये॥ पूजया० ॥

ॐ ह्रीं चर्ममलरहितपिंडविशुद्धये जलादिकं० ॥ ५ ॥

भोजनं नख संत्यक्तं ये वल्भंति निरंतराः॥ पूजया० ॥

ॐ ह्रीं नखमलरहितपिंडविशुद्धये जलादिकं० ॥ ६ ॥

कचपश्लेषनिर्मुक्तं ये भुजंत्यन्नमुत्तमाः ॥ पूजया० ॥

ॐ ह्रीं कचमलरहितपिंडविशुद्धये जलादिकं० ॥ ७ ॥

विकलत्रिकजीवेभ्यः त्यक्तमन्नमदंति ये ॥ पूजया० ॥

ॐ ह्रीं मृतविकलत्रिकमलरहितपिंडविशुद्धये जलादिकं० ॥८॥

सूरणादिमलत्यागाद्विशुद्धान्नमदंति ये ॥ पूजया० ॥

ॐ ह्रीं सूरणादिकंदमूलत्यक्तपिंडविशुद्धये जलादिकं० ॥ ९ ॥

येऽश्नंति यवगोधूमबीजसंत्यक्तमन्नकं ॥ पूजया० ॥

ॐ ह्रीं यवगोधूमादिबीजमलरहितपिंडविशुद्धये जलादिकं० ॥१०॥

येऽन्नं भुंजंति निर्विघ्ना मूलाख्यमलवर्जितं ॥ पूजया० ॥

ॐ ह्रीं मूलमलरहितपिंडविशुद्धये जलादिकं० ॥ ११ ॥

बदर्यादिफलत्यागाच्छुद्धमन्नं भुजंति ये ॥ पूजया० ॥

ॐ ह्रीं बदर्यादिफलमलरहितपिंडविशुद्धये जलादिकं० ॥१२॥

तुषादिमलसंत्यक्तं भुजंति येऽन्नमुत्तमं ॥ पूजया० ॥

ॐ ह्रीं तुषकणमलरहितपिंडविशुद्धये जलादिकं० ॥ १३ ॥

कुंडाद्यंतमलैस्त्यक्तमाहारं च भुंजंति ये ॥ पूजया० ॥

ॐ ह्रीं कुंडमलरहितपिंडविशुद्धये जलादिकं० ॥ १४ ॥

पूयादिदुर्मलविमुक्तमनुत्तमान्नं ।
भुंजंति ये विपुलमानमदोज्झितांगाः ॥
वार्गंधतंदुलसुपुष्पचरुप्रदीपैः ।
धूपैः फलैः कृतमहार्घमहं ददामि ॥

ॐ ह्रीं चतुर्दशमलरहितपिंडविशुद्धये महार्घं ।

अथ जयमाला ।

मदनमदविहंता दुष्टकर्माष्टभेत्ता ।
अगमनिगमवेत्ता सप्ततत्त्वैकचेता ॥
मदननृपनिजेता भव्यसार्थप्रणेता ।
जयति जगत्पूज्यः सन्मुनीनां प्रसंघः ॥

विराग विमोह विरोग विभोग, विशोक विरोष विदोष वियोग ।
दिनेश समेश मुनीश निकाय, जय प्रणताखिल लोक कृताय ॥
दिनेश निशेश सुरेश नरेश, खगेश दिनेश विवंदित सेस ।
दिनेश समेश मुनीश निकाय, जय प्रणताखिल लोक कृताय ॥

विमान विनान विदंभ विलोभ,
विमाय विजाय विजृंभ विसोभ । दिनेश० ॥ ३ ॥
विकंतु विजंतु विराजन वीस,
विहास विज्ञास विवर्जित दोस । दिनेश० ॥ ४ ॥
विसंक विमुक्त विकर्म कलंक,
निरामय निर्भय निर्गत पंक । दिनेश० ॥ ५ ॥
विबाध विकासित विश्व निरास,
विदूरित संसृति संसय पास । दिनेश० ॥ ६ ॥
अचिंत्य चरित्र पवित्र सुनेत्र,
विलोकित जीवनिकाय सुमित्र । दिनेश० ॥ ७ ॥
घनाघन दुंदुभि धीर निनाद,
निराकृत दुर्मतवादि कुवाद । दिनेश० ॥ ८ ॥

दिगम्बर वेष विकुंचित केश,
विहार पवित्रित देश विदेश । दिनेश० ॥ ९ ॥
निराभरणांकित निर्मल गात्र,
निरायुध निर्भय सोभित गात्र । दिनेश० ॥ १० ॥
कुकर्ममहीरुह भेद कुठार,
सुमंधनगो धरणामृतधार । दिनेश० ॥ ११ ॥
विशल्य विशूल्य निरीह विदंड,
विखण्डित दुर्मद बुद्धि करंड । दिनेश० ॥ १२ ॥
कषाय निकायरज प्रसमीर,
दुरास्रव निर्जय दुर्जय धीर । दिनेश० ॥ १३ ॥
सुरासुर भासुर किन्नर देव,
खगाधिप मानुष निर्मित सेव । दिनेश० ॥ १४ ॥
विनिर्गत दुर्मल भुक्त विमुक्त,
परिग्रह दुर्गह दोष विमुक्त । दिनेश० ॥ १५ ॥

घत्ता ।

अखिलगुणनिधाना निर्जितक्रोधमाना ।
विरहितकुनिदानाः सप्ततत्वैकतानाः ॥
सुमुनिविजयकीर्त्तेः शिष्य नारायणाख्यो ।
दुरितनिवहहान्यै तान्मुनीनर्घयामि ॥

ॐ ह्रीं चतुर्दशमलत्यक्ताहारग्राहकमुनिभ्यो महार्घं० ।

यो नित्यप्रणिधानसंश्रितमना संसारनिर्विणह ।
यो रत्नत्रयधारणां चितमतिः कायारिविध्वंसकः ॥

योे विज्ञानरसायनामृतधयस्फीतांगसंगातिगः ।
श्रीमुसंघजन (?) मुनीश्वरमहासंघो वर्ता सर्वदा ॥
इत्याशीर्वादः ।

छप्पय ।

पूय अस्रपलनाम अस्थि अजिनमल जाणह ।
नख केश मल दोय एक विकलत्रय मानह ॥
सूरण आद्य कुकंद बीज फुनिमूल अनेकह ।
फल बदरी फळ आदि कण फुनि कुंड विवेकह ॥
एह चतुर्दश मल रहित, शुद्ध आहार मुनिवर कह्यो ।
नारायण ब्रह्मचारी कहे, जिन सिद्धांते संग्रह्यो ॥
इति चतुर्दशमलरहिताहारग्राहकमुनि पूजा ।
॥ अत्र षण्णवत्यधिकैकशत परिमितान् जाप्यान् देयात् ॥
॥ जाप्य (१४×१४)=१९६ ॥ देयात् ॥
॥ जाप्य मंत्र—ॐ ह्रीं अर्हं हंसः अनंत केवलिने नमः ॥

अथ समुच्चय जयमाला ।

सिरि अणंत जिणेयरु दुरिय, तिमिरहरु तत्त्व पदारथ भासणु ।
भवि कमल दिणेसर वसु विहमय इरु सयल सुणाण पयासणु ॥

सुहग कर्पूर मय कुंद वासिय जलं ।
कणयमणि घडिय भृंगार धारोज्वलं ॥
इन्दु आरत्तियं करइ विकसिय मण ।
अमरदेवी गणा णच्चइ सुभासणं ॥ १ ॥

विमळ कर्पूर सुगंधि चन्दण भरं ।
घसिय केसर वरं जनम पातक हरं ॥ इन्दु० ॥ २ ॥
अमल तन्दुलगण कमलवासियघणं ।
नयण मोहण करं हसिय सज्जण जणं ॥ इन्दु० ॥ ३ ॥
कमल मचकुन्द जाइ जुइ चम्पकं ।
मालती मोगरा तिलक कुन्दबकं ॥ इन्दु० ॥ ४ ॥
खज्जया मोदया घेवरा फेणया ।
सेव सुंहालया लेहु वर मडयो ॥ इन्दु० ॥ ५ ॥
मोतीया पायसा पूरी लापसी गणा ।
सूपे अपुनय वटप पुडा घणा ॥ इन्दु० ॥ ६ ॥
सुहग व्यंजनघणा तलिय मुद्दा चणा ।
शालि भक्तोत्करा सयण जण रञ्जना ॥ इन्दु० ॥ ७ ॥
रयण दीपोज्वला कपूर अति उज्वला ।
दुरिय तिमिर हरा मदि सुदि अबहि फला ॥ इन्दु० ॥८॥
सिंहल असित गरु हरिय चन्दण भरा ।
धूप धूमांचिया गयण माणुम धरा ॥ इन्दु० ॥ ९ ॥
नालिकेरैः फलैः पूंगीसुकदंबकैः ।
आम्र जंबीरनारिंगदाडीमकैः ॥ इन्दु० ॥ १० ॥
कर्वटीचिर्भटैः कोमलैः कर्मदैः ।
फोफलैः फालसैर्मुक्तिवरशर्मदैः ॥ इन्दु० ॥ ११ ॥

१–रोटी, २–दाल, ३–खाखरा माखरी, ४–शाकभाजी-तरकारी ।

जंबुरायणफलैः कोमलकुममांडकैः ।
पिस्ताबदामफलैरखोडपरकांडकैः ॥ इन्दु० ॥ १२ ॥
कुसुमवर संति सुगंधी सुरमव्वयं ।
णायकुमार धरणिंद सुर सव्वयं ॥ इन्दु० ॥ १३ ॥
जय जय सुदेव उचरंति जिण मंदिरं ।
पुरयंतिह पंचायणं मणुहरं ॥ इन्दु० ॥ १४ ॥
अमलवर कमलदल नयण सुरकामणी ।
चमर ढोलंति अति सुहग गय गामिणी ॥ इन्दु० ॥ १५ ॥
कणय भृंगार वर ताल कंसालयं
कमल मुह कलस धय दंड सोहालयं ॥ इन्दु० ॥ १६ ॥
सुहमुपरंतिक वरछत्तत्तय संयुतं ।
रयण सम कंतयं दप्पणं सुरणुतं ॥ इन्दु० ॥ १७ ॥
एकमम अट्ठवरं चामरं उज्वलं ।
अमरघुर्णा णीझ रंजण सुमुत्ताहलं ॥ इन्दु० ॥ १८ ॥
जण मुहांरावली क्षीर मचकुन्दयं ।
क्षीर जलणिहि सम कमल वरकंदय ॥ इन्दु० ॥ १९ ॥
वंदतय संणिहं छत्तनय सुंदरं ।
प्रातिहार्याष्टकं सयल मगलकरं ॥ इन्दु० ॥ २० ॥
पंच वर वरण धज भेय लहकंतयं ।
रयण वर तोरणं धूमघटमालयं ॥ इन्दु० ॥ २१ ॥
कणयमणि किंकिणी मुख झणकारयं ।
तोरया घण्टया रचिय विज्ञानय ॥ इन्दु० ॥ २२ ॥

दीपवरमालया सुहग मंदारया ।
भमर झंकारया कणयमणि जालया ॥ इन्दु० ॥ २३ ॥
व्यंतरी खेचरी किन्नरीय भूचरी ।
सुहग पुरन्दरी स्वर्ग देवामरी ॥ इन्दु० ॥ २४ ॥
तत्ताथइ तत्ताथइ तत्ताथइय थोगिणी ।
णच्चए अच्छरा हंस गय गामणी ॥ इन्दु० ॥ २५ ॥
वज्जये घुघरा घमक घमकारए
पयकमलणे ठरं ठमक चमकारए ॥ इन्दु० ॥ २६ ॥
छमकछम पाय झंझरीय झमकारए ।
कडिय तह मेखला वर खलकारए ॥ इन्दु० ॥ २७ ॥
वीणा वज्जंति छलछपक कंसालए ।
भेरी गज्जंति अडयाल बहुतालए ॥ इन्दु० ॥ २८ ॥
धपमय धपमय दों दों दों वज्जए ।
जण सु घण जण सु घण अम्बर गज्जए ॥ इन्दु० ॥२९॥
ढोल बहुदुन्दुभीय णाद बहु सज्जए
जण सु घण गज्जणं मोरमद णच्चए ॥ इन्दु० ॥ ३० ॥
हाव भाव कला णयण सु विसालए ।
भमइ वर भमरी देयंति कर तालए ॥ इन्दु० ॥ ३१ ॥
राग सारंग तह देव गंधारए
पंचमो भैरव राग मल्हारए ॥ इन्दु० ॥ ३१ ॥
कुणइ कल्लाण सिन्धाम आसावरी ।
हलीइ बहु पात्र पुरुजन भंते करी ॥ इन्दु० ॥ ३२ ॥

कुणइ आरत्तियं इन्दु जिणमंदिरे।
सयल वर संघ आणन्द मंगल करे॥ इन्दु० ॥ १४ ॥

घत्ता।

सिरि अणंत जिणेसर दुरिय तिमिर हर भवियण जण कल्लाणकर।
सुरि विजयमुणिंदो तिहुयण चंदो नारायण ब्रह्म यजति वर॥

ॐ ह्रीं अनन्तव्रतोद्यापनाय जयमाला पूर्णार्घं।

घंटा तोरण दाम दर्पण महाश्री चामराणां चयाः।
सद्भृंगारकतारनालकलशस्फूर्यध्वजानां गणाः॥
येषां ते विलसंति नित्य महमां श्वेतातपत्रत्रयाः।
श्रीमंतो वृषभादयो जिनवराः कुर्वंतु मे मंगलम्॥

इत्याशीर्वादः।

कीर्तिं स्फूर्तिं सुबुद्धिं विमलमतिचयं श्लाघ्यदीप्तिं च शुद्धिं।
चारोग्यवृद्धिमृद्धिं गजतुरगरथाद्युत्करं संतनोति॥
लक्ष्मीं रामां प्रकामं तनयपरिकरं सारभुक्तिं च मुक्तिं।
सम्यग् बुद्ध्या कृताया प्रभवतु यजतो श्रेयसेऽनंतपूजा॥

॥ इति पूजाफलं॥

श्रीमत्सूर्यपुरेऽर्णवांगहयचंद्रेष्टनमस्य सिते।
पक्षे रामतिथौ बुधयुते पूर्वकृतार्चाविधैः॥
श्री नारायणस्येहकृति र्विजयतां लोकेकृताऽसौ चिरं।
सत्पुत्रोत्तमधीमनोहरमहा संघाधिपस्यादरात्॥

इति श्री भट्टारक श्री विजयकीर्ति शिष्य ब्रह्म श्री नारायण विरचित अनंतव्रतोद्यापनं समाप्तम्।

संवत १७८४।

महावासुपूज्यालये मूलसंघे,
स्फुरद्दिव्यसारस्वताख्यादिगच्छे ।
गणेसद्बलात्कारनाम्नि प्रकृष्टे,
समुत्फुल्लसकुन्दकुन्दाख्यवंशे ॥ १ ॥
मुनिपद्मनन्दी सुरेंद्रादिकीर्तिः-
स्फुरद्दिव्यमूर्तिः मुनिक्षेमकीर्तिः ।
गुरो पट्टधारीनरेंद्रादिकीर्तिः,
सदा सौख्यकारी महाभव्यमूर्तिः ॥ २ ॥
तत्पट्टपंकजविकासनभानुमूर्तिः ।
सद्बोधपंडितजनंडितशुद्धकीर्तिः ॥
सत्कांतिनिर्जितसमुज्वलचन्द्रमूर्तिः ।
भट्टारको विजयकीर्तिरसौ प्रजीयात् ॥ ३ ॥
तदीयांघ्रियुग्मांबुजाधारभाजा ।
कृतं भक्तितो वर्णिनारायणेन ॥
अनंतव्रतोद्योतनं पूजकानां ।
सदानंदचन्द्रोदयं तत्करोतु ॥ ४ ॥

सूर्यपूर्या (सूरत) मनंताख्य व्रतस्योद्यापनं मया ।
नारायणेन भव्यानां कृतं सद्बोध हेतवे ॥ ५ ॥

॥ इति श्री अनंतव्रतस्योद्यापनं समाप्तम् ॥

अथ पुण्याहवाचनं।

श्री निर्जरेशाधिपचक्रपूर्वं श्रीपादपंकेरुहयुग्ममीशं ।
श्री वर्धमानं प्रणिपत्य भक्त्या संकल्पमेनं कथयामि सिद्ध्यै ॥

ॐ स्वस्ति श्रीयजमानाचार्यप्रभृतिसमस्तभव्यजनानां सद्धर्मे श्रीबलायुरारोग्यैश्वर्याभिवृद्धिरस्तु ।

अद्य भगवतो महापुरुषस्य श्रीमदादिब्रह्मणो मते त्रैलोक्यमध्यमध्यासीने मध्यलोके श्रीमदनावृतयक्षसंसेव्यमाने दिव्यजम्बूवृक्षोपलक्षितजंबूद्वीपे, महनीयमहामेरोर्दक्षिणभागे, अनादिकालसंसिद्धभरतनामधेयप्रविराजितषट्खण्डमण्डितभरतक्षेत्रे, सकलशलाकापुरुषसंभूतिसम्बन्धविराजितार्यखंडे, परमधर्मसमाचरणगुर्ज्जरदेशे, अस्मिन् विनेयजनताभिरामे, ईडरग्रामे, श्रीदिगंबरजैनकाष्ठासंघे नंदीगच्छे आदि श्रीमद्भट्टारक श्रीरामसेनाम्नाये महाशांतिकर्मणोचित्ते, अत्र वृषभेनाथस्य (आदिनाथस्य) दिव्यमहा चैत्यालयप्रदेशे; एतदवसर्पिणीकालावसाने प्रवृत्तसुवृत्तचतुर्दशमनूपमान्वितसकललोकव्यवहारे, श्रीवृषभस्वामिपौरस्त्यमंगलमहापुरुषपरिषत्प्रतिपादितपरमोपशमपर्वक्रमे, वृषभसेनसिंहसेनचारुसेनादिगणधरस्वामिनिरूपित-

---

१–जहां पूजन होता हो उस ग्रामका नाम लेवें, २–मंदिरमें जो मूलनायक हो उनका नाम लेवें ।

विशिष्टधर्मोपदेशे। दुःखमसुखमानंतरप्रवर्तमानकलियुगापरनामधेयदुःखमाभिधान पंचमकालप्रथमपादे, महर्तिमहावीरवर्धमानतीर्थङ्करोपदिष्टसद्धर्मव्यतिकरे,श्रीगौतमस्वामिप्रतिपादितसन्मार्गप्रवर्त्तमाने, श्रेणिकमहामंडलेश्वरसमाचरितसन्मार्गाविशेषे, विक्रमांकनृपालपालितप्रवर्त्तमानानुकूलशकनृपकाले, १९[1]१३ वर्षसंमिते, प्रवर्तमान आनंद[2]नाम संवत्सरे, अमु[3]कमासे शुक्ल[4]पक्षे, अष्ट[5]मितिथौ अमु[6]कवासरे (...) प्रशस्ततारकायोगकरणद्रेकाणहोरामुहूर्तलग्नयुक्तायां, अष्टमहाप्रातिहार्यशोभितश्रीमदर्हत्परमेश्वरसन्निधौ, श्री शारदासन्निधौ, राजर्षिपरमर्षिब्रह्मर्षिसन्निधौ, विद्वत्समाजसन्निधौ, अनादिश्रोतृसन्निधौ, देवब्राह्मणसन्निधौ सुब्राह्मण सन्निधौ, यागमंडलभूमिशुद्ध्यर्थं द्रव्यशुद्ध्यर्थं पात्रशुद्ध्यर्थं क्रियाशुद्ध्यर्थं मंत्रशुद्ध्यर्थं महाशांति कर्मसिद्धिसाधनयंत्रमंत्रतंत्रविद्याप्रभावसंसिद्धिनिमित्तविधीयमानस्य अमुँक (.......) क्रियामहोत्सवसमये पुण्याहवाचनं करिष्ये। सर्वैःसभाजनैरनुज्ञायतां, विद्वाद्विशिष्टजनैरनुज्ञायतां, महाजनैरनुज्ञायतां तद्यथा।

प्रस्थमात्रतंदुलस्योपरि ह्रींकारसंवेष्टितस्वस्तिकयंत्रे मंत्रपरिपूजितमणिमयमंगलकलशं संस्थाप्य, यजमानाचार्योऽपसव्यहस्तेन धृत्वा पुण्याहमंत्रमुच्चारयन् सिंचेत्। ॐ स्वस्तिककलशस्थापनं करोमि।

१—वर्तमान संवतका नाम लेवें, २—संवत्सर जो चलता हो उनका नाम लेवें, ३—चालू मासका नाम, ४—चालू पक्षका नाम लेवें, ५—चालू तीथीका नाम लेवें, ६—जो वार हो उसका नाम लेवें, ७-जिस स्थापन क्रियामें पुण्याहवाचन होता हो उस क्रियाका नाम लेवें।

(पासमें छपे हुए यंत्र अनुसार करीब एक सेर चावल लेकर जमीन पर यंत्र बनावें, फिर उसके ऊपर जलसे भरा हुआ कलश रखकर उसमें नागरवेलका पत्ता रखें और पुण्याहवाचन पढने जावे और कलशका पानी उस पत्तेसे दाहने हाथसे छिडकते जावे ।)

अथ पुण्याहमंत्र—ॐ ह्रां ह्रीं ह्रूं ह्रौं ह्रः नमोऽर्हते भगवते श्रीमते समस्तगंगासिन्ध्वादिनदीनदतीर्थजलं भवतु स्वाहा। जलपवित्रीकरणं ॥

अभ्यर्च्य कलशं तोयपवाहैश्चंदनैः शुभैः ।
अक्षतैः कुसुमैरन्नैर्दीपधूपफलैरपि ॥

ॐ ह्रीं पुण्याहकलशार्चनं करोमि स्वाहा ।

(साथियाके ऊपरके कलशको अर्घ चढावें ।)

॥ कलशार्चनं ॥

आर्या—

जयतु जिनेश्वरशासनमखिलसुखं मे भवतु जगति जनानां।
देशे भवतु सुभिक्षं पांतु चिरं वसुमतिं राज्ञः ॥

ॐ अर्हद्भ्यो नमः। ॐ सिद्धेभ्यो नमः। ॐ सूरिभ्यो नमः। ॐ पाठकेभ्यो नमः। ॐ सर्वसाधुभ्यो नमः।

ॐ अतीतानागतवर्तमानत्रिकालगोचरानन्तद्रव्यगुणपर्याया-त्मकवस्तुपरिच्छेदकसम्यग्दर्शनज्ञानचारित्राद्यनेकगुणगणाधार-पंचपरमेष्ठिभ्यो नमो नमः। ॐ पुण्याहं २ प्रीयंतां २ भगवं-तोऽर्हतः सर्वज्ञाः सर्वदर्शिनः सकलवीर्याः सकलसुखाः त्रिलो-

केशाः त्रिलोकेश्वरपूजिताः त्रिलोकनाथाः त्रिलोकमहिताः त्रिलोकप्रद्योतनकराः। ॐ श्रीमद् भगवदर्हत्सर्वज्ञपरमेष्ठि-परमपवित्रशांतिभट्टारकपादपद्मप्रसादात् सद्धर्मश्रीबलायुरारो-ग्यैश्वर्याभिवृद्धिरस्तु।

ॐ वृषभादयो महतिमहावीरवर्धमानपर्यंताः परमतीर्थंकर-देवाश्चतुर्विंशत्यर्हंतो भगवन्तः सर्वज्ञाः सर्वदर्शिनः संभिन्नतम-स्का वीतरागद्वेषमोहास्त्रिलोकनाथास्त्रिलोकमहितास्त्रिलोकप्रद्यो-तनकरा जातिजरामरणविप्रमुक्ताः सकलभव्यजनसमूहकमल-वनसम्बोधदिनकराः देवाधिदेवाः। अनेकगुणगणशतसहस्रा-लंकृतदिव्यदेहधराः। पंचमहाकल्याणाष्टमहाप्रातिहार्यचतुस्त्रिं-शदतिशयविशेषसंप्राप्ताः। इन्द्रचक्रधरबलदेववासुदेवप्रभृति-दिव्यसमानभव्यवरपुण्डरीकपरमपुरुषवरमकुटतटनिबिड नवद्ध-मणिगणकरनिकरवारिधाराभिषिक्तचारुचरणकमलयुगलाः। स्वशिष्यपरशिष्यवर्गं प्रसीदंतु वः परममांगल्यनामधेयाः सद्धर्मकार्येष्विहामुत्र च सिद्धाः सिद्धिं प्रयच्छंतु नः

अतीतकालसंजातविविधविबुधनिवहप्रार्थितार्थप्रदानस-द्धर्मपारिजातपादपप्रभावोद्भूतसंपत्समेताः। निखिलभुवनकु-हरविश्रुतयशोराशिधवलितहरित्क्रयनिलयनिलिंपानंतविनीज-नमनोवितर्क्यमानकल्याणपरम्पराः। अनवरतविनमदखिलसुर-नरोरगखेचरपतिमुकुटतटताटितमाणिक्यमयूखमालालंकृतक्रम-कमलयुगलाः।

ॐ निर्वाण सागर, महासाधु, विमलप्रभ, श्रीधर, सुदत्त, अमलप्रभ, उद्धर, अंगिर, सन्मति, सिंधु, कुसुमांजलि, शिवगण,

उत्साह, ज्ञानेश्वर, परमेश्वर, विमलेश्वर, यशोधर, कृष्ण, ज्ञानमति, शुद्धमति, श्रीभद्र, अतिक्रांत, शांताश्चेति चतुर्विंशत्य-तीतकालतीर्थंकर परमजिनदेवाश्च वः प्रीयंतां२ ।

ॐ संप्रतिकालश्रावकश्रेयस्कर स्वर्गावतरण जन्माभि-षवणपरिनिष्क्रमणकेवलज्ञाननिर्वाणकल्याणविभूतिभूषितमहा-भ्युदयाः । सिद्धविद्याधरराजमहाराजमण्डलीकमहामण्डलीकमु-कुटबद्धबलकेशवसार्वभौमादिविजयदानवोरगेन्द्रकिरीटप्रभाम-णिगणप्रभाप्ररूढ़नि जलप्रवाहप्रक्षालितचारुचरणनखकिरणच-न्द्रचन्द्रिकाप्रतिहतपापांधकाराः ।

ॐ वृषभ, अजित, शंभव, अभिनन्दन, सुमति, पद्मप्रभ, सुपार्श्व, चन्द्रप्रभ, पुष्पदन्त, शीतल, श्रेयांस, वासुपूज्य, विमल, अनन्त, धर्म, शांति, कुन्थु, अर, मल्लि, मुनिसुव्रत, नमि, नेमि, पार्श्व, श्रीवीर वर्धमानाश्चेति चतुर्विंशतिवर्तमानकालतीर्थंकरपरम जिनदेवाश्च वः प्रीयंतां२ ।

ॐ भविष्यत्कालभव्याभ्युदयनिमित्तनिखिलकल्याण-रमणीयकत्रिभुवनैश्वर्यशोभितमहाप्रभावाः । सहर्षसंभ्रमप्रणुत-चतुर्निकायामरपतिनिकरमौलिविलम्बितरत्नरंजितानेकमणिग-णखचितसुवर्णसिंहासनालंकृत सहस्रदलकमल विष्टराधिष्ठित पादपद्मयुगुलाः ।

ॐ महापद्म, सुरदेव, सुपार्श्व स्वयंप्रभ, सर्वात्मभूत, देवपुत्र, कुलपुत्र, उदंक, प्रौष्ठिल, जयकीर्ति, मुनिसुव्रत, अर, निःपाप, निष्कषाय, विपुल, निर्मल, चित्रगुप्त, समाधिगुप्त, स्वयभू, अनि-

वर्तिक, जय, विमल, देवपाल, अनन्तवीर्यश्चेति चतुर्विंशति अनागतकालतीर्थंकरपरमजिनदेवाश्च वः प्रीयंतां २ ॥

ॐ अनाद्यविद्याविलासदुस्तरतमःपटलपटावगुण्ठितजगदूर्जितज्योतिः स्वरूपयथावस्थितसमस्तवस्तुस्वरूपनिरूपणप्रवीणादिब्रह्मवदनकंजसंजातद्वादशांगचतुर्दशपूर्वप्रपंचप्रवचनपारावारपारीणाः ।

ॐ वृषभसेन, कुम्भ, दृढरथ, शतधनु, देवशर्म, धनदेव, नन्दन, सोमदत्त, सूरदत्त, वायुशर्म, यशोबाहु, मार्गदेव अग्नि, अग्निदेव, अग्निगुप्त, चित्राग्नि, हलधर, महीधर, माहेन्द्र, वासुदेव, वसुन्धर, अचल, मेरुधर, मरुभूति, सर्वयश, सर्वयज्ञ, सर्वगुप्त, सर्वप्रिय, सर्वदेव, सर्वविजय, विजयगुप्त, विजयमित्र, विजयदल, अपराजित, वसुमित्र, विश्वसेन, सुसेन सत्यदेव, देवसत्य, सत्यगुप्त, सत्यमित्र, शर्मद, विनत, शंबर, मुनिगुप्त, मुनियज्ञ, मुनिदेव, गुप्तयज्ञ, मित्रयज्ञ, स्वयंभू, भगदेव, भगदत्त, भगफल्गु, मित्रफल्गु, प्रजापति, सवसह, वरुण, धनपाल, मघव, तेजोराशि, महावीर, महारथ, विशाल, महाज्वाल, सुविशाल वज्र, वज्रशाल, चन्द्र, चन्द्रचूल, मेघेश्वर, कच्छ, महाकच्छ, नमि, विनमि बल, अतिबल, वज्रबल, नंदी, महानुभोगी, नंदिमित्र, महानुभाव, कामदेवानुपमाश्चेति आदिब्रह्म समवशरण प्रवर्त्तमान चतुरशीतिगणधरदेवाश्च वः प्रीयंतां२ ॥

ॐ वृषभसेन, सिंहसेन, चारुसेन, वज्रनाभि, चमर, वज्रचमर, बलदत्त, विदर्भ, अनगार, कुन्थु, धर्म, मंदर, जयार्य, अरिष्टसेन, चक्रायुध, स्वयंभू, कुंभार्य, विशाख, मल्लि, सुप्रभ,

वरदत्त, स्वयंभू, गौतमाश्चेति चतुर्विंशतितीर्थंकरसभाभासमानगणधर मुख्याश्च वः प्रीयंतां२ ।

ब्राह्मी, आत्मगुप्ता, धर्मश्री, मेरुषेणा, अनंतमति, रतिषेणा, मीनश्री, वरुणश्री, घोषावती, धरणश्री, धारणा, वरसेना, पद्मश्री, सर्वश्री, सुव्रता, हरिषेणा, भावश्री, कूर्पश्री, अमरसेना, पुष्पदंता, मार्गश्री, यक्षश्री, सुलोचना, चन्दनाश्चेति चतुर्विंशतिगणिनीमुख्याश्च वः प्रीयंतां२ ।

श्रेयांस, ब्रह्मदत्त, सुरेन्द्रदत्त, इन्द्रदत्त, पद्मदत्त, सोमदत्त, महेन्द्रदत्त पुष्पमित्र, पुनर्वसु, नन्दन, सौंदर, जय, विशाख, धान्यसेन, धर्ममित्र, सुमित्र, अपराजित, नंदी, नंदिसेन, वृषभसेन, दत्त, वरदत्त, धान्य, नंदनाश्चेति चतुर्विंशतिदातृमुख्याश्च वः प्रीयंतां२ ।

भरत, सत्यभाव, सत्यवीर्य, मित्रभाव, मित्रवीय, धर्मवीर्य, दानवीर्य, मघव, युद्धवीर्य, श्रीमन्दर, त्रिपिष्ठ, द्विपिष्ठ, स्वयंभू, पुरुषोत्तम, पुरुषवर, पुण्डरीक, दत्त कुनाल, नारायण, सुभौम, अजितंजय, उग्रसेन, अजित, श्रेणिकाश्चेति चतुर्विंशतिश्रोतृमुख्याश्च वः प्रीयंतां २ ॥

गोमुख, महायक्ष, त्रिमुख, यक्षेश्वर तुम्बुरु, कुसुम, वरनंदी, विजय, अजित, ब्रह्मेश्वरकुमार, षण्मुख, पाताल, किन्नर, किंपुरुष, गरुड, गंधर्व, महेन्द्र, कुबेर, वरुण, विद्युत्प्रभ, सर्वाण्ह, धरणीन्द्र, मातंगनामानश्चेति चतुर्विंशतियक्षेन्द्राश्च वः प्रीयंतां २।

चक्रेश्वरी, रोहिणी, प्रज्ञप्ती, वज्रशृंखला पुरुषदत्ता, मनोवेगा, काली, ज्वालामालिनी, महाकाली, मानवी गौरी गांधारी, वैरोटी, अनन्तमति, मानसी, महामानसी, जया विजया, अपराजिता, बहुरूपिणी, चामुण्डी, कूष्माण्डी, पद्मावती, सिद्धायिन्यश्चेति चतुर्विंशतिशासनदेवताश्च वः प्रीयंतां २ ॥

नाभिराज, जितशत्रु दृढराज, स्वयंवर, मेघरथ, धरणराज, सुप्रतिष्ठ, महासेन, सुग्रीव, दृढरथ विष्णुराज, वसुपूज्य, कृतवर्म, सिंहसेन भानुराज, विश्वसेन, सुरसेन, सुदर्शन, कुम्भराज, सुमित्र, विजयराज, समुद्रविजय, विश्वसेन, सिद्धार्थाश्चेति चतुर्विंशति जिनजनकाश्च वः प्रीयंतां२ ।

मरुदेवी विजया, सुषेणा, सिद्धार्था, सुमंगला, सुषीमा, पृथ्वी, लक्ष्मणा, जयरामा, सुनन्दा नन्दा, जयावती आर्यश्यामा, लक्ष्मीमती, सुप्रभा, एरादेवी, श्रीकांता, मित्रसेना, प्रभावती, सोमा, वर्मिला, शिवदेवी, ब्राह्मी, प्रियकारिण्यश्चेति चतुर्विंशतिजिनमातृकाश्च वः प्रीयंतां२ ।

प्रतिश्रुति, सन्मति, क्षेमंकर, क्षेमंधर, सीमंकर, सीमंधर, विमल, वाहन, चक्षुष्म, यशस्वि, अभिचन्द्र, चन्द्राभ, प्रसेनजित, नाभिराजाश्चेति वर्तमानचतुर्दशकुलधराश्च वः प्रीयंतां२ ।

कनक, कनकप्रभ, कनकराज, कनकध्वज, कनकपुंगव, नलिन, नलिनप्रभ, नलिनराज, नलिनध्वज, नलिनपुंगव, पद्म, पद्मप्रभ, पद्मराज, पद्मध्वज, पद्मपुंगव, महापद्माश्चेति भविष्यत्कुलधराश्च वः प्रीयंतां२ ।

श्रीषेण, पुंडरीक, वज्रनाभि, वज्रदन्त, वज्रघोष, चारुदत्त, श्रीदत्त, सुवर्णप्रभ, भूवल्लभ, गुणपाल, धर्मसेन कीर्त्योघाश्चेति अतीतद्वादशचक्रवर्तिनश्च वः प्रीयंतां२ ।

भरत, सगर, मघव सनत्कुमार, शांति कुन्थु, अर, सुभौम, महापद्म, हरिषेण, जयसेन पद्मदत्ताश्चेति वर्तमानद्वादशचक्रवर्तिनश्च वः प्रीयंतां२

भरत, दीर्घदन्त, मुक्तदन्त, गूढदन्त, श्रीषेण, श्रीभूति, श्रीकांत, पद्म, महापद्म चित्रवाहन, विमलवाहन, अरिष्टसेनाश्चेति अनागतद्वादशचक्रवर्तिनश्च वः प्रीयंतां२ ।

श्रीकांत, शांतचित्त, वरबुद्धि, मनोरथ, दयामूर्ति, विपुलकीर्ति, श्रीराम, प्रभाकर, संजयंनाश्चेति अतीतनवबलदेवाश्च वः प्रीयंतां २ ।

विजय अचल, सुधर्म, सुप्रभ सुदर्शन, नंदि, नंदिमित्र, राम, पद्माश्चेति वर्तमान नवबलदेवाश्च वः प्रीयंतां२ ।

चन्द्र महाचन्द्र चन्द्रधर, हरिचन्द्र, सिंहचन्द्र, वरचन्द्र, पूर्णचन्द्र, शुभचन्द्र, श्रीचन्द्राश्चेति अनागतनवबलदेवाश्च वः प्रीयंतां२ ।

काकुत्स, वरभद्र, सुभद्र सुश्लिष्ट, नरवीर, शत्रुँजय, अमितारि प्रियदत्त, विमलवाहनाश्चेति अतीतनववासुदेवाश्च वः प्रीयंतां२ ।

त्रिपिष्ट, द्विपिष्ट, स्वयंभू, पुरुषोत्तम पुरुषसिंह, पुरुषवर, पुण्डरीक, लक्ष्मीधर, कृष्णाश्चेति वर्तमाननववासुदेवाश्च वः प्रीयंतां २ ॥

नन्दि, नन्दिमित्र, नंदिषेण, नंदिभूति, बल, महाबल, अतिबल, त्रिपिष्ट, द्विपिष्टाश्चेति अनागतनववासुदेवाश्च वः प्रीयंतां२ ।

निशुंभ, विद्युत्प्रभ, रणरसिक, मनोवेग, चित्रवेग, दृढरथ, वज्रजंघ, विद्युज्जंघ, प्रल्हादाश्चेति अतीतनवप्रतिवासुदेवाश्च वः प्रीयंतां२ ।

अश्वग्रीव तारक, मेरुक निशुंभ, कैटभ, बलि, प्रहरण, रावण, जरासंघाश्चेति वर्तमाननवप्रतिवासुदेवाश्च वः प्रीयंतां२ ।

श्रीकण्ठ, हरिकण्ठ, नीलकण्ठ, अश्वकण्ठ, सुकण्ठ शिखिकण्ठ, अश्वग्रीव, हयग्रीव, मयूरग्रीवाश्चेति अनागतनवप्रतिवासुदेवाश्च वः प्रीयंतां२ ।

भीम महाभीम, रुद्र, महारुद्र, काल, महाकाल, दुर्मुख, निर्मुख, अधोमुखाश्चेति वर्तमाननवनारदाश्च वः प्रीयंतां२ ।

भीमावली, जितशत्रु, रुद्र, महारुद्र, विश्वानल, सुप्रतिष्ठा, अचल, पुंडरीक, अजितधर, जितनाभि, पीठ, सत्यकीपुत्राश्चेति वर्तमानएकादशरुद्राश्च वः प्रीयंतां२ ।

प्रमद, संमद, प्रकाम, कामद, भवहर, मनोहर, मनोभव, मार, काम, रुद्र, अंगजाश्चेति, अनागत एकादशरुद्राश्च वः प्रीयंतां २ ।

असुर, नाग, सुपर्ण, द्वीपर्ण, द्वीपोदधि, स्तनित, विद्युत्, अग्नि, वात दिक्कुमाराश्चेति दशविधभवनेन्द्राश्च वः प्रीयंतां२ ।

चमर, वैरोचन, धरण, भूतनाद, वेणुदेव, वेणुधारि, पूर्णवशिष्ठ, जलप्रभ, जलकांत, घोष, महाघोष, हरिषेण, हरिकांत, अमितगति, अमितवाहन, अग्निशिखि, अग्निवाहन, वैलम्ब, प्रलम्ब प्रभंजनाश्चेति विंशतिभवनेन्द्राश्च वः प्रीयंतां२।

किन्नर, किंपुरुष, गरुड, गंधर्व, यक्ष, राक्षस भूत, पिशाचाश्चेति अष्टविधव्यन्तरेन्द्राश्च वः प्रीयंतां२॥

किन्नर, किंपुरुष, सत्पुरुष, महापुरुष, महाकाय, अतिकाय, गीतरति, गीतयशः, पूर्णभद्र, मणिभद्र, भीम, महाभीम, सुरूप, प्रतिरूप काल महाकालाभिधानाश्चेति षोडश व्यन्तरेन्द्राश्च वः प्रीयंतां २॥

चन्द्रादित्यग्रह नक्षत्र प्रकीर्णक तारकाश्चेति पंचविध ज्योतिष्केंद्राश्च व प्रीयंतां २।

सौधर्म, ईशान, सनत्कुमार, माहेंद्र, ब्रह्म, ब्रह्मोतर, लांतव, कापिष्ठ, शुक्र, महाशुक्र, शतार, सहस्रार, आनत, प्राणत, आरण अच्युतेंद्राश्चेति षोडशकल्पेंद्राश्च वः प्रीयंतां२।

हिट्ठिमहिट्ठिम हिट्ठिममज्झिम हिट्ठिमोपरिम मज्झिमहिट्ठिम मज्झिममज्झिमोपरिम उपरिमहिट्ठिम उपरिममज्झिम उपरिमोपरिमाख्य नवग्रैवेयकनिवासिनोऽहमिंद्रदेवाश्च वः प्रीयंतां१।

त्रिलोकाविषयलोकालोकवर्तिसर्वद्रव्यपर्यायक्रमकरणव्यवधानातिक्रमसाक्षात्करणकेवलाख्यपरंज्योतिप्रमुखस्वाभाविकानंतगुणविशेषविभूपिताः सकलचक्रिकुरुभवार्यफणींद्राहमिंद्रत्रिकालसंभावितसुखानंतगुणित खराभावितक्षीणपर्यायमर्वकालशाश्वतपरमोत्कृष्टसुखानन्दमंदिरायमाणाः।

वीतरागद्वेषमोहाः जातिजरामरणविप्रमुक्ताः देवाधिदेवाः परमनिर्वाणसंप्राप्ताः परममांगल्यनामधेयाः अष्टकर्ममलविलय-स्पष्टीभूतपरमावगाढसम्यक्त्वाद्यष्टगुणविशिष्टसकलसिद्धसमूहाश्च वः प्रीयंतां२ ॥

रोहिणी, प्रज्ञप्ती, वज्रशृंखला, वज्रांकुशा अप्रतिचक्रा, पुरुषदत्ता, काली, महाकाली, गौरी, गांधारी, ज्वालामालिनी, मानवी, वैरोटी, अच्युता, मानसी, महामानस्यश्चेते षोडश-विद्यादेवताश्च वः प्रीयंतां२ ॥

जया, विजया, अजिता, अपराजिता जंभा, मोहा, स्तंभा, स्तंभिन्यश्चेति अष्ट महादेवताश्च वः प्रीयंतां२ ॥

श्री, ह्री, धृति, कीर्ति, बुद्धि, लक्ष्मी, शांति पुष्टयश्चेति अष्ट दिक्कन्यकाश्च वः प्रीयंतां२ ।

नित्यप्रवृत्ततारकायोगकरणाद्युपेतपक्षतिप्रभृतिसमस्त-तिथिप्रभावप्रयोजनप्रधानाः यक्ष, वैश्वानर, राक्षस, नधृत, पन्नग, असुरकुमार, पितृ, विश्वमालिनी, चमर, वैरोचन, महाविद्युमार, विश्वेश्वर, पिण्डाशिनश्चेति पंचदशतिथिदेवाश्च वः प्रीयंतां२ ॥

अनन्त, कुलिक, वासुकी, शंखपाल, तक्षक, पद्म, महापद्म, कर्कोटक जयविजयादि अष्ट महानागाश्च वः प्रीयंतां२ ।

इंद्र, अग्नि, यम, नैऋत, वरुण, वायु, कुबेर, ईशान, धर-णींद्र, चन्द्राश्चेति दशदिक्पालदेवाश्च वः प्रीयंतां२ ।

आदित्य, सोम, मंगळ, बुध, बृहस्पति, शुक्र, शनि, राहु केतु, नाम नवग्रहाश्च वः प्रीयंतां २।

काळ, निकाळ, लोहित, कनक, कनकस्थान, अन्तरद, कच, यव, दुंदुभि, रत्ननिभ, रूप, निर्मास, नीलनीलभास, अश्व, अश्वस्थान, कोश, कंशवर्ण, शंख, शंखपरिमाण, शंखवर्ण, उदय, पंचवर्ण, तिल, तळपुच्छ, क्षारराश, धूम, धूमकेतु, एकसंस्थान, अक्ष, कलेवर, वकट, अभिन्नसंधि, ग्रंथिमान चतुः, पाद, विद्युज्जिह्व, नभ, सदृश, निलय, काळ, काळकेतु, अनय, सिंहायु, विपुलकाल, महाकाळ, रुद्र, सन्तान, सम्भव, सर्वार्थीश, शांति, वस्तून, निश्चळ, प्रलंभ, निमंत्र, ज्योतिष्मत, स्वयंप्रभ, भासुर, विरज, निर्दुःख, वीतशोक, सीमंकर, क्षेमंकर, अभयंकर, विजय, वैजयंत, अपराजित, विमाळ, त्रस्त, विजयिष्णु, विकस, करिकाष्ठ, एकजटि, अग्निज्वाल, ज्वाळकेतु, क्षीररस, अघ, श्रवण, राहु, महाग्रह, भावग्रह, कुज, शनि, बुध शुक्र गुरवश्चेति अष्टाशीति ग्रहाश्च वः प्रीयंतां२।

ग्राम नगर खेड खर्वड मडंब पत्तन द्रोणामुख संवाहन घोष, राजधानी, जिनधाम, प्रासाद, गोपुर, गृहमण्डप, समस्त, वास्तु वास्तव्यास्ताः समर्चनीयाः। ब्रह्म, इन्द्र, अग्नि, यम, नैर्ऋति, वरुण, वायु, कुबेर, ईशान, आर्य, विवस्वत भूधर, सविन्द्र, साविन्द्र, इन्द्र, इन्द्रराज, रुद्र, रुद्रराज, अप, अपवत्स, पर्जन्य, जयन्त, भास्कर, सत्यक, भृश, अन्तरिक्ष, पुष, वितथ, राक्षस गन्धर्व भृंगराज, मृष, दौवारिक, सुग्रीव, पुष्पदन्त, असुर, शोष, रोग, नाग मुख्य भल्लाट, मृगदेव, अदिति,

उद्दिति, विचारी, पूतना, पाप राक्षसी, चरकीनामधेया वास्तु-देवताः वः प्रीयंतां २ ।

सर्वे गुरुभक्ता अक्षीणकोशकोष्ठागारा भवेयुः । दानतपोवीर्यधर्मानुष्ठानं नित्यमेवास्तु । मातृपितृभ्रातृपुत्रपौत्रकलत्रगुरुसुहृतस्वजनसम्बंधिबन्धुवर्गसहितस्य अस्य यजमानस्य धनधान्यैश्वर्यद्युतिबलायुयशस्कीर्तिवृद्धिवर्धनं भवतु । समोद प्रमदा भवंतु । ग्रामदेवता प्रसीदंतु, गृहदेवताः प्रसीदंतु, कुलदेवता प्रसीदंतु दीक्षागुरुवः प्रसीदंतु, शिक्षागुरुवः प्रसीदंतु, विद्यागुरुव प्रसीदंतु, चातुर्वर्णसंघाः प्रसीदंतु । शांतिर्भवतु, कांतिर्भवतु, तुष्टिर्भवतु, पुष्टिर्भवतु सिद्धिर्भवतु, वृद्धिर्भवतु । अविघ्नमस्तु, आरोग्यमस्तु, आयुष्यमस्तु, शिवकर्मास्तु, कर्मसिद्धिरस्तु, शास्त्रसमृद्धिरस्तु, इष्टसम्पदस्तु, अरिष्टनिरसनमस्तु, धनधान्यसमृद्धिरस्तु । काममांगल्योत्सवाः संतु । शाम्यंतु घोराणि, शाम्यंतु पापानि । पुण्यं वर्धतां, धर्मो वर्धतां, श्रीवर्धतां, आयुवर्धतां, कुलं गोत्रं चाभिवर्धतां । स्वस्ति भद्रं चास्तु नः, हस्तास्ते परिपंथिनः, शत्रवो निधनं यांतु, निःप्रतिघमलमस्तु शिवमलमस्तु

यत्सुखं त्रिषु लोकेषु व्याधिव्यसनवर्जितं ।

अभयं क्षेममारोग्यं स्वस्तिरस्तु विधीयते ॥ १ ॥

श्रीशांतिरस्तु शिवमस्तु, जयोऽस्तु नित्यमारोग्यमस्तु तव पुष्टिसमृद्धिरस्तु, कल्याणमस्तु सुखमस्त्वभिवृद्धिरस्तु दीर्घायुरस्तु, कुलगोत्रधनं सदास्तु ॥ १ ॥

भूता भवंतो भव्याश्च जिनाधीशागणाधिपाः ।
गणिन्योदातृमुख्याश्च श्रोतारो यक्षनायकाः ॥ ३ ॥
यक्ष्यो जिनानां पितरो मातरो मनवस्तथा ।
चक्रिणो बलदेवाश्च केशवाः प्रतिकेशवाः ॥ ४ ॥
नारदाश्च ततो रुद्राश्चतुर्विधसुराधिपाः ।
रोहिण्याद्या जयाद्याश्च श्र्यादयस्तिथिदेवताः ॥ ५ ॥
महानागाश्च दिक्पाला ग्रहाः वास्तु सुरास्तथा ।
ग्रामाधिदेवता क्षेत्रदेवताः कुलदेवताः ॥ ६ ॥
एते देवगणाः सर्वे भण्याः पुण्याहवाचने ।
ततो देवाः प्रसीदंतु विघ्ना नश्यंतु सर्वथा ॥ ७ ॥
महायज्ञसमारम्भे गंधाबुस्नपने तथा ।
गन्धोदकप्रदाने च शांतिपुष्ट्याद्युपक्रमे ॥ ८ ॥
आधानादिक्रियारम्भे ग्रहवक्रत्वसंभवे ।
परमंत्रप्रयोगे च महोत्पाते महारुजि ॥ ९ ॥
सर्वेष्वपि च होमेषु बीजानां सेचने तथा ।
पुण्याहवाचना पुण्या भण्या संकल्पपूर्विका ॥ १० ॥

॥ इतिश्री पुण्याहवाचनम् ॥

अथ मंगलाष्टक ।

श्रीमन्नम्रसुरासुरेंद्रमुकुटप्रद्योतरत्नप्रभा ।
भास्वत्पादनखेंदवः प्रवचनांभोधौ व्यवस्थायिनां ॥
ये सर्वे जिनसिद्धसूर्यनुगतास्ते पाठकाः साधव-
स्तुत्या योगिजनैश्च पंचगुरवः कुर्वंतु वो मंगलं ॥ १ ॥

सम्यग्दर्शनबोधवृत्तममलं रत्नत्रयं पावनं ।
मुक्तिश्रीनगराधिपजिनपतेः स्वर्गापवर्गप्रदं ॥
धर्मं सूक्तिसुधावचैत्यमखिलं जैनालयं स्वालयं ।
प्रोक्तं तत्त्रिविधं चतुर्विधमिमं कुर्वंतु वो मंगलं ॥ २ ॥

नाभेयादिजिनाधिपास्त्रिभुवने ख्याताश्चतुर्विंशतिः ।
श्रीमंतो भरतेश्वरप्रभृतयो ये चक्रिणो द्वादश ॥
ये विष्णुप्रतिविष्णुलांगलधराः सप्ताधिका विंशतिः ।
त्रैलोक्याभयदास्त्रिषष्टिपुरुषाः कुर्वंतु वो मंगलं ॥ ३ ॥

ये पंचौषधिरिद्धयः श्रुततपोरिद्धिं गताः पंच ये ।
ये चाष्टांगमहानिमित्तकुशला येऽष्टौ विधाश्चारणः ॥
पंचज्ञानधराश्च येऽपि बलिनो ये बुद्धिरिद्धीश्वराः ।
सप्तैते सकलाश्च ते गणधराः कुर्वंतु वो मंगलं ॥ ४ ॥

देव्यश्चाष्ट जयादिका द्विगुणिता विद्यादिका देवता ।
श्रीतीर्थंकरमातृकाश्च जनका यक्षाश्च यक्षीश्वराः ॥
द्वात्रिंशत्त्रिदशाग्रहा निधिसुरा दिक्कन्यकाश्चाष्टधा ।
दिक्पाला दश इत्यमी सुरगणाः कुर्वंतु वो मंगलं ॥ ५ ॥

ज्योतिर्व्यंतरभावनामरगृहे मेरौ कुलाद्रौ स्थिताः ।
जम्बूशाल्मलिचैत्यशाखिषु तथा वक्षाररौप्याद्रिषु ॥
इक्ष्वाकारगिरौ च कुण्डलनगे द्वीपे च नन्दीश्वरे ।
शैले ये मनुषोत्तरे जिनगृहाः कुर्वंतु वो मंगलं ॥ ६ ॥

कैलासे वृषभस्य निर्वृति महावीरस्य पावापुरे ।
चम्पायां वसुपूज्यसज्जिनपतेः सम्मेदशैलेऽर्हतां ॥
शेषाणामपि चोर्ज्जयंतशिखरे नेमीश्वरस्यार्हतो ।
निर्वाणावनयः प्रसिद्धविभवाः कुर्वंतु वो मंगलं ॥ ७ ॥

ब्राह्मीचन्दनबालिका भगवति राजीमती द्रौपदी ।
कौशल्या च मृगावती च सुलसा सीता सुभद्रा शिवा ॥
कुन्तीशीलवती नलस्य दुहिता चूला प्रभावत्यपि ।
पद्मावत्यपि सुन्दरी च प्रमुखाः कुर्वंतु वो मंगलं ॥ ८ ॥

यो गर्भावतरेऽर्हतामनु तथा जन्माभिषेकोत्सवे ।
यो जातः परिनिष्क्रमेण सततं यः केवलज्ञान भाक् ॥
यै कैवल्यपुरः प्रवेशमहिमा संभावितः स्वर्गिभिः ।
कल्याणानि च पंच सप्त सततं कुर्वंतु वो मंगलं ॥ ९ ॥

इत्थं श्रीजिन मंगलाष्टकमिदं कल्याणकालेऽर्हतां ।
पूर्वाह्ने च महोत्सवे च सततं श्रीसौख्य सम्पत्प्रदं ॥
ये शृण्वंति पठंति तैश्च मनुजैर्धर्मार्थकामान्वितैः ।
लक्ष्मीराश्रयते विपायरहिता कुर्वंतु वो मंगलं ॥१०॥

॥ इति मंगलाष्टकं ॥

शांतिमंत्रः।

ॐ नमः सिद्धेभ्यः। श्री वीतरागाय नमः ॐ नमोऽर्हते भगवते, श्रीमते, श्री पार्श्वतीर्थंकराय द्वादशगणपरिवेष्टिताय, शुक्लध्यानपवित्राय, सर्वज्ञाय, स्वयंभुवे, सिद्धाय, बुद्धाय, परमात्मने, परमसुखाय, त्रैलोक्यमहीव्याप्ताय, अनंतसंसार-चक्रपरिमर्दनाय, अनंतदर्शनाय, अनंतवीर्याय, अनंतसुखाय, सिद्धाय, बुद्धाय, त्रैलोक्यवशंकराय, सत्यज्ञानाय, सत्यब्रह्मणे, धरणेन्द्रफणामण्डलमंडिताय, ऋष्यार्यिकाश्रावकश्राविकाप्रमुख-चतुस्संघोपसर्गविनाशाय, घातिकर्मविनाशाय, अघातिकर्म विनाशाय। अपवादं अस्माकं छिंद छिंद, भिंद भिंद। मृत्युं छिंद२, भिंद२। अतिकामं छिंद२, भिंद२। रतिकामं छिंद२, भिंद २। क्रोधं छिंद २, भिंद २। अग्निं छिंद २, भिंद २। सर्वशत्रुं छिंद २, भिंद २। सर्वोपसर्गं छिंद २, भिंद २। सर्वविघ्नं छिंद २, भिंद २। सर्वभयं छिंद २, भिंद २। सर्व राजभयं छिंद २, भिंद २। सर्वचोरभयं छिंद २, भिंद २। सर्वदुष्टभयं छिंद २ भिंद २। सर्वमृगभयं छिंद २, भिंद २। सर्वपरमंत्रं छिंद २, भिंद २। सर्वमात्मकभयं छिंद२, भिंद२। सर्वशूलभयं छिंद २, भिंद २। सर्वक्षयरोगं छिंद २, भिंद २।

सर्वकुष्टरोगं छिंद २, भिंद २। सर्व ज्वरमारिं छिंद२, भिंद२। सर्वगजमारिं छिन्द २, भिन्द २। सर्वाश्वमारिं छिन्द २, भिन्द २। सर्वगोमारिं छिन्द २, भिन्द २। सर्वं महिषमारिं छिन्द २, भिन्द। सर्व धान्यमारिं छिन्द २। भिन्द २, सर्व वृक्षमारिं छिन्द२, भिन्द २। सवगुल्ममारिं छिन्द २, भिन्द२। सर्वपत्रमारिं छिन्द २, भिन्द। सर्वपुष्पमारिं छिन्द २, भिन्द २। सर्वफलमारिं छिन्द २, भिन्द, २। सर्वराष्ट्रमारिं छिन्द २, भिन्द२। सर्व देशमारिं छिन्द २, भिन्द २। सर्व-विषमारिं छिन्द २, भिन्द २। सर्वक्रूररोगं छिन्द २, भिन्द२। सर्ववेतालशाकिनीभयं छिन्द२, भिन्द२। सर्ववेदनीयं छिन्द२, भिन्द २। सर्वमोहनीयं छिन्द २, भिन्द। ॐ सुदर्शनमहा-राजचक्रविक्रमतेजोबलशौर्यशांतिं कुरु कुरु। सर्वजनानन्दनं कुरु २। सर्वभव्यानन्दनं कुरु २। सर्वगोकुलानंदनं कुरु २। सर्वग्रामनगरखेटखर्वटमडम्बपत्तनद्रोणामुखसहानन्दनं कुरु २। सर्वलोकानन्दनं कुरु २। सर्वदेशानन्दनं कुरु २। सर्वयजमा-नानन्दनं कुरु २। हन हन दह दह पच पच कुट कुट शीघ्रं शीघ्रं व्याधिव्यसनवर्जितं अभयक्षेमारोग्यं स्वस्तिरस्तु। शांतिरस्तु शिवमस्तु कुलगोत्रधनं धान्यं सदास्तु। चन्द्रप्रभ, वासुपूज्य, मल्लि, वर्द्धमान, पुष्पदन्त शीतल, मुनिसुव्रत, नेमि-नाथ, पार्श्वनाथ, इत्यनेन मंत्रेण नवग्रहार्थं गंधोदकधारावर्षणम्॥

॥ इति शांतिमंत्र सम्पूर्णः ॥

श्री १०८ आचार्य श्री शांतिसागर दिगम्बर जैन ग्रन्थमाला कमीटीके

मेम्बरोंकी नामावलि ।

१–क्षुल्लक आदिसागरजी महाराज (भीलोडा)

२–दोशी फूलचन्द सुरचन्द–ईडर (मंत्री)

३–दोशी कस्तूरचन्द अमथालाल–ईडर (केशियर)

४–शाह चुनीलाल मलुकचन्द–भीलोडा (मेम्बर)

५–गांडिया पानाचन्द गुलाबचन्द–वांकानेर (मेम्बर)

* श्रीवीतरागायनमः *

व्रतोद्यापनसंग्रहे

अष्टाह्निकव्रतोद्यापनम् ।

प्रणम्य श्रीजिनाधीशं सर्वज्ञं सर्वपूजितम् ।
वीतरागं जगन्नेत्रं धर्मचक्रप्रवर्तकम् ॥१॥
जिनास्यजां सदावन्दे शारदां मम सारदाम् ।
चतुरशीतिलक्षाणां जन्तूनामुपकारिणीम् ॥२॥
गुरूणां चरणौ नत्वा प्रणम्याष्टविधार्चनम् ।
नन्दीश्वराभिधे द्वीपे द्वापञ्चाशज्जिनालये ॥३॥
आदौ गंधकुटीपूजां पश्चात् सर्वं समाचरेत् ।
यंत्रस्य सिद्धचक्रस्य चतुर्मुखजिनस्य वा ॥४॥
एकैकस्य च दिग्भागे त्रयोदश हि पर्वताः ।
तत्र प्रत्येकचैत्यस्य पूजां कुर्वे शुभाप्तये ॥५॥
पूजनीयो जिनाधीशो नन्दीश्वरस्यस्वस्तिके ।
द्वापञ्चाशत्सुपद्मेषु विमलेषु शिवाप्तये ॥६॥

ॐ ह्रीं नन्दीश्वरद्वीपे जिनपूजनप्रतिज्ञानाय प्रतिमोपरि पुष्पांजलिं क्षिपेत् ।

नन्दीश्वराष्टमविशालमनोज्ञरूपे
द्वीपे जिनेश्वरगृहाश्च भवन्ति युग्मम् ।
पंचाशदिन्द्रमहितान् प्रयजामि सिद्ध्यै
देवेन्द्रनागपतिचर्चितचारुविम्बान् ॥

ॐ ह्रीं नन्दीश्वरद्वीपे द्वापंचाशज्जिनालय अत्र अवतर अवतर संवौषट् स्वाहा । (आह्वाननं) ॐ ह्रीं नन्दीश्वरद्वीपे द्वापंचाशज्जिनालय अत्र तिष्ठ तिष्ठ ठः ठः स्वाहा । (स्थापनं)

ॐ ह्रीं नन्दीश्वर द्वीपे द्वापंचाशज्जिनालय अत्र मम सन्निहितो भव भव वषट् स्वाहा । (सन्निधापनं)

अथाष्टक ।

कर्पूरपूरपरिपूरितभूरिनीर
धाराभिराभिरभितः श्रमहारिणीभिः ।
नन्दीश्वराष्टदिवसानि जिनाधिपाना-
मानन्दतः प्रतिकृतिं परिपूजयामि ॥

ॐ ह्रीं नन्दीश्वर द्वीपे द्वापञ्चाशज्जिनालयजिनविम्बेभ्यः जलं निर्वपामीति स्वाहा ॥ जलं ॥ १ ॥

हृद्घ्राणतर्पणपरैः परितर्पसर्पै-
र्गन्धैः सुचन्दनरसैर्घनकुंकुमाद्यैः ।
नन्दीश्वराष्टदिवसानि जिनाधिपानां
मानन्दतः प्रतिकृतिं परिपूजयामि ॥

ॐ ह्रीं नन्दीश्वरद्वीपे० । चन्दनं ॥ २ ॥

उभिद्रचन्द्रविलसत्किरणावदातैः
सत्कुन्दकोरकनिभैः कलमाक्षतोघैः ।
नन्दीश्वराष्टदिवसानि जिनाधिपाना-
मानन्दतः प्रतिकृतिं परिपूजयामि ॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे० अक्षतान्० ॥ ३ ॥

मन्दारचारुहरिचन्दनपारिजात
सन्तानभूरुहभवैः कुसुमैर्विचित्रैः ।
नन्दीश्वराष्ट दिवसानि जिनाधिपानां
मानन्दतः प्रतिकृतिं परिपूजयामि ॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे० पुष्पं० ॥ ४ ॥

सिद्धैर्विशुद्धनवकांचनभाजनस्थैः
पीयूषमिष्टललितैश्चरुभिर्विचित्रैः ॥ नन्दीश्वराष्ट०

ॐ ह्रीं श्री नन्दीश्वरद्वीपे० चरु० ॥ ५ ॥

ध्वस्तान्धकारनिकरैः कनकावदातै
र्दीपैः प्रदीपितसमस्तदिगन्तरालैः । नन्दी०

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे० दीपं० ॥ ६ ॥

धूपैरमन्दतरसौरभजालगुञ्जद्-
भृङ्गाकुलैरगुरुचन्दनचन्द्रमिश्रैः । नन्दी०

ॐ ह्रीं श्रीनंदीश्वरद्वीपे० धूपं० ॥ ७ ॥

कम्राम्रदाड़िममनोहरमातुलिङ्ग—
जातीफलप्रभृतिसौरभसत्फलाद्यैः । नन्दी०

ॐ ह्रीं श्रीनंदीश्वरद्वीपे० फलं० ॥ ८ ॥

द्वीपेनन्दीश्वरेऽस्मिन् विविधमणिगणाक्रान्तकान्ताङ्गकान्ति-
प्राग्भारभास्तचंद्रद्युतिकरनिकरध्वस्तमिथ्यान्धकारम् ॥
चैत्यं चैत्यालयाँश्चोज्वलकुसुमफलाद्यैरनिन्द्यप्रभावैः ।
भक्त्या येऽभ्यर्चयन्ति स्फुटमसमसुखां ते लभन्ते विमुक्तिं ॥

ॐ ह्रीं नंदीश्वरद्वीपे द्वापंचाशज्जिनालये जिनबिम्बेभ्यः अर्घं निर्पपामिति स्वाहा ॥ अर्घं ॥

अथ प्रत्येकपूजा ।

अष्टम्यां क्रियते साधो नन्दीश्वरोहि शोषकः ।
दशलक्षोपवासस्य फलं चाये जिनाधिपं ॥

ॐ ह्रीं नंदीश्वरद्वीपे द्वापंचाशज्जिनालये नंदीश्वरोपवासाय दशलक्षोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनाय जलादि अर्घं ॥ १ ॥

नवम्यामेक भुक्तं हि महाविभूतिनामभाक् ।
दशसहस्रोपवासस्य फलं चाये जिनाधिपं ॥

ॐ ह्रीं नंदीश्वरद्वीपे द्वापंचाशज्जिनालये महाविभूतिनामोपवासाय दशसहस्रोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनाय जलादि अर्घं ॥ २ ॥

दशम्यां कंजिकाहारस्त्रिलोकसारसंज्ञकः ।
षष्टिलक्षोपवासस्य फलं चाये जिनाधिपं ॥

ॐ ह्रीं नन्दीश्वरद्वीपे द्वापंचाशज्जिनालये त्रिलोकसारनाम शोषकाय षष्टिलक्षोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनाय जलादि अर्घं ॥ ३ ॥

एकादश्यां तिथौ प्रोक्तं मवमौदर्यचतुर्मुखं ।
पंचलक्षोपवासस्य फलं चाये जिनाधिपं ॥

ॐ ह्रीं नन्दीश्वरद्वीपे द्वापंचाशज्जिनालये चतुर्मुखनामशोषकाय पंचलक्षोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनाय जलादि अर्घं ॥ ४ ॥

द्वादश्यामनगारस्य पंचलक्षणनामकः ।
चतुरशीतिलक्षस्य फलं चाये जिनाधिपं ॥

ॐ ह्रीं नंदीश्वरद्वीपे द्वापंचाशज्जिनालये पंचलक्षणनाम शोषकायपंचाशल्लक्षोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनाय जलाद्यर्घं ॥ ५ ॥

त्रयोदश्यामाम्लरसः स्वर्गसोपानसंज्ञकः ।
चत्वारिंशल्लक्षस्य फलं चाये जिनाधिपं ॥

ॐ ह्रीं नन्दीश्वरद्वीपेद्वापंचाशज्जिनालये स्वर्गसोपाननाम शोषकाय चत्वारिंशल्लक्षोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनाय जलाद्यर्घं ॥ ६ ॥

श्रीमत्सुसप्तमदिने वरसर्वसंज्ञः
शाकत्रयेण सहितो वरशुद्ध एषः ।
लक्षोपवासफलदो भवति प्रसिद्धः
चाये जिनं सकलबोधनिधानपात्रम् ॥

ॐ ह्रीं नन्दीश्वरद्वीपे द्वापंचाशज्जिनालये सर्वसम्पन्ननामोपवासाय लक्षोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनायअर्घं ॥८॥

एकादिने १ हीन्द्रध्वजाभिधान
उपोषको यः क्रियते मनुष्यैः ।

तिस्रोह्निकोट्योत्तर पंचलक्षं
चाये जिनं तस्य फलप्रदाय ॥

ॐ ह्रीं नन्दीश्वरद्वीपेद्वापंचाशज्जिनालये इन्द्रध्वजनामोपवासाय त्रिकोटिपंचलक्षोपवासफलप्रदाय अष्टान्हिकव्रतोद्योतनाय अर्घं ॥ ९ ॥

जलगंधाक्षतैः पुष्पैर्नैवेद्यैर्दीपधूपकैः ।
फलैरर्घान्वितैश्चाये श्रीजिनं सुधये नृणां ॥

ॐ ह्रीं नन्दीश्वरद्वीपे द्वापंचाशज्जिनालये अष्टान्हिकव्रतोद्योतनाय पूर्णार्घं ॥ १० ॥

प्राच्यां दिशि श्रीगिरिरंजनंस्यात्
तत्रस्थितं श्रीजिन चैत्यवृन्दं ।
चाये जलाद्यैः सुरराजवंद्यं
सदा पवित्रं सुखदं सुगात्रं ॥१॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिशिस्थितांजनगिरौ जिनबिम्बाय अष्टान्हिक व्रतोद्योतनाय अर्घं ॥ १ ॥

श्रीमत्प्राचीसुदिग्भागे गिरिदधि मुखोमतः ।
तत्रस्थं श्रीजिनाधीशं चायेऽहं श्रीसुखाप्तये ॥२॥

ॐ ह्रीं श्रीनन्दीश्वरद्वीपे पूर्वदिग्स्थितदधिमुखगिरि श्री जिनाय अष्टान्हिक व्रतोद्योतनाय अर्घं ॥ २ ॥

श्रीपूर्वदिग् सुखवराश? सुशोभमानो
नाम्नायुतो दधिमुखो गिरिराजतुल्यः ।
तत्रस्थितं सुरनुतं जिननाथबिम्बं
चाये सदा सकलकर्मविमुक्तरूपं ॥३॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थितद्धि- [illegible] श्रीजि-
नाय० जलादिकं ॥ ३ ॥

श्रीपूर्वस्यां दिशायां च तृतीयो यो दधिमुखः ।
तत्रस्थं जिनचैत्यं च चाये पापप्रशान्तये ॥४॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थितत्तृतीयदधिमुखगिरौ श्रीजिनाय० जलादिकं ॥ ४ ॥

तत्र प्राचीदिशायां च चतुर्थो यो दधिमुखः ।
तत्राश्रितं जिनंचैत्यं पूजयेऽहं सुखाप्तये ॥५॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थितचतुर्थदधिमुखगिरौ श्रीजिनाय० अर्घं ॥ ५ ॥

श्रीमदिन्द्रस्य संबंधिदिशायां यो रतिकरः ।
तत्रस्थं श्रीजिनाधीशं पूजयेऽहं सुखाप्तये ॥६॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थितप्रथमरतिकरगिरौ श्री जिनाय० अर्घं० ॥ ६ ॥

त्रिदशेन्द्रस्य संबंधि दिशायां यो रतिकरः ।
तत्रस्थं श्री जिनाधीशं पूजयेऽहं सुखप्रदम् ॥७॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थित द्वितीयरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ७ ॥

श्रीदेवेन्द्रस्य संबंधो दिग्भागे यो रतिकरः ।
तत्रस्थं जिनबिम्बं च पूजयेऽहं सुखाप्तये ॥८॥

ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थित तृ[illegible]गिरौ श्रीजिनाय० अर्घं ॥ ८ ॥

इन्द्राधिष्ठित दिग्भागे वर्तते यो रतिकरः ।
तत्रस्थं पूज्यपादं च पूजयेऽहं सुखाप्तये ॥९॥
ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थित चतुर्थरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ९ ॥

देवदेवस्य दिग्भागे सुखदेऽस्ति रतिकरः ।
तत्रस्थमकलङ्कं च पूजयेऽहं सुखाप्तये ॥१०॥
ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थितपंचमरतिकरगिरौ श्रीजिनाय० अर्घं ॥ १० ॥

प्राचीन बहिर्दिग्भागे संस्थितो यो रतिकरः ।
तत्रस्थंजिनचंद्रं च पूजयेऽहं सुखाप्तये ॥११॥
ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थतो षष्ठरतिकरगिरौ श्रीजिनाय० अर्घं ॥ ११ ॥

इन्द्राणीपतिदिग्भागे संस्थितो यो रतिकरः ।
तत्रस्थं जिनबिम्बं च पूजयेऽहं सुखाप्तये ॥१२॥
ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थितसप्तमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ १२ ॥

त्रिदशेन्द्रस्य दिग्भागे विद्यते यो रतिकरः ।
तत्रस्थं जिनसूर्यं च पूजयेऽहं सुखाप्तये ॥१३॥
ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिग्स्थताष्टमरतिकरगिरौ श्री जिनाय० अर्घं० ॥ १३ ॥

तद्बीजं परमं सर्वं यजूज्ञानेन सुवासिने ।
अनेनमूलमंत्राय तस्मै पुष्पाञ्जलिं क्षिपेत् ॥१॥

आशीर्वादः ।

कल्याणं विजयो भद्रं चिन्तितार्थं मनोरथाः ।
श्रीनन्दीश्वरप्रसादेन सर्वेऽर्था हि भवन्तु ते ॥२॥

पुष्पांजलिं क्षिपेत् ॥

अथ जयमाला ।

घत्ता ।

सुरणर पणमियपयगुण हर भवभय ।
सांतिपयासण शांतिजिणा ॥
तुवचरणणमिवर उवसम इवर ।
अक्खमि अग्घु समुवयण ॥ १ ॥

छन्द ।

वाणवितरवरा कप्पवासीसुरा ।
मिलियजोइसियगणा अमरासुरगणा ॥
शए मनिरंग रमयन्ति णंदीसरे ।
अठ्ठविय पूय णिम्मविय वसु वासरे ॥ १ ॥

गाथा ।

वसुवासरम्मिपूया णिम्माविय पढमसग्गइन्देण ।
कणयमय थाल सज्जिय पज्जलिय रयण आरतिओ ॥२॥
पज्जलिय रयण आरतिओ भासुरो ।
इंदु णच्चइ सुरा संजुओ सुंदरो ।

देव अप्सरगणा जय जय सद्दयं ।
कुणइ आरतियो वासओ सुहरयं ॥ ३ ॥
आरतिओ कुण्णंता । अट्ठमदीवेहिं वासओ भायं ।
अच्छुरय णच्चमाणा । देवाणां जयजय सद्दं ॥ ४ ॥

जय जणाह गुण गहिरमई सायरा ।
वीयसो यांति जय लोपतुं भायरा ॥
कुणइ आरतिओ विग्ध अवहारिणो ।
सग्ग अपवग्ग मग्गमि जो देसणो ॥ ५ ॥

गाथा—अट्ठमदीव पहाणो । चउदिसि चत्तारिवावि सुखणाए ।
जोयण लक्ख पमाणा । व्यमेयं पयं पीयाविरे ॥ ६ ॥

वावि कुंडंमि दह तिणिच्चेइहरा ।
दिसिहिं दिसि एव जाणेहिं महं सुन्दरा ॥
एय एयम्मि वसु अहिए सउ पडिमय ।
उद्धसय पंच धुणुहाइ तणु वपुमयं ॥ ७ ॥

गाथा—अट्ठसहस्समाला । णाणा रयण मणोण लंबमाणाए ।
पत्तेया पत्तेया । अणाइ णिहिणामयं सिद्धा ॥ ८ ॥
जोयण सत्तरि पंच अहियं परं ।
उच्चमाणंवि आयाम सहु णिब्भरं ॥
विच्छउरा होति पंणास मनोहारिणो ।
चारिदारं वरं मणोहारिणो ॥ ६ ॥

गाथा—सिंहादार वरम्मिय । धवल मणोहर सोहणाए ॥
आविसरा प्रयंडा ॥ चत्तारि माण थंभाए ॥ १० ॥
अट्ठवर पाडिह एसथा सोहिया ।
वसुविहा दव्व मंगल सुरे संसया ॥

तालकंसाल भरभेरि बीणाकुला।
तवलि झल्लरीय वज्जंति बहु मद्दला ॥ ११ ॥
गाथा—वज्जंति वायबहुला । इंदो णच्चंतु अप्सराजुत्तो ॥
अषाढकातिकाय। फाल्गुण मासम्मि सव अट्ठमिदिणे ॥१२॥
तावकुव्वंति जावंति पुण्णिमद्दिणो।
दिव्यवर सोलसाभरण मंडियतणो ॥
दिव्यमणि जडिय आरति ओकर तले।
उत्तरेविय एवं हिणंदीसरे ॥ १३ ॥
धुगिणधों धुगिणधों वज्जंतिए मद्दलं।
त्रिगिणेत्रे त्रिणिणेत्रे सद्दए भुंगलं ॥
दिव्यमणि जडिय आरतिआं करतले।
उत्तरेवीय एवं हिणंदीसरे ॥ १४ ॥
झिमिगझं झिमिगझं सद्दकंसालया।
णच्चमाणं वि दीसंति बहुपाडया ॥
दिव्यमणि जडिय आरति ओ करतले।
उत्तरेवीयं एवं हिणंदीसरे ॥ १५ ॥
घत्ता—एवं दिव्वसहा मणिप्पकिरता इंदेण संजोइया।
उत्तरेवि जिणणस्स अट्ठयदिणे णंदीसरे संकरे ॥
पूया भक्तिकरे विझति विवुहा पत्ताणिए गण्णए।
जे कुव्वेति सुशुद्ध भावणकरा सिद्धपदेणभव्वए ॥१६॥
ॐ ह्रीं नन्दीश्वरद्वीपे पूर्वदिक्षित जिन चैत्पालयेभ्यो महार्घं० पूर्णार्घं० ॥

इति श्री पूर्वदिक् चैत्यालय पूजा।

अथ दक्षिण दिक्पूजा प्रारभ्यते।

तीर्थोदकैर्मणिसुवर्णघटोपनीतैः
पीठे पवित्रवपुषि प्रविकल्पितार्थैः ॥
लक्ष्मीसुतागमनवीर्य विदर्भगर्भैः।
संस्थापयामि भुवनाधिपतिं जिनेन्द्रम् ॥ १ ॥

ॐ ह्रीं नंदीश्वर द्वीपे दक्षिण दिग् स्थितत्रयोदशजिनालय अत्र अवतर अवतर संवौषट् (आह्वाननं)। अत्र तिष्ठ तिष्ठ ठः ठः (स्थापनं)। अत्र मम सन्निहितो भवभव वषट् (सन्निधीकरणं) अथाष्टकं।

क्षीरोदतोयैः स्नपयन्ति देवाः।
याँस्तान् जिनेशान् मणि हेम बिम्बान् ॥
यजामि गङ्गादि भवैर्जलौघैः।
नंदीश्वरेऽप्यष्ट दिनानि भक्त्या ॥१॥

ॐ ह्रीं नंदीश्वरद्वीपे दक्षिण दिग् स्थितत्रयोदश जिनालयेभ्यः जलं निर्वपामीति स्वाहा ॥ १ ॥

विलेपनैर्दिव्यसुगन्ध द्रव्यैः येषां प्रकुर्वन्त्यमराश्च तेषाम्।
कुर्वेऽहमङ्गे वरचन्दनाद्यैः नन्दीश्वरेऽप्यष्टदिनानि भक्त्या ॥२॥

ॐ ह्रीं नंदीश्वर द्वीपे० चंदनं ॥ २ ॥

मुक्तामयै रक्षतपुण्यपुञ्जैः या प्रार्चिता देव गणैर्जिनार्चा।
तां शालिजातैर्विमलैर्यजेऽहं नन्दीश्वरेऽप्यष्ट० ॥३॥

ॐ ह्रीं नंदीश्वरद्वीपे० अक्षतान् ॥ ३ ॥

यान्यार्चितान्येवनिनेन्द्रविम्बान्येवामरेन्द्रैः सुर वृक्षपुष्पैः ।
तान्यर्चयेऽहं वर चम्पकाद्यैः नन्दीश्वरेऽप्यष्ट० ॥४॥

ॐ ह्रीं नंदीश्वरद्वीपे० पुष्पं० ॥ ४ ॥

पीयूष जातैश्चरुभिः सुरेशैः या पूजिता सत्प्रतिमा जिनेशां ।
तां पूजयेऽहं चरुमोदकाद्यैः नन्दीश्वरेऽप्यष्ट० ॥५॥

ॐ ह्रीं नंदीश्वरद्वीपे० चरु० ॥ ५ ॥

महं प्रकुर्वन्ति सुरत्नदीपैः येषां जिनानां विदधामि तेषाम् ।
घृतादिकपूर्रभवैः प्रदीपैः नन्दीश्वरे० ॥६॥

ॐ ह्रीं नंदीश्वरद्वीपे० दीपं० ॥ ६ ॥

स्वर्गोद्भवैश्चारुघटस्थधूपैर्यानदेवदेवैर्महितान् सुमूर्तिन् ।
तान्संयजे दिव्यसुगन्धधूपैः नन्दीश्वरे० ॥७॥

ॐ ह्रीं नन्दीश्वरद्वीपे० धूपं ॥ ७ ॥

फलैः सुकल्पद्रुमजै सुरेशैः या चर्चिता सत्कृतिभिर्महेशान् ।
तान् नारिकेलादि चयैर्यजेऽहं नन्दीश्वरे० ॥८॥

ॐ ह्रीं नन्दीश्वद्वीपे० फलं ॥ ८ ॥

विमलजलसुगन्धैरक्षतैश्चारुपुष्पैः
वरचरुबहुदीपैः सारधूपैः फलैश्च ।
जयजय वरवाद्यैर्हेमपात्रस्थ मंत्रैः
जिनवरशुभबिम्बायार्घमुत्तारयामि ॥९॥

ॐ ह्रीं नन्दीश्वरद्वीपे० अर्घं ॥ ९ ॥

अथ प्रत्येक पूजा ।

दक्षिणस्यां दिशियोऽसाऽबंजनोनाम पर्वतः ।
तत्रस्थं जिनविम्वं च चायेऽहं तद्गुणाप्तये ॥१॥

ॐ ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थितांजनगिरौ श्रीजिनाय अष्टान्हिक व्रतोद्योतनाय जलादि अर्घं ॥ १ ॥

श्रीमद्दक्षिणदिग्भागे नाम्ना दधिमुखोमतः ।
तत्रस्थं श्रीजिनं पद्मे चायेऽहं तद्गुणाप्तये ॥२॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थित प्रथमदधिमुखगिरौ श्रीजिनाय० अर्घं० ॥ २ ॥

दक्षिणस्यां दिशायां च द्वितोयो योदधिमुखः ।
तत्रस्थं श्रीजिनं पद्मे चायेऽहं तद्गुणाप्तये ॥३॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थित द्वितीयदधिमुखगिरौ श्रीजिनाय० अर्घं० ॥ ३ ॥

यमाश्रित दिशायां च तृतीयो यो दधिमुखः ।
तत्रस्थं श्रीजिनाधीशं चायेऽहं तद्गुणाप्तये ॥४॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थित तृतीयदधिमुखगिरौ श्रीजिनाय० अर्घं० ॥ ४ ॥

दक्षिणस्यां दिशायां च चतुर्थो यो दधिमुखः ।
तत्रस्थं वीतरागं च चायेऽहं तद्गुणाप्तये ॥५॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थित चतुर्थ दधिमुखगिरौ श्रीजिनाय अर्घं ॥ ५ ॥

दक्षिणस्यां दिशायां च रतिकरो वै पर्वतः ।
तत्रस्थं श्री जिनं पद्मे चायेऽहं तद्गुणाप्तये ॥६॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थितप्रथमरतिकरगिरौ श्रीजिनाय अर्घं० ॥ ६ ॥

श्रीमद्दक्षिण दिग्भागे रतिकरो द्वितीयकः ।
तत्रस्थं जिनचंद्रं च चायेऽहं तद्गुणाप्तये ॥७॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थितद्वितीयरतिकरगिरौ श्रीजिनाय अर्घं० ॥ ७ ॥

दक्षिणायां दिशायांच रतिकरस्तृतीयकः ।
तत्रस्थं श्री जिनाधीशं चायेऽहं तद्गुणाप्तये ॥८॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थिततृतीयरतिकरगिरौ श्रीजिनाय अर्घं० ॥ ८ ॥

तत्र दक्षिणदिग्भागे तुर्योनाम्ना रतिकरः ।
तत्रस्थं श्रीजिनं भक्त्या चायेऽहं तद्गुणाप्तये ॥९॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थित चतुर्थ रतिकरगिरौ श्रीजिनाय अर्घं० ॥ ९ ॥

देवाश्रितसुदिग्भागे नाम्ना रतिकरो मतः ।
तत्रस्थं श्रीजिनं भक्त्या चायेऽहं तद्गुणाप्तये ॥१०॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थितपंचमरतिकरगिरौ श्रीजिनाय अर्घं० ॥ १० ॥

श्रीमद्दक्षिण दिग्भागे षष्ठो नाम्ना रतिकरः ।
तत्रस्थं श्री जिनाधीशं चायेऽहं तद्गुणाप्तये ॥११॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थितषष्ठरतिकरगिरौ श्रीजिनाय अर्घं० ॥ ११ ॥

दक्षिणायां दिशायां च सप्तमो यो रतिकरः ।
तत्रस्थं श्री जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥१२॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थितसप्तमरतिकरगिरौ श्रीजिनाय अर्घं० ॥ १२ ॥

तत्र दक्षिण दिग्भागे अष्टमो हि रतिकरः ।
तत्रस्थं श्री जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥१३॥

ओं ह्रीं नन्दीश्वरद्वीपे दक्षिणदिग्स्थितअष्टमरतिकरगिरौ श्रीजिनाय अर्घं० ॥ १३ ॥

जिनेन्द्रः शंकरः श्रीदः परमेष्ठी सनातनः ।
अलक्षः सुगतोविष्णुरुन्नतां वः श्रियं क्रियात् ॥१४॥

इत्याशीर्वादः ॥

जयमाला

नन्दीश्वर वरदिवहिंए बावन चैत्यगाय
जिनेश्वरपयकमलो बहु कुसुमाञ्जलि देहिं ।
सुरिंदा जे लहिया अट्टविह पूजकरेयि
सुभत्तिय शुभ जाणिया ॥ १ ॥
पंचह मेरु हेममय असिय जिणंदह
धामजिणेसर पयकमलो ॥ २ ॥
सत्तरसो विजयारधहिं कुलगिर
तीस जिणेसर पयकमलो ॥ ३ ॥

असिय वखारिं जिण भवणिं,
वीसमहा गयंदत जिणेसर पयकमलो ॥ ४ ॥
माणुस उत्तर चारि जिण,
दसकुरु जिणगेह जिणेसर पयकमलो ॥ ५ ॥
इष्वाकारि चारि जिणगेह कुण्डलगिर
चत्तारि जिणेसर पयकमलो ॥ ६ ॥
रुचकगिर च्यारि पिंडकया,
चउसइ अट्ठावन जिणेसर० ॥ ७ ॥
व्यंतरमांहि असंख जिण,
जोइससंख विहीण जिणेसर० ॥ ८ ॥
सग्गि जिणंदह मणि भुवणं,
लक्ख चउरासि होय जिणेसर० ॥ ९ ॥
लक्ख बहत्तरि सात कोडि,
भुवनालय जिण संख जिणेसर० ॥१०॥
अधिक सत्ताणु सहस्स पुण,
तेवीसा सविजाण जिणेसर० ॥ ११ ॥
कैलास सत्रुंजय गिर सिहरे,
सत्रुंजय गिरनारि जिणेसर० ॥ १२ ॥
गोमट्टसामि आदीकरी,
किट्टिम सव चेइत्थाल जिणेसर० ॥ १३ ॥

अढाईय दीवहं भवियकया,

जिण मंदिरसु बिम्ब--जिणेसर० ॥ १४ ॥

माणुस खेतहं माहिजिण,

मुणिवर णिरवाण भूमि जिणेसर० ॥१५॥

नंदीसर पुहुपांजलि,

जोइस भक्ति करेण जिणेसर० ॥१६॥

सोणर भुंजवि सग्ग सुह,

मुक्ति हि तिण हवेहिं जिणेसर० ॥१७॥

श्री सकल कीरति मुणिवर,

भणइ छोड़ो भवणापास जिणेसर० ॥१८॥

यावन्ति जिनचैत्यानि विद्यन्ते भुवनत्रये ।

तावन्ति सततं भक्त्या त्रिःपरीत्य नमाम्यहम् ॥१९ ॥

ओं ह्रीं नन्दीश्वरद्वीपेदक्षिणदिक्स्थितजिनमन्दिरेभ्यः महार्घं० ॥ १९ ॥

इति दक्षिणदिक् पूजा ।

अथ पश्चिमदिक्स्थित चैत्यालय पूजा ।

द्वापंचाशज्जिनागाराः प्रतिमापरमप्रभाः ।

आह्वानयामि नंदीशं द्विपंचाष्टकवासरान् ॥

ओं ह्रीं नंदीश्वरद्वीपेपश्चिमदिक्भागे त्रयोदश जिनालय अत्र अवतर अवतर ॥ संवौषट्॥ अत्र तिष्ठ तिष्ठ ठः ठः स्थापनं ॥ अत्र मम सन्निहितो भव भव वषट् सन्निधापनम् ।

सत्सौरभादिवरगन्धविशुद्ध हस्तैः
कर्पूरधूलिपरिमिश्रिततीर्थतोयैः ।
नन्दीश्वराख्यवरपर्वणि संयजेऽस्मिन्
चाष्टौ दिनानि विधिना प्रतिमा जिनानाम् ॥१॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिम दिक्स्थित जिनालयेभ्यः जलं निर्वपामीति स्वाहा ॥ १ ॥

सत्कुंकुमागरुसुवर्त्तिकचंदनानां
गन्धैर्वरैः सुखकरैः कृतिनां सुगन्धैः ।
नन्दीश्वराख्यवर पर्वणि संयजेऽस्मिन्
चाष्टौ दिनानि विधिना प्रतिमा जिनानाम् ॥२॥

ॐ ह्रीं नंदीश्वर द्वीपे० चंदनं ॥ २ ॥

चंद्रांशुजालविशदैरमलैर्मनोज्ञैः
सद्गन्धशालिविशदाक्षतपूतपुंजैः । नन्दी० ॥ ३ ॥

ॐ ह्रीं नंदीश्वरद्वीपे० अक्षतान् ॥ ३ ॥

पंकेजकुन्दवकुलोत्पलमालतीनां
पुष्पैर्द्विरेफनिनदैः परिपूरिताशैः । नन्दीश्वराख्य० ॥ ४ ॥

ॐ ह्रीं नंदीश्वरद्वीपे० पुष्पं० ॥ ४ ॥

सद्धेमभाजनकरैरमृतोपमानैः
हव्येनचान्नदधिभक्ष्यसुशर्कराढ्यैः । नन्दी० ॥ ५ ॥

ॐ ह्रीं नंदीश्वरद्वीपे० चरु० ॥ ५ ॥

ध्वस्तप्रमोहतिमिरै रसवृद्धराणां
सत्सोमदीपनिकरैर्मणिभाजनस्थैः ॥ नन्दी० ॥ ६ ॥

ॐ ह्रीं नंदीश्वरद्वीपे० दीपं० ॥ ६ ॥

कृजोंगकप्रवरचन्दनचन्द्रगंध

द्रव्योद्भवैरनुपमैः सुरसेव्यधूपैः ॥ नन्दी० ॥ ७ ॥

ॐ ह्रीं नन्दीश्वरद्वीपे० धूपं ॥ ७ ॥

मोचासुचोचवरपूगरसालकाद्यैः

नारिंगदाडिमविराजितमञ्जुद्रव्यैः ॥ नन्दीश्वराष्ट० ॥८॥

ॐ ह्रीं नन्दीश्वद्वीपे० फलं ॥ ८ ॥

इत्थं नन्दीश्वराख्यो वरशिवसुखजे पर्वणीन्द्रादि लोके।

संस्तुत्याष्टौ दिनानि प्रवरगुणयुतं भव्यलोका यजन्तः ॥

ये विद्यानन्दिसूरिप्रणतपदयुगं श्रीजिनानां सदर्चां।

श्रीभूत्वा नागसौख्यं निरुपम मनघं यांतु मोक्षाय सौख्यं ॥९॥

ॐ ह्रीं नन्दीश्वरद्वीपे० अर्घं ॥ ९ ॥

अथ प्रत्येक पूजा।

श्रीमत्पश्चिम दिक्देशे वाह्यांजनो गिरिर्मतः

तत्रस्थं च गतद्वेषं चायेऽहं तद्गुणाप्तये ॥ १ ॥

ॐ ह्रीं नंदीश्वरद्वीपे पश्चिमदिक्स्थितांजनगिरौ श्रीजिनाय अष्टान्हिकव्रतोद्योतनाय जलादिक० ॥ अर्घं ॥ १ ॥

पश्चिमायां दिशायां च नाम्ना दधिमुखोगिरिः ।

तत्रस्थं च गतद्वेषं चायेऽहं तद्गुणाप्तये ॥ २ ॥

ॐ ह्रीं नंदीश्वरद्वीपे पश्चिमदिक्स्थितप्रथमदधिमुखगिरौ श्रीजिनाय० अर्थं० ॥ २ ॥

वरुणश्रितदिग्भागे द्वितीयो यो दधिमुखः ।
तत्र स्थितं जिनाधीशं चायेऽहं तद्गुणाप्तये ॥ ३ ॥

ओं ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतद्वितीयदधिमुखगिरौ श्रीजिनाय० अर्घं० ॥ ३ ॥

पश्चिमायां दिशायां च तृतीयो यो दधिमुखः ।
तत्र स्थं श्रीजिनाधीशं चायेऽहं तद्गुणाप्तये ॥ ४ ॥

ओं ह्रीं नन्दीश्वराद्वीपे पश्चिमदिक्स्थततृतीयदधिमुखगिरौ श्रीजिनाय० अर्घं० ॥ ४ ॥

तत्र पश्चिमदिग्भागे चतुर्थो यो दधिमुखः ।
तत्र स्थितं जिनाधीशं चायेऽहं तद्गुणाप्तये ॥ ५ ॥

ओं ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतचतुर्थदधिमुखगिरौ श्रीजिनाय० अर्घं० ॥ ५ ॥

दशाननारिदिग्देशे नाम्ना रतिकरो मतः ।
तत्र स्थितं जिनाधीशं चायेऽहं तद्गुणाप्तये ॥ ६ ॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतप्रथमरतिकरगिरौ-श्रीजिनाय० अर्घं० ॥ ६ ॥

रामारिशत्रुदिग्भागे द्वितीयो यो रतिकरः ।
तत्र स्थितं जगन्नाथं चायेऽहं तद्गुणाप्तये ॥७॥

ओं ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतद्वितीयरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ७ ॥

पश्चिमायां दिशायां च तृतीयो यो रतिकरः ।
तत्र स्थितं जिनाधीशं चायेऽहं तद्गुणाप्तये ॥ ८ ॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थततृतीयरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ८ ॥

वारुण्यायां दिशायां च चतुर्थो यो रतिकरः ।
तत्र स्थितं जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥ ९ ॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतचतुर्थरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ९ ॥

पश्चिमायां दिशायां च पंचमो यो रतिकरः ।
तत्र स्थितं जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥ १० ॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतपञ्चमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ १० ॥

वरुणाश्रितदिग्भागे षष्ठोनाम्ना रतिकरः ।
तत्र स्थितं जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥ ११ ॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतषष्टमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ११ ॥

सीतारिशत्रुदिग्भागे सप्तमो हि रतिकरः ।
तत्र स्थितं जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥ १२ ॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतसप्तमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ १२ ॥

श्रीमत्पश्चिमदिग्भागे अष्टमो हि रतिकरः ।
तत्र स्थितं जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥ १३ ॥

ॐ ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतअष्टमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ १३ ॥

सकलकुसुमवल्लीपुष्कलावर्तमेघो
दुरिततिमिरभानुःकल्पवृक्षोपमानः ॥
भवजलनिधिपोतः सर्वसंपत्तिहेतुः ।
स भवतु सततं वः श्रेयसे पार्श्वनाथः ॥ १ ॥

इत्याशीर्वादः ।

अथ जयमाला ।

कंपिला णयरि मंडस्से । विमलस्से विमलणाणस्से ॥
आरतिवर समये णच्चंति, अमररमणीओ ॥ १ ॥

अमर रमणीउ णच्चंति जिणमंदिरं ।
विविह वर तूर तालेहिं वग्गिनूपुरं ॥
जडिय बहु रयण चामीकरं पत्तियं ।
जिणंद आरत्तियं जोइयं सुंदरं ॥

मोतियंदाम

रुणझुणंकार णउरघचलणुत्तियं ।
कमलदल णयण जिण बिम्ब पेखंतिया ।
जिणंद आरत्तियं जोइयं सुदरं ॥ ३ ॥
इंदु धरणेंदु जखेंदु वो सहृतिया ।
मिलियसुर असुरघण रास खेलंतिया ॥
केचि सिर चमर जिणबिम्ब ढोलंतिया । जि० ॥४॥
केसभरि कुसुम भर सिर ढोलंतिया ।
वयण छुणिइंदु चमकंति विहसंहृतिया ॥
कमलदलणयणजिण विंव पेखंतिया । जिणंद० ॥५॥

गाथा—णंदीसरम्मि दीवे बावण जिणालयासु पडिमाणं ।
अट्ठाइं वरपव्वे इंदु आरतिओ कुणइ ॥ ६ ॥

इन्दु आरतिओ कुणइ जिण मन्दिरं ।
रयणमणिकिरणकमलेहिं वर सुन्दरं ॥
गीउ गाइयन्ति णच्चन्ति वरणारया ।
तूर वज्जन्ति णाणाविह पाडया ॥ ७ ॥

गाथा—एक्कम मिहजिणहरे चौ चौ सोलह वावीओ ।
जोयण लक्खपमाणं अट्ठमणंदीसरे दीवे ॥ ८ ॥

अट्ठमं दीव णंदीसरं भासुरं ।
चैत्य चैत्यालयं वन्दि अमरासुरं ॥
देव देवी जहां धम्म संतोसिया ।
पञ्चमं गीय गायन्ति रस पोसिया ॥ ९ ॥

गाथा—दिव्वे हिं खीरनीर-हिं गंधे हिं कुसुम मालाइं ।
सव्वसुरलोय सहिये पूजा आरंभये इन्दु ॥ १० ॥

इन्दु सोहम्मि संभाइ वेजोसयं ।
आयवो सज्जिएरावयं वर गयं ॥
सव्व दव्वेहिं भव्वेहिं पूजा करा ।
मिलिय पढमवफया तासु तइ देसिहा ॥ ११ ॥

गाथा—कंसाल तालतिविली झल्लरी भरिह भेरि वीणाउ
वज्जन्ति भावसहिया भावेहिं णम्मिया सव्वे ॥ १२ ॥

सव्वदव्वेहिं भव्वेहिं करताडया ।
सद्दये संसि झिगिणिणीणाडया ॥
झिगिणिझां झिगिणिझां वजये झल्लरी ।
णच्चई इन्दु इन्दायणी सुन्दरी ॥ १३ ॥
णयणकज्जल सुसीलामयं दीणयं ।
हेम हीराल कुण्डलकयं कण्णयं ॥
झझणं झंकरं वज्जपणूपुरं ।
जिणंद आरतिअं जोइयं सुन्दरं ॥ १४ ॥

दिट्ठीणा सव्व अंगुलिय दावंतिया।
खिणिहिं खिणि खिणिहिं जिणविंव जोवंतिया।
णारि णच्चन्ति गायन्ति कोमलसरं। जिणंद०॥ १५॥
रुणु भुणुकारेण उरधकरं कंकणं।
णारि जप्पंति जिणणाहवे बहुगुणं॥
जुवइ णच्चन्ति समरंतिणो जिणवरं।
जिणद आरतिओ०॥ १६॥
कण्ठ कद्लेहिं मणिहार झलकंतिया।
जिणइ थुणि थुणिहि सवणाइ संतुट्ठया॥
विविह कोतुहलं कुणहि णारीणरं। जिणंद० ॥१७॥
अत्ता—आरतिह पढेहिं कम्मह धोवहिं सग्ग अपवग्ग लहइं॥
जं जं मणि झावे तं सुखपावे सग्ग मोक्ख हेला तरहिं॥
ओं ह्रीं नन्दीश्वरद्वीपे पश्चिमदिक्स्थतचैत्यालयेभ्यो महार्घं० ॥ १८॥
इति पश्चिमदिक्स्थतचैत्यालय पूजा॥

अथ उत्तरदिक्चैत्यालय पूजा।

आषाढकार्तिकसुफाल्गुनशुक्लपक्षे।
चातुर्निकायसुरवृन्दसुभक्तिपूर्वम्॥
नन्दीश्वराख्यवरपर्वणि संयजेऽस्मि।
नाह्वाननादिभिर्यजे शुभवस्तुयुक्तैः॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थतजिनालय अत्र अवतर अवतर संपौषट् (आह्वाननं) अत्र तिष्ठ तिष्ठ ठः ठः (स्थापनं) अत्रमम सन्निहितो भव भव वषट् स्वाहा (सन्निधिकरणं)

सत्सिन्धुपाथोभिरमन्दवासैः ।
सत्स्वर्णभृङ्गारभृतैर्जलौघैः ॥
चाये शतार्धाभ्रिककाम्रवासा-
नाषाढसत्कार्तिकफाल्गुणेषु ॥१॥

ॐ ह्रीं नंदीश्वरद्वीपे उत्तरदिक्स्थित त्रयोदशचैत्यालयेभ्यो: जल० ॥ १ ॥

शक्रार्चितान् भव्यसरोजपूष्णः ।
कोदण्डसत्पञ्चशतार्धमूर्तीन् ॥
लेपामि सद्गंधविलेपनैस्तान् ।
आषाढसत्कार्तिकफाल्गुणेषु ॥२॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिग्स्थितत्रयोदशचैत्यालयेभ्यः चंदनं ॥ २ ॥

नन्दीश्वरद्वीपविशालवापी-
स्थाद्रीन् सुबिम्बान् वरकांचनाभान् ॥
चर्चेऽक्षतैः कल्पितभावपासान् ।
आषाढसत्कार्तिकफाल्गुणेषु ॥३॥

ॐ ह्रीं नन्दीश्वरद्वीपे अक्षतान्० ॥ ३ ॥

कंदर्पसर्वावहतात्तरूपान् ।
भव्याऽटवीवन्हिप्रसिद्धलोकान् ॥
यजाम्यहं पुष्पव्रजैः जिनेशान् । आषाढ० ॥४॥

ॐ ह्रीं नन्दीश्वरद्वीपे० पुष्पम्० ॥ ४ ॥

अत्यक्षसौख्यास्पदलब्धकामान् ।
भव्यामरौघानतकान् गरिष्ठान् ॥
संपूजयेहं वरभक्षकैस्तान् । आषाढ० ॥ ५ ॥
ॐ ह्रीं नन्दीश्वरद्वीपे० चरु०॥ ५ ॥

सत्केवलालोकितकृत्स्नलोकान् ।
घातिक्षयानन्तचतुष्टयाप्तान् ॥
यायज्मि तान् कर्पूररत्नदीपैः । आषाढ० ॥६॥
ॐ ह्रीं नन्दीश्वरद्वीपे० दीपं० ॥ ६ ॥

कर्माष्टकाष्ठालघुपावकाभान् ।
कैवल्यसौख्यान् परमर्द्धियुक्तान् ॥
अर्चामि कृष्णागरुधूपधूम्रैः । आषाढ० ॥७॥
ॐ ह्रीं नन्दीश्वर० धूपं० ॥ ७ ॥

यजे फलैर्मुक्तगणाप्रमादान् ।
प्रबुद्धबोधान् भुवनत्रयाप्तान् ॥
देवेन्द्रसत्कीर्तितवांच्छिताप्तान् । आषाढ० ॥८॥
ॐ ह्रीं नन्दीश्वर० फलं ॥ ८ ॥

वार्श्चंदनाक्षतसुपुष्पचरुप्रदीपैः ।
धूपैः फलैश्च रचितैः शुभहेमपात्रैः ॥
अर्घं ददामि दमितारिपते ! जिनाय ।
देवेन्द्रकीर्तिमहिताय मनोज्ञकाय ॥९॥
ॐ ह्रीं नन्दीश्वरद्वीपे० अर्घं० ॥

उत्तरस्यां दिशायां च नाम्ना ह्यंजनपर्वतः ।
तत्रस्थितं जिनाधीशं चायेऽहं तद्गुणाप्तये ॥१॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थितां अंजनगिरौश्रीजिनाय अष्टान्हिक व्रतोद्योतनाय अर्घं ॥ १ ॥

श्रीमदुत्तरदिग्देशे नाम्ना दधिमुखो गिरिः ।
तत्रस्थितं जिनाधीशं चायेऽहं तद्गुणाप्तये ॥२॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थितप्रथमदधिमुखगिरौ-श्रीजिनाय अर्घं ॥ २ ॥

उदीच्यां हि दिशायां च नाम्नादधिमुखः पृथुः ।
तत्रस्थितं जगत्पूज्यं चायेऽहं तद्गुणाप्तये ॥३॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थितद्वितोयदधिमुखगिरौ श्रीजिनाय० अर्घं ॥ ३ ॥

उदग्दिशिस्थितस्तत्र गिरिर्दधिमुखाधिपः ।
तत्रस्थितं जिनाधीशं पूजयेऽहं गुणाप्तये ॥४॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थिततृतीयदधिमुखगिरौ श्रीजिनाय० अर्घं ॥ ४ ॥

उत्तरायां दिशायां च तुर्यो दधिमुखो गिरिः ।
तत्रस्थितं जगत्पूज्यं चायेऽहं तद्गुणाप्तये ॥५॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थितचतुर्थदधिमुखगिरौ श्रीजिनाय० अर्घं० ॥ ५ ॥

श्रीमदुत्तरदिग्भागे आद्यो रतिकराभिधः ।
तत्रस्थितं लोकनाथं पूजयेऽहं गुणाप्तये ॥६॥

ॐ ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थितप्रथमरतिकरगिरौ श्री जिनाय० अर्घं० ॥ ६ ॥

कुबेराश्रितदिग्भागे गिरौ रतिकराधिपः ।
तत्रस्थितं जिनेन्द्रं हि चर्चेऽहं तद्गुणाप्तये ॥७॥

ॐ ह्रीं नन्दीश्वरद्वीपेउत्तरदिक्स्थितद्वितीयरतिकरगिरौ-श्रीजिनाय० अर्घं० ॥ ७ ॥

उत्तरस्यां सुकाष्ठायां नाम्ना रतिकरोगिरिः ।
तत्रस्थितं जगत्पूज्यं पूजयेऽहं सुखाप्तये ॥८॥

ॐ ह्रीं नन्दीश्वरद्वीपेउत्तरदिक्स्थिततृतीयरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ८ ॥

धनदाश्रितदिग्भागे तुर्यो रतिकरः खलु ।
तत्रस्थितं जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥ ९ ॥

ओं ह्रीं नन्दीश्वरद्वीपेउत्तरदिक्स्थितचतुर्थरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ९ ॥

नैगमाश्रितदिग्भागे पंचमो यो रतिकरः ।
तत्र स्थितं जिनाधीशं चार्येऽहं तद्गुणाप्तये ॥ १० ॥

ओं ह्रीं नन्दीश्वरद्वीपेउत्तरदिक्स्थितपंचमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ १० ॥

वित्ताधिपस्य काष्ठायां षष्ठो रतिकरो गिरिः ।
तत्र स्थितं जगत्पूज्यं पूजयेऽहं सुखाप्तये ॥ ११ ॥

ओं ह्रीं नन्दीश्वरद्वीपेउत्तरदिक्स्थितषष्ठमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ ११ ॥

राजराजस्य ककुभि सप्तमो यो रतिकरः ।
तत्र स्थितं जिनाधीशं पूजयेऽहं सुखाप्तये ॥ १२ ॥

ओं ह्रीं नन्दीश्वरद्वीपे उत्तरदिक्स्थतसप्तमरतिकरगिरौ श्रीजिनाय० अर्घं० ॥ १२ ॥

वैश्रवणस्यदिग्भागे अष्टमो हि रतिकरः ।
तत्र स्थितं जगत्पूज्यं पूजयेऽहं सुखाप्तये ॥ १३ ॥

ॐ ह्रीं नन्दीश्वरद्वीपेउत्तरदिक्स्थतअष्टमरतिकरगिरौ श्री-जिनाय० अर्घं० ॥ १३ ॥

जलगन्धाक्षतैः पुष्पैः नैवेद्यैर्दीपधूपकैः ।
फलैरर्घ्यं जिनं चार्ये दधिदूर्वांकुशैस्तथा ॥ १४ ॥

ॐ ह्रीं नन्दीश्वरद्वीपेउत्तरदिक्स्थतत्रयोदशजिनचैत्यालये-भ्यः महार्घं ॥ पू० र्घं

अथ जाप्यदीयते—जाप्य मन्त्र—

ॐ ह्रीं नन्दीश्वरद्वीपे द्वापञ्चाशज्जिनालयेभ्यो नमः ॥

यावज्जैनेन्द्रवाणी विलसतिभुवने सर्वसत्वानुकम्पा ।
यावज्जैनेन्द्रधर्मं दशगुणसहितं साधवो योजयन्तः ॥
यावच्चन्द्रार्कतारा गगनपरिचरा रामकीर्तिश्च यावत् ।
तावत्त्वं पौत्रपुत्रस्वजनपरिवृतो धर्मवृध्याभिवन्द्यः ॥ १ ॥

इत्याशिर्वादः ।

जयमाला

श्रीमन्नेमिजिनं जयत्रयगुरुं नत्वा सुरैः सविदं ।
वक्ष्येऽहं स्तवनं द्वीपाष्टकभवं कोटीशतं सुन्दरं ॥

षष्ठित्र्यैक सुयोजनस्य सुपयः शीतं शुभं लक्षकं।
चत्वारांजन भूधराः प्रगुणका नीलेन्द्ररत्नत्विषः ॥१॥
छन्द–उन्नतचतुराशीतिसहस्राः। भाति पटहाकारविमिश्राः ॥
सहस्र चतुराशीतिविष्कंभाः। शशिशून्यत्रयकन्दसुदंभाः ॥२॥
हित्वा लक्षयोजनगिरिरागं। प्रत्या संवरवापि सुभाज्यं ॥
प्रागंजनगिरि प्राच्यसुनन्दा। नन्दावति दक्षिणदिशिह्नन्दा ॥३॥
पश्चिमनंदोत्तरतरशुभनामा। नन्दखेणिका भाति सुरामा ॥
दक्षिणांजन पर्वत प्राच्या। प्राग्वदराज्या वापि सुराच्या ॥४॥
दक्षिणतो विरजागतशोका। राजति वापीविगतशोका ॥
पश्चिमदिश्यंजनवरभूध्रं। त्यक्त्वा योजनशतसहस्रं ॥५॥
पूर्वविधिवद्विरजा वापी। वैजयंति जयंति सु वापी ॥
राजत्यपराजितगुणधामा। उत्तर काशांजनगिरि रामा ॥६॥
रमणी नयना सुप्रभ विमला। सर्वतोभद्रा सरवर सकला ॥
सहस्रदेवयोजन अगाधा। लक्षयोजनविश्रितवनसिद्धा ॥७॥
दीर्घिका मध्ये देशगिरि साराः। संति षोडश दध्याकाराः ॥
पटहसमं योजन उन्मानं। व्यासादया? तावन्मानं ॥८॥
व्यासो द्विकोणयो रत्याकाराः। द्वात्रिंशत्सुराज्याकाराः।
संति सहस्रोत्सेधविदेहाः। मूलयोजनतुर्यांशसुगेहाः ॥९॥
वापीनां परितोवनसारं। भात्यशोकं सप्तच्छदतारं ॥
चंपककेतकिहंसमरालं। अष्टवर्गप्रमाणविशालं ॥१०॥
वनमध्ये चैत्यादिकवृक्षं। दिक्षु भातिसुजिनवरदक्षं।
पल्यंकासनस्थितसुर पूज्यं। शुभ रत्नं प्रभनतसुरराजं ॥११॥
अंजनदधिमुखरतिकरसकले। भ्राजंते जिनगृहविपुले।
योजनशतकाया महिमाभाः। पंचाशद्व्यासा मणि शोभाः ॥१२॥
पंचसप्ततितुंगविशालाः। प्रद्योतितदिङ्मुखपरशालाः।
षोडशयोजनद्वारोत्सेधं। विस्तृतवरवसुयोजनसिद्धं ॥१३॥

तोरण पार्श्वं रस्थो भांति । अष्टयोजनकामा सुकांति ।
चतुर्विंशतिप्रोक्तापरमा । मानस्तंभे अग्रे कामा ॥१४॥
भांति गोपुरतोरणत्रिशाला । स्तूपधूपघट ध्वजसमराला ।
तेमध्ये जिनप्रतिमातुंगा । चाप पंचशतमूर्ति विभंगा ॥१५॥
अष्टागृहशतसंख्या गेहं । प्रतिभाति गतकलिमलरेहं ।
सिंहासनप्रकीर्णकवरछत्रं । प्रातिहार्यभृंगादिकपात्रं ॥१६॥
धवले बाहुलमासितपक्षे । आषाढे शुक्लाष्टमिदिवसे ।
तत्रागच्छंति सुरनाथाः । साप्सरा वाहनारूढकपंथाः ॥१७॥
जिनपूजां रचयंति सुधीराः । अष्टविधार्चनकृतविधिसाराः ।
प्राङ् मूर्तेर्जलस्नपनं कृत्वा । किल्विषदूरमनेनेति मत्वा ॥१८॥
यामद्वय प्रत्यासमनेन । विधिनाखण्डल प्रतिमातेन ।
स्तुवंति प्रतिमा विबुधेशाः । गानतानगंधर्वसुरेशाः ॥१९॥

अथ प्राकृते

व्यन्तरा जोतिसा सग्गसोहाकुला ।
किन्नरा गाय कामिनीसंगाकुला ॥
धौं धौं धपमय वज्जये मद्दला ।
णच्चए इन्दु इंदाणी संगाकुला ॥ २० ॥
तिं तिं तिं तिणि सद्द सोहाकुला ।
झिगि झिगि झल्लरि ढोल रसाकुला ॥
तैं तैं ताल कंसाल वीणाकुला ।
णच्चए इन्दु इन्दाणी संगाकुला ॥ २१ ॥
थैं थैं जम्पए नारयो तम्बुरो ।
रुणुझुणु झंकरो किंकिणी सुन्दरो ॥
ओइ सानन्द सुराव रसाकुला ।
णच्चए इन्दु इन्दाणी सङ्गाकुला ॥ २२ ॥

पस्सइ कामिणी वर मणोमोहणी ।
हस्सइ हासविलास गजगामिणी ।
सो हि आहार मन्दार मुक्ताकला ।
णच्चए इन्दु इन्दाणी सङ्गाकुला ॥ २३ ॥
कुणइ अट्ठ दिवसेंहि पूय विहवरं ।
जन्ति णियवासयं णिम्मलं भाधरं ।
पुण्ण उपावइ देव देवी गणा ।
णच्चए इन्दु इन्दाणी सङ्गाकुला ॥ २४ ॥
घत्ता—सुदीप्यभासुरं हि द्वीपनन्दीश्वरम्—
जिनेन्द्रचन्द्रंधरं कलाधरं परम् ।
सुभक्तितो हि पूजये परापरं जिनालयम्
सुधर्मभूषसायरं सुरेन्द्रकीर्तिचर्चितं ॥

ॐ ह्रीं नन्दीश्वरद्वीपेपूर्वपश्चिमोत्तरदक्षिणेद्वापञ्चाशज्जिनालयेभ्यः जयमाला महार्घं निर्वमामीति स्वाहा ।

इति नन्दीश्वरपूजा उद्यापन सम्पूर्णम् ॥

* ॐ नमः सिद्धेभ्यः *

* व्रतोद्यापनसंग्रहे *

॥ अथ दशलाक्षणिक उद्यापन पूजा लिख्यते ॥

दशलाक्षणिकव्रतोद्यापनम् ।

विमलगुणसमृद्धं ज्ञानविज्ञानशुद्धं
अभयवनसमुद्रं चिन्मयूखप्रचण्डं ।
व्रतदशविधधारं संयजे श्रीविपारं
प्रथमजिनविदक्षं सद्व्रताढ्यं जिनेशम् ॥१॥
दशलक्षणकं सारं व्रतं सद्व्रतमुत्तमम् ।
प्रसंक्षेपोद्यापनं वक्ष्ये यथा जातं जिनेश्वरात् ॥२॥
आदौ गर्भगृहे पूजा क्रियते सद्बुधोत्तमैः ।
[1]जिननामावलिं शुद्धां सकीलकरणादिकं ॥३॥
सन्मंडपप्रतिष्ठा च पठ्यते पण्डितोत्तमैः ।
नानाशास्त्रान्वितैः धीरैः कलागुणविराजितैः ॥४॥
शतकमलसमूहं वर्तुलाकारचक्रं
भवशतभजनाशं सर्वमोक्षप्रचक्रं ।

---

१ सहस्रनाम ।

परमगुणनिधानं सद्व्रतौघप्रधानं
विविधकुसुमवृन्दैः शुद्धयंत्रे क्षिपामि ॥५॥

ॐ ह्रीं भाविकसद्यसान्निध्य शतकमलोपरि पुष्पांजलिं क्षिपेत् ।

स्तोत्रं ॥

सुव्रताय नमो लोके दशधाय जिनोदिते ।
व्रतेशिने गुणौघाय मोक्षसाधनहेतवे ॥१॥
उत्तमक्षमाधीशाय मार्दवांगाय नमोनमः ।
आर्जवांगाय महांगाय जिनाधीशप्रमोदिते ॥२॥
शुशौचाय गुणौघाय विविधर्द्धिप्रदायिने ।
प्रसत्याय सुदान्ताय षट्खंडपददायिने ॥३॥
संयमाय दयांगाय पापतापविनाशिने ।
कायक्लेशप्रयुक्ताय द्विषड्भेदप्रकाशिने ॥४॥
महात्यागप्रयुक्ताय सदंगाय नमोनमः ।
लसद्गुणसमूहाय पापध्वंसनहेतवे ॥५॥
सर्वसंगविमुक्ताय स्वाकिंचन्यपरात्मने ।
विश्वसौख्यप्रदानाय नमः स्वर्गप्रदायिने ॥६॥
ब्रह्मचर्याय स्वांगाय विश्वधर्मगुणेशिने ।
प्रभवमारध्वंसाय दशधर्मप्रकाशिने ॥७॥
महादुःखप्रहंतारं मुक्तिसंगमकारिणं ।
स्थापयामि वृषाधीशं चक्रवर्तिपुराकृतं ॥८॥

अकलंकं गुणभद्रं समन्तभद्रं परं तु जिनचंद्रं ।
विद्यानन्दमुनीन्द्रं सुमतिसमुद्रं जिनं नौमि ॥६॥

ॐ ह्रीं चतुर्विंशतिकाग्रेपुष्पाक्षतं क्षिपेत् ॥

अर्हंतमीशमनवद्यमनन्तबोध
मक्रोधमानमनसं शिरसा प्रणम्य ।
आह्वाननं स्थितिसमीपकृतादिपूर्वं
धर्मं शिवाय दशलाक्षणिकं यजामि ॥१॥

ॐ ह्रीं अर्हन्मुखकमलसमुधृतदशलाक्षणिकधर्मं अत्र अवतर अवतर संपौषट् (आह्वाननं) ॐ ह्रीं अर्हन्मुखकमल समुधृत दशलाक्षणिकधर्मं अत्र तिष्ट तिष्ट ठः ठः (स्थापनं) ॐ ह्रीं अर्हन्मुखकमलसमुधृत दशलाक्षणीकधर्मं अत्र मम सन्निहितो भव भवव षट्—(सन्निधिकरणं) ॥

सोमोद्भवां सुरसरित्प्रमुखश्रवन्तीं
पद्मादिनिर्मलसरःशुचिवारिधारां ।
सारां तुषारकिरणायमुद्दु ददेऽहं
धर्माय शर्मनिधये दशलक्षणाय ॥१॥

ॐ ह्रीं अर्हन्मुख समुधृताय दशलाक्षणिकधर्माय जलं ॥१॥

श्रीचंदनेन कृमिजग्धयुतेन चन्द्र
मिश्रेण सारतरलोहितचन्दनेन ।
भ्रूविभ्रमभ्रमरभारभरेण भक्त्या
धर्मं सुखाय दशलक्षणमर्चयामि ॥२॥

ॐ ह्रीं अर्हन्मुखसमुधृताय दशलाक्षणिकधर्माय चन्दनं० ॥२॥

एयप्ररोहानिवहैरिव शुक्लसारैः
स्फारस्फुरित्परिमलैरिव कुन्दवृन्दैः ।
गाल्यक्षतान्ततचयैर्दशधा जिनोक्तं
धर्मं विमुक्तिपदशर्मकृतेऽर्चयामि ॥३॥

ॐ ह्रीं अर्हन्मुख० अक्षतान् ॥ ३ ॥

सच्छीतपुष्पसुभगैः सुमनःसुगन्धैः
सत्केतकीसुरभिगंधयुतप्रधानैः ।
पद्मोत्पलादिभिरपि प्रवरप्रसूनैः
श्रीजिनधर्ममद्य भर्मभिदं भजामि ॥४॥

ॐ ह्रीं अर्हन्मुख० पुष्पं ॥ ४ ॥

सोमालिकासघृवफेनकस्वादखाद्यैः
सन्मोदकै र्वटकभंडकघार्तपूरैः ।
अन्यैरनेकरचनैश्चरुभिर्जिनोक्तं
सूक्तामृतैरिव वृषं मधुरैर्महामि ॥५॥

ॐ ह्रीं अर्हन्मुख० चरुं ॥ ५ ॥

[illegible]मरश्मिसुगंधतैल
माणिक्यमएयरुचिभूरितरप्रदीपैः ।
मिथ्याकुबोधकुचरित्रतमोविनाशं
धर्मं यजे जगदनिंद्यपदेऽर्चयामि ॥६॥

ॐ ह्रीं अर्हन्मुख० दीपं ॥ ६ ॥

गोशीर्षकृमिजगन्धसुरेन्द्रदारु
कर्पूरयावनलवंगजटादिमिश्रं ।
धूपं ददामि मदनारिविनाशहेतोः
धर्माय कर्मकरिकेसरिणे शुभाप्त्यै ॥७॥

ॐ ह्रीं अर्हन्मुख० धूपं ॥ ७ ॥

श्रीमत्कपित्थकरकक्रमुकाम्रजंबु
जंबीरकंटकीफलोतमनालिकेरैः ।
कुष्माण्डकाम्रकदली वरबीजपूरैः
संपूजयामि जिनधर्ममनल्पसिद्धैः ॥८॥

ॐ ह्रीं अर्हन्मुख० फलं ॥ ८ ॥

अमलकमलगन्धैस्तन्दुलैः पाण्डुखण्डैः
प्रसवचरुभिरुच्चैर्दीपधूपप्रसूनैः ।
अथकृत (थ) शत ? पत्रैस्वस्तिकाद्यैर्ददेऽहं
रचितमुचितमस्मै जैनधर्माय वार्घं ॥९॥

ॐ ह्रीं अर्हन्मु० अर्घं ॥ ९ ॥

अथ जयमाला

घत्ता – धम्मालयसारं लक्खणभारं
दहलक्खण लक्खण सहियं ।
दह दिणसुहकारणामविपारं
अक्खमिजइ जिणवर कहियं ॥१॥

पंचमोदिण जिणणाम सुकहियं
सुज्झकिरण उत्तमखमसहियं ।
छुट्टिदिणचंद किरणगुण भरियं
मद्दवसहियसुपोसह महियं ॥२॥

सत्तमीदिणमणिकिरण विसालं
अज्जव सहपण सुहुसह भालं ।
अट्ठमि धम्मरयण गुणमालं
सव्ववयाण लहियं जगपालं ॥ ३ ॥

णममी वोहरयण पुज्जिज्जइ
सौचसंगसिरि जिणवर गिज्जई ।
दहमी अभयरयण जाणिज्जइ
संयमसहियजिणिंद भणिज्जइ ॥ ४ ॥

एकादहीमणिकुण्डल णिम्मल
परतव सहकिज्जइतप विमल ।
बारसि चिंतारयणसमुज्जल
दाण सुपत्तहं दिज्जइ सुहजल ॥ ५ ॥

तेरसि लोयतिलय महिमायर
आकिंचणगुण सहियं गुणभरं ।
चौदसिबंभ तिलयमहि मणोहर
बंभचेरगुण भरिओ सुहकर ॥ ६ ॥

णाम सहिय सुदिण दह लक्खण
पुव्वंकिय अरहेण सुलक्खण ।
बाहुबलेण सुकीय सुविचक्षण
सिरिजयकुमर लहियफलदक्खण ॥७॥

महाबल लोहजंग वयधारी
रयणं गदरथणप्पहकारी ।
अजितं जय जय विजयमणोहर
ललियंगउ वज्जंगउ वयकर ॥ ८ ॥

चिंतागइण होइ मणोगइ
अमितगइ तह किथउ चपलगइ ।
मणोवेग वय धरिउ चपलगइ
विज्जकुमर चितंगकुमरवइ ॥ ९ ॥

भाण सुभाणकिय उवयमुत्तम
पयापाल महीपाल सुसत्तम ।
कियउ अणंतपाल पुरुसोत्तम
धणवइ धणपालेण मणोत्तम ॥ १० ॥

भविसकुमर सिरिकुमर सुसारं
वज्जकुमर श्रीपाल सुधारं ।
कंठ सुकंठ णरिंद भारं
घोस सुघोस गमा वयपारं ॥ ११ ॥

एवं णरणारी वय सुंदर
पळिवकिय गय मोक्खसुमंदिर ।
कहिय जिणिंद दिव्वधुणि मंदिर
भविय सणाण लहइ सोमंदिर ॥१२॥

जेणरणारी भणइ जयमाला
लहुते पावइ सुह परिमाला ।
मुक्ति रमणी गल कंदल माला
णासइ भवभय दुक्खह माला ॥१३॥

अभय चंद मुणि जय मणोहार।
वंदित अभयनन्दि जयकारा।

घत्ता-वंदित सुरसागर, मुणिगण सागर, सागरसुख तरंगभर।
सिरि सुमइ सुसागर, जिणगुणसागर, सागरकेवल परमपद (८)

ॐ ह्रीं दशलाक्षणिक धर्मेभ्यः महार्घं०—

अथ प्रत्येक पूजा

मसुरीदशमहीकायरक्षणे शुद्धमानसः।
सचित्तधरण्यां पादं न ददात्यर्चते सदा ॥१॥

ॐ ह्रीं सप्तलक्षमहाकायरक्षणोत्तमक्षमाय जलादिकं० ॥१॥

सर्वजीवहितागारं मुनीन्द्रं गुणशालिनं।
क्षमासद्धर्मगेहं वा चर्चे वीतपरिग्रहं ॥२॥

ॐ ह्रीं सर्वजीव रक्षणोत्तम क्षमायजलं ॥२॥

अंबुबिन्दुसमं गात्रं जलकायसुरक्षकं।
वसुद्रव्यपरैः शुद्धैः संयजामि दमीश्वरं ॥३॥

ॐ ह्रीं जलकायरक्षणोत्तमक्षमाय जलादिकं ॥३॥

सूचिकाग्रसमंकायं वह्निजीवसुरक्षकं।
महासिद्धान्तवेत्तारं संयजे ऋषिपं मुदा ॥४॥

ॐ ह्रीं अग्निजीवरक्षणोत्तम क्षमाय जलादिकं ॥४॥

ध्वजाकायसमं देहं वातकायसुरक्षकं।
ज्ञानविज्ञानवाराशिं महामि यतिनायकं ॥५॥

ॐ ह्रीं वातकायरक्षणोत्तमक्षमाय जलादिकं ॥५॥

अनेकवृक्षजीवानां दशलक्षविशारदं ।
अनेककायजीवानां वै पालकं तं यजाम्यहं ॥६॥

ॐ ह्रीं वनस्पतिकाय रक्षणोत्तम क्षमाय अर्घं ॥६॥

नित्यनिकोतजीवानां मेकरज्जुप्रपालकं ।
तं क्षमागारकं चर्चे जलचंदनतंदुलैः ॥७॥

ॐ ह्रीं नित्यनिकोतरक्षणोत्तमक्षमाय अर्घं ॥७॥

इतरनिकोतजीवसमूहप्रतिपालकं ।
मुनीन्द्रं गुणवाराशिं पूजयामि दमीश्वरं ॥८॥

ॐ ह्रीं इतरनिकोतभव्यजीवरक्षणोत्तमक्षमाय अर्घं ॥८॥

विकलेन्द्रियत्रयोभेदं जीवराशिप्रपालकं ।
स्वंभः चन्दनशालीयैः महामि भवघातकं ॥९॥

ॐ ह्रीं विकलेन्द्रियत्रयभेदजीवरक्षणोत्तमक्षमायजलादिकं ।

गर्भोद्भवजीवानां पालकं सुयतीश्वरं ।
पंचेन्द्रियमतान्तंवा रक्षकं प्रयजे सदा ॥१०॥

ॐ ह्रीं पंचेन्द्रियजीवरक्षणोत्तमक्षमाय जलादिकं ॥१०॥

जलचंदन शालीयैः पुष्पनैवेद्यदीपकैः ।
धूपफलभरैश्चाये प्रथमांगं क्षमाधिकं ॥११॥

ॐ ह्रीं उत्तमक्षमायमहार्घं निर्वाणति स्वाहा ।

जयमाला

उत्तमक्षमासुआदिजिनेश्वर, भरतेश्वर वर बाहुबली ।
अनन्तवीर्य श्रीवृषभसेनधरि, उत्तम पुरुष सौभाग्यकरी ॥१॥
दया सहित गुणवंत क्षमालय, क्षमाजल क्रोधाग्नि सर्वटालय ।
जीवभेद क्षमागुण करिपालय, शील सुलक्षणक्षमा सुखालय ॥
ध्यानधरे क्षमारक्षणशुद्धा, ज्ञानवंतमुनि क्षमा प्रसिद्धा ।
प्रथम क्षमा श्रीचरणभूषण, क्षमाबल मुनिवर गतबहु दूषण ॥३॥
क्षमाथकी क्रोधवैरी निबला, क्षमाथकी धर्मध्यान सु सबला ।
क्षमामान मोडेमान रिपुभर, क्षमायोग योगीश्वर शुभपर ॥४॥
क्षमा करे माया गुणफलहर, क्षमा लौभवैरी विषविषहर ।
क्षमा ऋद्धिदाता मुनि जसकर, क्षमाबीजकरि भव्य सुभवपर ॥५॥
क्षमा मोक्ष राणी सु सहेली, क्षमा सिद्ध नर-सती महेली ।
क्षमा कर्मनर भक्षण देवी, क्षमा सु मुनिवर चरण सुसेवी ॥६॥
क्षमा क्रियाणक देशविशाले, क्षमाक्रियाणक हृदमाले ।
श्री जिण गणधर णर मुनिवर, विक्रयकरइसुलेइ भव्यवर ॥७॥

घत्ता क्षमाधर्म जिनपुत्र धुरंधर मोक्षनगर व्यापार करे ।
श्रीअभयनन्दि जिन क्षमा मनोहर सुमतिसागर जिन धर्म धरे॥८॥

ॐ ह्रीं उत्तम क्षमाय महार्घं ।

॥ इति प्रथम क्षमांगपूजा ॥

अथ द्वितीयांग पूजा—

त्यक्तमानं सुखागारं मार्दवं क्रिययान्वितं ।
पूजया परया भक्त्या आह्वानादि विधानतः ॥१॥

ॐ ह्रीं मार्दवांग अत्र अवतर अवतर संवौषट् (आह्वाननं) अत्र तिष्ठ तिष्ठ ठः ठः (स्थापनं) अत्र मम सन्निहितो भवभवव-षट् स्वाहा ।

पापगर्वप्रहंतारं रागद्वेषविनाशकं ।
मार्दव गुणसंयुक्तं पूजयामि गुणोत्करं ॥ १ ॥
ॐ ह्रीं मार्दवांगाय जलादिकं ॥ १ ॥

जातिगर्व प्रहंतारं दुखदं सौख्यदूरगं ।
गर्वनाशकरं साधुं पूजयामि जलादिकैः ॥ २ ॥
ॐ ह्रीं जातिगर्वरहितमार्दवांगाय जलादिकं ॥ २ ॥

रूपगर्वं न जानाति वैराग्यसहितो महान् ।
महाध्यानयुतो नित्यं मह्यतेऽसौ विशारदः ॥ ३ ॥
ॐ ह्रीं रूपगर्व रहित मार्दवांगाय जलादिकं ॥ ३ ॥

कुलगर्वविधातारं मुनिलोकप्रबोधकं ।
धर्मध्यानरतं नित्यं यजामि गुणशालिनं ॥४॥
ॐ ह्रीं कुलगर्वरहितमार्दवांगाय जलादिकं ॥ ४ ॥

ज्ञानगर्वविजेतारं मुनिं वीतपरिग्रहं ।
चित्स्वरूपं चिदानंदं यजेऽहं जलमोदकैः ॥ ५ ॥
ॐ ह्रीं ज्ञानगर्वरहितमार्दवांगाय जलादिकं ॥ ५ ॥

बलमदबलार्जितं लोकोद्धारसमर्थकं ।
वीतमत्सरकं चर्चे ध्यानगम्यं मुनिं सदा ॥ ६ ॥
ॐ ह्रीं बलमदरहितमार्दवांगाय जलादिकं ॥ ६ ॥

पत्त्रादितपसा युक्तो गर्वं न कुरुते कदा ।
भुवनगन्धशालीयैः पूज्यते गुरुसप्तमः ॥ ७ ॥

ॐ ह्रीं तपगर्वरहित मार्दवांगाय जलादिकं ॥ ७ ॥

भामापुत्रसुबन्धूनां महागर्वविनाशकं ।
स्वंभचंदनशालीयैः पूजयामि ऋषिपरं ॥ ८ ॥

ॐ ह्रीं भामापुत्रादिगर्वरहितमार्दवांगाय जलादिकं ॥ ८ ॥

धनधान्यसुवस्तूनाम् ममताभावदूरगं ।
संसारतारकं देवं महामि सुतपोनिधिं ॥ ९ ॥

ॐ ह्रीं धनधान्यगर्व रहित मार्दवांगाय जलादिकं ॥ ९ ॥

गोमहिषीगजाश्वानां पापगर्वविदूरगं ।
मुनिं सुमृदुतायुक्तं महामि जलमोदकैः ॥ १० ॥

ॐ ह्रीं चतुष्पदादिगर्व रहित मार्दवांगाय जलादिकं ॥१०॥

जलगंधादिकैः पुष्पैः दीपधूपफलोत्तमैः ।
मार्दवांगवरं चर्चे शुद्ध धर्मोपदेशकं ॥

ॐ ह्रीं मार्दवांगाय महार्घं निर्वपामीतीति स्वाहा—

अथ जयमाला ।

घत्ता – गर्व विनाशक, मदपरिनाशक, धर्मासन वर शुद्ध मुनि ।
बहुकर्म निराकर, मार्दव शुभकर, जिनशासन गृहकथितमुनि॥ १॥

जय मार्दव अंग विशाल रूप ।
जय मार्दव सेवित सुमुनि भूप ॥

वर जाति मद न करोति मुनि ।
वर भव्य संबोधन धर्म गुणी ॥ २ ॥
जाति गर्व बहु पाप भयंकर ।
जाति गर्व कुत्सित नर दुखधर ॥
जाति गर्व कुलहीन सुभवपर ।
जातिगर्व न विकार सुमतिपर ॥ ३ ॥
रूपगर्व गुणगण सबटाले ।
रूपगर्व अपकीर्ति सुभाले ॥
रूपगर्व अवकुरूप सुघरपर ।
रूपगर्व निंदागृह परनर ॥ ४ ॥
वर कुलगर्व नीच कुलदाता ।
वर कुलगर्व सुदुर्गति भ्राता ॥
वर कुलगर्व सुधर्म निराकर ।
वर कुलगर्व सुपाप भयंकर ॥ ५ ॥
ज्ञानगर्व मुनिवर विभासे ।
वर उपदेश बोध सुविभासे ॥
ज्ञानगर्व मूर्खपद पामे ।
अक्षर अर्थ भाव पर वामे ॥ ६ ॥
वरतप बिमल सुगति बहुसाधक ।
तपबल कर्मसमूह बिबाधक ॥
मुनिवर जिनवर तप गुण धारक ।
सुतप करोति कुधर्म बिदारक ॥ ७ ॥
शीत भट सह ससूर लक्षाकर ।
कोटी भट संख्या न बिभाकर ॥
धर्मवंत पाण्डव नर गुणधर ।
सुतप गर्व नहिं कीधा मुनिवर ॥ ८ ॥

लक्ष्मीगर्व करीने गुत्ता।
पाप गर्व धरि ते नर भूत्ता ॥
मान विमान कदानहि जाने।
मुनिवर वसुमद कदा न माने ॥
घत्ता—वर मार्दव साधे, दुख न बाधे,
अभयचंद्र दयनन्दि वर ।
श्रीसुमतिसागर, जिनबोध दिवाकर,
भाकर मार्दव शुद्धकर ॥ १० ॥
ॐ ह्रीं मार्दवांगाय जयमाला महार्घं निर्वयामिति स्वाहा ।

अथ आर्जवांग पूजा।

स्थापयामि परमांगं धर्महेतुविवर्धकं।
शासनोद्योतकं चर्चे वीतरागं सुवल्लभं ॥ १ ॥

ॐ ह्रीं उत्तम आर्जवांग अत्र अवतर अवतर संवौषट (आह्वाननं) अत्रतिष्ट तिष्ट ठः ठः (स्थापनं) अत्र मम सन्नि-हितो भव भव वषट् (सन्निधिकरणं)

मनसि कुटिलतांयो न करोति कदा मुनिः।
विशुद्धहृदयं देवं महामि यतिनायकं ॥ १ ॥

ॐ ह्रीं मनसि कुटिलता रहित आर्जवांगाय जलादिकं (अष्ट द्रव्यका अर्घ देना) ॥ १ ॥

सत्यवाक्ययुतं धीरं सत्योपदेशदायकं।
दुःखदारिद्रहंत्तारं यजे साधुं निरंतरं ॥ २ ॥

ॐ ह्रीं सत्यवाक्य युक्ताय आर्जवांगाय जलादिकं ॥ २ ॥

असत्ये च महादुखदायके न रतो मुनिः ।
चर्च्यतेऽसौ परोवेत्ता जिनशासनरक्षकः ॥ ३ ॥
ॐ ह्रीं असत्यकार्यरहित आर्जवांगाय जलादिकं ॥ ३ ॥

सत्यासत्यद्वयं कार्यं हिताहितविचारकः ।
परहितचिंतकोऽसौ मह्यते गुणसागरः ॥ ४ ॥
ॐ ह्रीं उभयकार्य विचारसहितार्जवांगाय जलादिकं ॥ ४ ॥

त्रिकरणयोगधरं युधिष्ठमिव वै मुनिं ।
परोपसर्गजेत्तारं पूजयामि शिवंकरं ॥ ५ ॥
ॐ ह्रीं परोपसर्ग सहनार्जवांगाय जलादिकं ॥ ५ ॥

मुनीन्द्रं गुणवाराशिं कुमिथ्यामतखण्डकं ।
क्षुत्पिपासासहं धीरं संयजामि दयाधिकं ॥ ६ ॥
ॐ ह्रीं परिषह सहनार्जवांगाय जलादिकं ॥ ६ ॥

हितमितमधुश्रेष्टं वाक्यसंसारतारकं ।
सदुपदेशकं साधुं चर्चे तं धर्मनायकं ॥ ७ ॥
ॐ ह्रीं मधुरोपदेशार्जवांगाय जलादिकं ॥ ७ ॥

वीतरागमहाध्यानधारकं चित्तवारकं ।
ऋजुपरिणामागारं तं महामि यतीश्वरं ॥ ८ ॥
ॐ ह्रीं ऋजुपरिणामार्जवांगाय जलादिकं ॥ ८ ॥

षडावश्यकसंधारं चिद्रूपं ध्यानतत्परं ।
कायोत्सर्गमहायोगं धारकं तं यजे मुदा ॥ ९ ॥
ॐ ह्रीं षडावश्यकार्जवांगाय जलादिकं ॥ ९ ॥

व-[illegible]ाक्याद्विरक्तं हि प्रमाण नयदेशकं ।
कामस्य मद हंतारं भावयामि यतीश्वरं ।। १० ।।
ॐ ह्रीं वक्र वचनरहितार्जवांगाय जलादिकं ।। १० ।।

वनचंदन शालीयैः जतांतचरुदीपकैः ।
धूपफल भरैश्चाये आर्जवं सुधर्मोदधिं ।। ११ ।।
ॐ ह्रीं आर्जवांगाय महार्घं निर्वयामीति स्वाहा ।

जयमाला ।

घत्ता—आर्जव सुखमंदिर, त्रिभुवनसुखसुन्दर,
मुनिवर बंधव सुगुण सही ।
[illegible]चेत्ता, परगुणनेत्ता
विधनं दुर्गति गमन सही ।। १ ।।
कुटिल विचार, करे न मुनिवर ।
शुद्धाचरण विचरण, सुयतिवर ।।
सत्य असत्य उभय अनुभव मन !
तथा मुनीन्द्र सुकथन वचनगण ।। २ ।।
तनु विचरण त्रयभेद सुसंख्या ।
मनवचकाय गुप्ति परिरक्षा ।।
कथित धर्मदयापरशासन ।
सकलजीव हितकरण सुभाषण ।। ३ ।।
ऋजुपरिणाम विविध जणमंडण ।
सम मन भाव कुमत मत खंडन ।।
परम विचार स्वमन परिरक्षण ।
भेद भाव स्तुति वितत विचक्षण ।। ४ ।।

वीतराग गुण मनगत सुंदर ।
बोध विचार परमपद मन्दिर ॥
शुद्धाचार सु आर्जव गुणधर ।
पर दुख सहन सुमन सुघनवर ॥ ५ ॥
विकट कथानहि भाषित यतिवर ।
शीतल वचन मधुरधन सुन्दर ॥
कालत्रय धृतयोग सुकन्दर ।
सर्व जीव समता जय मंदर ॥ ६ ॥
घत्ता—ए गुणधरि आर्जव, मुनिवर आर्जव,
आर्जव अंग सुजिनवर वचन ।
सूरि अभययतींदा जिन मुनिवंदा,
सुमति सागर जिनगुण कथन ॥ ७ ॥
ॐ ह्रीं आर्जवांगाय महार्घं निर्वपामीति स्वाहा ।

अथ सत्यांग पूजा —

स्थापयामि सदा चित्ते सत्यधर्मांगकं मुदा ।
धर्मसिद्धिकरं लोके सर्वकल्याणकारकम् ॥

ॐ ह्रीं उत्तमसत्यांग अत्र अवतर अवतर संवौषट् (आह्वाननं) अत्र तिष्ठ तिष्ठ ठः ठः स्वाहा (स्थापनं) अत्र मम सन्निहितो भव भव वषट् (सन्निधिकरणं) ।

सत्यशीलगुणाधारं स्पष्टसंख्याविवेदकं ।
चर्चामि वरपानीयैः श्रीमुनिं मदहिंसकं ॥ १ ॥

ॐ ह्रीं सिद्धगुणोद्धारकसत्यांगाय जलादिकं (अष्ट द्रव्य का अर्घ) ॥ १ ॥

जिनेन्द्रवचनाधारं वेदवेदांगपारगं ।
असत्यांगविधातारं पूजयामि महामुनिं ॥ २ ॥
ॐ ह्रीं जिनेन्द्रवचनधृत सत्यांगाय जलादिकं ॥ २ ॥

द्वादशांगश्रुताधारं जिनसंघप्रबोधकं ।
असत्यांगसुधाब्धिं वा तं महामि यतीश्वरं ॥ ३ ॥
ॐ ह्रीं द्वादशांगश्रुत सत्यांगाय जलादिकं ॥ ३ ॥

महासाधुं गुणोपेतं सद्ध्याननिरतं सदा ।
जलचन्दन शालीयैश्चर्चेहं श्रीमुनिपरं ॥ ४ ॥
ॐ ह्रीं साधुगुणरत सत्यांगाय जलादिकं ॥ ४ ॥

सत्यव्रतधरं साधुं पापतापनिवारकं ।
सत्यक्रियादयाधारं सुमुनिं पूजयाम्यहम् ॥ ५ ॥
ॐ ह्रीं व्रतक्रियायुक्त सत्यांगाय जलादिकं ॥ ५ ॥

सत्यपंचमहामेरुं भेदज्ञानप्रकाशकं ।
सत्यधर्मगुणाधारं पूजयामि गणाधिपं ॥ ६ ॥
ॐ ह्रीं मेरुपृथ्वीसत्यांगाय जलादिक ॥ ६ ॥

अष्टभूमिजिनेन्द्रोक्तं भेदभावप्रभावकं ।
सुमुनि र्महते नित्यमम्भचंदनस्वक्षतैः ॥ ७ ॥
ॐ ह्रीं अष्टभूमिज्ञान सत्यांगाय जलादिकं ॥ ७ ॥

चतुर्दशगुणस्थान सत्यभावविचारकं ।
यजामि मुनिपं धीरं शुद्धबुद्धिप्रदायकं ॥ ८ ॥
ॐ ह्रीं सत्यसिद्धान्त सत्यांगाय जलादिकं ॥ ८ ॥

जिनदेवे जिनगुरौ जिनसूत्रे विशारदः ।
जिनवृषे महाज्ञानी भाष्यते मुनिपुंगवः ॥ ६ ॥
ॐ ह्रीं गुरुप्रतीति सत्यांगाय जलादिकं ॥ ६ ॥

तत्त्वप्रतीतिसत्यांगं कामध्वंसन कोविदं ।
यथाख्यात चरित्राढ्यं पूजयामि जलादिकैः ॥१०॥
ॐ ह्रीं यथाख्यात चारित्र सत्यांगाय जलादिकं ॥ १० ॥

धर्मं देवगुरुं दयाप्रहसितं बोधं जिनेन्द्रोदितं ।
त्रैलोक्यं सकलं सुदेवविततं चारित्र रत्नं महत् ॥
सत्यं द्रव्य सुतत्व बोध निचयं सत्यं विना चान्यथा ।
सत्यं श्रीजिनदेव भाषितवरं चार्घं ददे भावतः ॥
ॐ ह्रीं सत्यांगाय महार्घं निर्वयामिति स्वाहा ।

अथ जयमाला ।

घत्ता— सत्यांगं जिनधर्मं प्रकाशं,
कुरुते यतिपति विगतमला ।
जिनदेव सुवाणी गुणनिधिजाणी,
पठित सुधर्म कथा विमला ॥ १ ॥
सत्य सिद्ध गुण जिनवर वेत्ता ।
सत्य जिनेश्वर धर्म सुगेत्ता ॥
सत्य सुदर्शन प्रथम सु तारण ।
सत्य सुबोध परम गुण कारण ॥ २ ॥
सत्यसुव्रत भर मुनिवर भूषण ।
सत्य सुगेहो दर्शन पोषण ॥

सत्य सुवृषवर जिन मुख भाषण।
सत्य सुजीव दया मुनि शासन ॥ ३ ॥
सत्य परम गुरु पंच सु सारं।
सत्य पंच गुरु प्रतिमा तारं॥
सत्य सूरि स्वामी वरहारं।
सत्य पाठक गुणनिधि संकारं ॥ ४ ॥
सत्य सुत्रेषठि पुरुष महागण।
सत्य सुलोकालोक सुधिषण ॥
सत्य परम गुरु वचन सुतारण।
सत्य अणंताजिन रिपु वारण ॥ ५ ॥
सत्य सुतत्व सप्त जिन वचना।
सत्य सुद्रव्य जिनेश्वर वचना ॥
सत्य पदारथ केवल ज्ञानी।
सत्य अंग श्रीद्वादश वाणी ॥ ६ ॥
घत्ता—सत्य सुमेरु मही जिन शासन,
सत्य स्वर्ग अपवर्ग मही।
श्रीअभयनन्दी गुरुचरण सेवक,
सुमतिसागर जिन कथित सही ॥ ७ ॥

ॐ ह्रीं उत्तम सत्यांगधर्माय महार्घं निर्वपामीति स्वाहा।

अथ शौचांग पूजा

विश्वजीवहितागारं शौचांगं सुखमोक्षदं।
स्थापयामि त्रिवारं तं पूजयामि पृथक् पृथक् ॥

ॐ ह्रीं शौचांग अत्र अवतर अवतर संवौषट् (आह्वानन) अत्र तिष्ट तिष्ट ठः ठः (स्थापनं) अत्रमम सन्निहितो भवभव वषट् स्वाहा (सन्निधिकरणं)

धर्मप्रतीतिशौचांगं भव्यजीवहितावहं ।
पालकं सुमुनिं चाये धर्मदेशनतत्परं ॥ १ ॥
ॐ ह्रीं धर्मप्रतीति शौचांगाय जलादिकं (अष्टद्रव्य से अर्घ) ॥१॥

वाक्यशौचं परं प्रोक्तं श्रीजिनेन्द्रस्तवादिकं ।
मनः शौचं विधातारं यजेऽहं मुनिधर्मदं ॥ २ ॥
ॐ ह्रीं पवित्रवाक्य शौचांगाय जलादिकं ॥ २ ॥

श्रीचारित्रपरं साधुं श्रीशौचांगविनायकं ।
वनगन्धाक्षतैश्चर्चे वीतमोहं विशारदं ॥ ३ ॥
ॐ ह्रीं चारित्रस्नान शौचांगाय जलादिकं ॥ ३ ॥

अन्तरात्ममहाभेदभेदकमघछेदकं ।
शौचांगस्य धरधीरं तं यजामि गुणोदधिं ॥ ४ ॥
ॐ ह्रीं आत्मध्यान शौचांगाय जलादिकं ॥ ४ ॥

गुप्तिगोपनशौचांगधारकं भवतारकं ।
महामि तत्ववेत्तारं महाधर्म विधायकं ॥ ५ ॥
ॐ ह्रीं गुप्तित्रयरक्षण शौचांगाय जलादिकं ॥ ५ ॥

क्रोधोत्पत्तिनिहंत्तारं वीतरागं महामुनिं ।
यजामि कामहंतारं जलचंदनसाक्षतैः ॥ ६ ॥
ॐ ह्रीं क्रोधादि रहित शौचांगाय जलादिकं ॥ ६ ॥

चैत्योपदेशकर्त्तारं सर्वजीवहितेशिनं ।
जलाद्यष्टमहाद्रव्यैः महामि जयदं परं ॥ ७ ॥
ॐ ह्रीं जिनचैत्योपदेश शौचांगाय जलादिकं ॥ ७ ॥

पंचाचारविचारज्ञं श्रीमुनिं शौचधारकं ।
समित्यादिव्रतस्नानधारकं तं यजे मुदा ॥ ८ ।
ॐ ह्रीं व्रतमित्यादि शौचांगाय जलादिकं ॥ ८ ॥

व्यवहारशौचसंधारं जिनपूजाकरं परं ।
स्वर्गादिगतिदं सारं तं महाम्यघघातकं ॥ ६ ।
ॐ ह्रीं जिनपूजोपदेश शौचांगाय जलादिकं ॥ ६ ॥

परब्रह्मजपारंगं जिन शासन पोषकं ।
इहाशौचधरं देवं संयजामि जलादिकैः ॥ १० ॥
ॐ ह्रीं परब्रह्मजपादि शौचांगाय जलादिकं ॥ १० ॥

चर्मास्थिमांस चांडालमृतस्पर्शात्सुनिर्मलः ।
विष्टास्पर्शाज्जलस्नान माचरेन्महामुनिः ॥
ॐ ह्रीं शौच धर्मांगाय महार्घं ।

अथ जयमाला—

घत्ता—शौचधर्म परमार्थवेत्ता
श्रीजिननेत्ता धर्मधुरा ।
जिनशासन परमारथ धर्त्ता
कर्त्ता मुक्तिवधू मधुरा ॥ १ ॥

शौच परमजन मुनिवर पामो ।
शौच सुबाहुबलि भव स्वामी ॥
शौच जिनेंद्र वचन परिपूजित ।
शौच सुदर्शनजल अघ धूजित ॥ २ ॥

शौच सुदर्शन शेठ महाजन ।
परम सुशील व्रत ते धन धन ॥
शौचधर्म पाले जन शुद्धा ।
शौच विश्वहित चिंतन बुद्धा ॥ ३ ॥
शौच सुपरधन मन नहि सूरा ।
शौच धर्म गणधरनिसुपुरा ॥
शौच वक्र वचनावलि नाशक ।
शौच शुद्ध वचन प्रकाशक ॥ ४ ॥
शौच आदि जिन आदि प्रकाशी ।
शौच सुसन्मति अन्तिम भाशी ॥
शौचकायगुणरक्षक धीरा ।
शौच सुसंयम द्वादश वीरा ॥ ५ ॥
शौच परम व्यवहार लहिज्जइ ।
शौचापरकृत जिनपूजिज्जइ ॥
शौच विमनवृत ततपरकाया ।
शौच रक्षण कृत मुनिराया ॥ ६ ॥
घत्ता—जलशौच सुकृतगृह
घरनिपुनातु श्रीजिनपूजपरा ।
श्रीअभयनंदी गुरुचरण सुसेवक
सुमतिसागर जिनकथितपरा ॥
ॐ ह्रीं शौच धर्मांगाय महार्घं निर्वपामीति स्वाहा ।

अथ संयम पूजा—

दयाढ्यं संयमं चोक्तं सुंदरमिन्द्रियातिगं ।
पूजयापरयाभक्त्या पूजयामि तदाप्तये ॥

एकेन्द्रिया पराजीवा द्वापंचाशत्प्रमाणकाः ।
लक्ष्यसंख्या दयागारं संयजामि दमाधिकं ॥१॥

ॐ ह्रीं एकेन्द्रिय रक्षणसंयमांगाय जलादिकं ॥१॥

द्वीन्द्रियादिपराजीवालक्ष्यद्वयप्रपालकं ।
स्वात्मवस्तुविभेदज्ञं तं यजाम्यभयान्वितं ॥२॥

ॐ ह्रीं द्वीन्द्रियरक्षणसंयमांगाय जलादिकं ॥ २ ॥

त्रीन्द्रियरक्षकं साधुं लक्ष्यद्वयप्रपालकं ।
यजामि संयमनिधिं जलादिवसुद्रव्यकैः ॥३॥

ॐ ह्रीं त्रीन्द्रियजातिरक्षण संयमांगाय जलादिकं ॥३॥

चतुरिन्द्रियजीवौघरक्षकं वनवासिनं ।
लक्ष्यद्वयविचारज्ञं यजामि भव्यबांधवं ॥४॥

ॐ ह्रीं चतुरिन्द्रियजातिरक्षण संयमांगाय जलादिकं ॥४॥

पंचेन्द्रियबहुभेददायकं मुनिनायकं ।
जलनभभूमिभेदज्ञं पूजयामि शमोदधिं ॥५॥

ॐ ह्रीं पंचेन्द्रियजातिरक्षणसंयमांगाय जलादिकं ॥५॥

स्पर्शनविषयातीतं योगभावविचारकं ।
नग्नरूपं परं साधुं महामि भवभेदकं ॥६॥

ॐ ह्रीं स्पर्शनेन्द्रियविषय रहित संयमांगाय जलादिकं ॥६॥

रसनेन्द्रियवंचकज्ञानध्यानविपारज्ञं ।
यजामि संयमागारं जलगंधसुतन्दुलैः ॥७॥

ॐ ह्रीं रसनेन्द्रिय विषयरहित संयमांगाय जलादिकं ॥ ७ ॥

घ्राणेन्द्रियरक्षकं वै विषयविषनाशकं ।
संयमागारकं चर्चे जिनधर्मविवर्द्धकं ॥८॥

ॐ ह्रीं घ्राणेन्द्रिय विषयरहित संयमांगाय जलादिकं ॥ ८ ॥

नेत्रेन्द्रियरक्षकं सूरं भामासंगविवर्जितं ।
शीलाशीलविचारज्ञं चर्चे शीलसरित्पतिं ॥९ ।

ॐ ह्रीं नेत्रेन्द्रिय विषयरहित संयमांगाय जलादिकं ॥ ९ ॥

कर्णेन्द्रियसाधकं धीरं सुस्वरादिविवर्जितं ।
वरयोगगृहं चाये स्वष्टभेदविधार्चनैः ॥१०॥

ॐ ह्रीं कर्णेन्द्रिय विषयरहित संयमांगाय जलादिकं ॥१०॥

गाथा—सयमसूरं यतीन्द्र ज्ञानाब्धि धर्मदं परं ।
साधु जलचंदनशालियै पुष्पोधैः पूजयामि दयाधारं ॥

ॐ ह्रीं उत्तम संयमांगाय महार्घं ।

जयमाला ।

घत्ता—संयम मुनितारकं कर्मविदारकं
वारककाम त्रिशल्य सदा ।
त्रिभुवनपरिसुन्दर गणधर विरचित
वदति जिनेन्द्र विगतपदा ॥ १ ॥
संयम जिन आदिजिनेन्द्र वुक्त ।
संयम गुण चित्त सुबोध सुत्त ॥
संयम गुणकष्ट विपाक सहन ।
संयम गुण वह्नि सुकर्म दहन ॥ २ ॥

संयमगुण ध्यान धरंति धीर।
संयमगुण समताभाव वीर॥
संयमगुण शुद्धचारित्र धार।
संयमगुण जीव स्वरूप पार ॥ ३ ॥
संयमगुण सीतानारि पार।
संयमगुण जीव न दोषसार॥
संयमगुण अनन्तमती विचार।
संयमगुण सामायिक सुसार ॥ ४ ॥
संयमगुण कोमल रति न संति।
संयमगुण दश दोष हरंति॥
संयमगुण नयगुण ते धरंति।
संयमगुण मनवचकाय करंति ॥ ५ ॥
संयमगुण न हरति पापबुद्धि।
संयमगुण मौन धरंति शुद्ध॥
संयम गुण शुद्धसुध्यानपूर।
संयम गुण परहितकरण पूर ॥ ६ ॥

घत्ता—संयम पालंता, मुनि जयवंता, संता सुरनर पूजकरे।
श्रीअभयनन्दी, गुरुसंयम पारग, सुमतिसागर जिन धर्म धरे ॥७॥

ॐ ह्री उत्तम संयम धर्मांगाय महार्घं—

अथ तपः पूजा।

कामेन्द्रियदमं सारं तपःकर्मारिनाशनं।
पूजया परया भक्त्या पूजयामि तदाप्तये॥

ॐ ह्रीं तपोधर्मांग अत्र अवतर अवतर सवौषट् (आह्वाननं) अत्र तिष्ठ तिष्ठ ठः ठः स्वाहा (स्थापनं) अत्र ममसन्निहितो भव भव वषट् (सन्निधापनं)

अष्टमीप्रोषधागारं वसुकर्मविनाशकं ।
सुरनरैः सदा पूज्यं महामि जलद्रव्यकैः ॥ १ ॥
ॐ ह्रीं अष्टमोप्रोषधोतपोगाय जलादिकं ॥ १ ॥

चतुर्दशीदमयुक्तं परकष्टनिवारकं ।
महामि तं नृपाराध्यं वसुद्रव्यसमूहकैः ॥ २ ॥
ॐ ह्रीं चतुर्दशीप्रोषधतपोगाय जलादिकं ॥ २ ॥

पंचमोप्रोषधागारं केवलज्ञानभावदं ।
महामि यतिपं धीरं वनचंदनपावनैः ॥ ३ ॥
ॐ ह्रीं पंचमी प्रोषधतपोगाय जलादिकं ॥ ३ ॥

एकांतरतपोगारं वधबंधनभंजकं ।
महामि व्रतसंधारं परातीचारवर्जितं ॥ ४ ॥
ॐ ह्रीं एकांतरकृततपोगाय जलादिकं ॥ ४ ॥

द्व्यन्तरादितपाधारं परदेशनतत्परं ।
जयदं जायते पूतं वीतमोहं महीतले ॥ ५ ॥
ॐ ह्रीं द्विदिनानन्तर तपोगाय जलादिकं ॥ ५ ॥

पक्षप्रोषधकर्त्तारं शुभतत्व विधायकं ।
पूजयामि महाद्रव्यैः भावदं च विदांवरं ॥ ६ ॥
ॐ ह्रीं पक्षप्रोषध तपोगाय जलादिकं ॥ ६ ॥

वर्षोपवासिनं वीरं कायोत्सर्गधृतं वरं ।
वृषभेशं जिनं चाये चादि धर्म प्रकाशकं ॥ ७ ।
ॐ ह्रीं वर्षोपवास तपोगाय जलादिकं ॥ ७ ॥

बाहुबलिमुनिं चाये कायोत्सर्गधरं परं ।
वर्षोपवासिनं धीरं पापनाशन शुद्धिदं ॥ ८ ॥

ॐ ह्रीं बाहुबलि वर्षोपवास तपोंगाय जलादिकं ॥ ८ ॥

अहोरात्रिश्रुताभ्यासकरं ध्यानविपारगं ।
चर्चामि बोधकूपारं स्वष्टद्रव्यसमुच्चयैः ॥ ९ ॥

ॐ ह्रीं ज्ञानाभ्यास तपोंगाय जलादिकं ॥ ९ ॥

मनोवाक्कायवश्यार्थे धर्मध्यानपरायणं ।
पूजयामि महाभाग मनेकान्त दिगम्बरं ॥ १० ॥

ॐ ह्रीं त्रिकरण शुद्धि तपोंगाय जलादिकं ॥ १० ॥

महातपोगृहं साधु मम्भचन्दन साक्षतैः ।
लतांतचरु दीपोघैः चाये कामरिपुं परं ॥ ११ ॥

ॐ ह्रीं उत्तम तपोंग धर्माय जलादिकं ॥ ११ ॥

जयमाला

घत्ता—दर्शन शुद्धि, तपवरकरि, वृषभ जिनेश्वर, प्रथमधरी ।
दर्शन विन न तप, जिन भाषित, असित मिथ्या बोधकरी ॥१॥

आदिदेव तप कृत पर कारित ।
मास सु अय अय तप धारित ॥
पर तपवंत मुनीश्वर सुंदर ।
परतपवंत सुशान्ति सु मन्दिर ॥ १ ॥
परतपवंत गणधर देवसु शंकर ।
परतपवंत चारणमुनि नभ संचर ॥
परतपवंत सु इन्द्र पदाधिप ।
परतपवंत फणेन्द्र सुराधिप ॥ ३ ॥

परतपवंत सुजयंत सुगामि ।
परतपवंत चक्रधर स्वामी ॥
परतपवंत परीषह सूरी ।
परतपवंत सुशील सुपूरी ॥ ४ ॥
परतपवंत सु एक दिनांतर ।
परतपवंत सुपक्ष मासकर ॥
परतपवंत सु एक कवल पर ।
परतपवंत परीषह जिन पर ॥ ५ ॥
परतपवंत कुन्द मुनि सुरा ।
परतप जिनवर गणधर तीरा ॥
परतप गति सुरपद धारी ।
परतपगतां सुमति पदकारी ॥ ६ ॥
परतपवंत मुनिवर सन्ता ।
गंता ते मुनि मुक्ति महा श्री ॥
अभय नन्दीश्वर तपजय सुन्दर ।
सुमति सागर जिन शुद्ध सही ॥ ७ ॥
ॐ ह्रीं उत्तम तपोंगाय महार्घं ।

अथ त्याग पूजा —

श्रीमन्नाभि सुतं नत्वा त्यागं सर्वसुखाकरं ।
पूजयामि महाभागं तमेकान्त दिगंबरं ॥

ॐ ह्रीं त्यागधर्म अत्र अवतर अवतर सवौषट् (अह्वाननं) अत्र तिष्ट तिष्ट ठः ठः स्वाहा (स्थापनं) अत्रमम सन्निहितो भव भव वषट् (सन्निधिकरणं)

चतुर्विधं जिनेद्रोक्तं दान लक्षणसंयुतं।
समुपदेशकं कांतं पूजयामि जलादिकैः ॥ १ ॥
ॐ ह्रीं चतुर्विधदानत्यागाय जलादिकं ॥ १ ॥

श्रीजिनेन्द्रश्रुतागारं भव्यजीवप्रपादकं।
सुज्ञानदायकं लोके महामि भवभंजकं ॥ २ ॥
ॐ ह्रीं श्रुतज्ञान त्यागाय जलादिकं ॥ २ ॥

आहारदानोपदेशदायकं यतिनायकं।
महापुण्याकरं चर्चे वीतकामं सुशीलकं ॥ ३ ॥
ॐ ह्रीं अन्नदानोपदेशत्यागाय जलादिकं ॥ ३ ॥

महाबाधाप्रक्रान्तानां मिथ्यारोगनिवारकं।
सदोपदेशदात्तारं महामि भवत्रासकं ॥ ४ ॥
ॐ ह्रीं औषधदानत्यागाय जलादिकं ॥ ४ ॥

परिग्रहमहादोषजेतारं कामतापकं।
चाये घनरसैः शुद्धैः शुद्धबोधप्रकाशकं ॥ ५ ॥
ॐ ह्रीं परिग्रहत्यागाय जलादिकं ॥ ५ ॥

दर्शनवित्तसंधारं मिथ्यावित्तनिवारकं।
परोपदेशविस्तारकरं चाये जलादिकैः ॥ ६ ॥
ॐ ह्रीं सम्यग्दर्शनरक्षण मिथ्या त्यागाय अर्घं ॥ ६ ॥

मोहत्यागकरं साधुं समताधनविपारगं।
शुद्धध्यानाप्तविस्तारं करं चाये जलादिकैः ॥ ७ ॥
ॐ ह्रीं मोहत्यागाय जलादिकं ॥ ७ ॥

क्रोधत्यागकरं सिद्धं क्षमापारगतं वरं ।
मानमर्दनकं सूरं चाये विश्वहितेशिनं ॥ ८ ॥
ॐ ह्रीं क्रोधरहित त्यागाय जलादिकं ॥ ८ ॥

मायाकुण्डलिनीत्यागकरं परोपदेशकं ।
मूर्च्छाछेदकरं नित्यं पूजयामि शिवंकरं ॥ ९ ॥
ॐ ह्रीं मायारहितत्यागाय जलादिकं ॥ ९ ॥

महालोभप्रहंतारं जिनशासनरक्षकं ।
पूजयामि सुत्यागेशं स्वष्टद्रव्यसमुच्चयैः ॥ १० ॥
ॐ ह्रीं लोभरहितत्यागाय जलादिकं ॥ १० ॥

जीवनचंदन तन्दुललतातं चरुदीपधूपफल निकरैः ।
त्यागजलधि मुनिवीरं समताधीरं यजे नित्यं ॥ ११ ॥
ॐ ह्रीं उत्तमत्यागधर्माय महार्घं ।

जयमाला—

घत्ता-त्याग सुलक्षण, मुनिजन लक्षण, लक्षणपात्र, विचारकरी ।
दानसुदात्ता, श्रीमुनित्रात्ता, त्रिभुवन जीवन, सुभावधरी ॥१॥

शुद्ध त्याग एकेन्द्रिय रक्षण ।
शुद्ध त्याग दुतिचार सुलक्षण ॥
शुद्ध त्याग पंचेन्द्रिय रक्षण ।
शुद्ध त्याग समता गुणपक्षण ॥ २ ॥
शुद्ध त्याग मिथ्यामत निरीक्षण ।
शुद्ध त्याग पर वस्तु विरतण ॥

शुद्ध त्याग परिपालन त्यागी।
शुद्ध त्याग वृषभेश्वर भागी ॥ ३ ॥
शुद्ध त्याग परबोध सुदाता ।
शुद्ध त्याग दर्शन परिभ्राता ॥
शुद्ध त्याग कंदर्पविदारण ।
शुद्ध त्याग शीलाधिप तारण ॥ ४ ॥
शुद्ध त्याग परक्रोध निवारण ।
शुद्ध त्याग परमान विदारण ॥
शुद्ध त्याग मायागुण दारण ।
शुद्ध त्याग रिपुमोह विदारण ॥ ५ ॥
शुद्ध त्याग गृहमोहविनाशक ।
शुद्ध त्याग परहितकृत भापक ॥
शुद्ध त्याग जिनसूत्र सुपाठक ।
शुद्ध त्याग जिनसमय प्रकाशक ॥ ६ ॥

घत्ता—गृहपति पदत्याग, गतमुनिभागी, कृत वैराग्य, सुपरमपदं ।
श्रीअभयनंदी, गुरु समता भाजन सुमतिसागर जिनुधर्मपदं ॥७॥

ॐ ह्रीं उत्तमत्यागधर्माय महार्घं निर्वपामीति स्वाहा ।

अथ आकिंचन पूजा—

आकिंचनं ममतादिदूरं कृत्स्नसुखाकरं ।
पूजया परया भक्त्या पूजयामि तदाप्तये ॥

ॐ ह्रीं आकिंचनधर्म अत्र अवतर अवतर संवौषट् (आह्वाननं) अत्र तिष्ठ तिष्ठ ठः ठः (स्थापनं) अत्रमम सन्निहितो भव-भव वषट् (सन्निधापनं)

चिद्रूपचिंतनपरं ममभावविवर्जितं ।
आकिंचन्य परं लोके यजे साधुं सुपूजनैः ॥ १ ॥
ॐ ह्रीं ममताभावविवर्जितआकिंचन्यांगाय जलादिकं ॥१॥

परं वैराग्यभावज्ञं परपाखण्डवर्जितं ।
सामायिकरतं नित्यं संयजामि सुगृहातिगं ॥ २ ॥
ॐ ह्रीं वैराग्यपरताकिंचन्यांगाय जलादिकं ॥ २ ॥

अनित्यभवनागारं भामामोहविदूरगं ।
एकत्वभावमालीनं सौख्यदं तं यजे मुदा ॥ ३ ॥
ॐ ह्रीं अनित्यभावनाकिंचन्यांगाय जलादिकं ॥ ३ ॥

पुत्रपौत्रादिकमोहध्वंशकं रतिनाशकं ।
संयजामि सुपानीयैः चन्दनादिसुद्रव्यकैः ॥ ४ ॥
ॐ ह्रीं पुत्रपौत्रादिमोहरहिताकिंचन्यांगाय जलादिकं ॥४॥

गोमहिषाश्वहस्त्यादिदुर्गदेशनमामकं ।
महावैराग्यभावज्ञं यजेऽहं तं वनादिकैः ॥ ५ ॥
ॐ ह्रीं गोमहिष्यादिममतारहिताकिंचन्यांगाय जलादिकं ॥५॥

कर्मबन्धक्रियाहीनं महाश्रवविनाशकं ।
धर्मध्यानरतं नित्यं महामितं तपोनिधिं ॥ ६ ॥
ॐ ह्रीं पापक्रियारहिताकिंचन्यांगाय जलादिकं ॥ ६ ॥

जिनपूजारतं नित्यं जिनस्नपनदेशकं ।
धर्मस्नेह परं चाये स्वाकिंचन्य विसारदं ॥ ७ ॥
ॐ ह्रीं जिनपूजारताकिंचन्यांगाय जलादिक ॥ ७ ॥

धनधान्य सुहृद्दादिममभावविभावगं ।
पूजयामि गणाधीश माकिंचन्यपरं यतिं ॥ ८ ॥
ॐ ह्रीं नगरग्रामगृहसुहृद्दादिविरक्ताकिंचन्यांगाय जलादिकं ॥ ८ ॥

परीषहसहं धीरं द्वाविंशतिभेदगं ।
चर्चे वीतगृहं सूरं भव्यजीवप्रपालकं ॥ ९ ॥
ॐ ह्रीं परीषहसहनाकिंचन्यांगाय जलादिकं ॥ ९ ॥

त्रिगुणयुक्तवाक्येशं मधुरादिविपारगं ।
चर्चे कामजितं सूरं शुद्धं भावविमोहकं ॥ १० ॥
ॐ ह्रीं हितमितमिष्टत्रिगुणसहिताकिंचन्यांगाय जलादिकं ॥ १० ॥

जलगंधाक्षतैः पुष्पैः नैवेद्यैर्दीपधूपकैः ।
फलजातिसमूहैश्च संयजेऽर्घकैर्वरैः ॥ ११ ॥
ॐ ह्रीं आकिंचन्यांगाय महार्घं ॥ ११ ॥

अथ जयमाला—

घत्ता—आकिंचन्य अंगं, तत्त्वमुनिसंगं, भंगं कृतमदमोह तरं ।
संसारेसारं, समगुणधारं, ध्यानाध्ययन, विचार परं ॥१॥

आकिंचन ममताहीन धीर ।
आकिंचन समता शुद्ध वीर ॥
आकिंचन धर्म सुधरण शक्ति ।
आकिंचन भूषण दूरि संति ॥ २ ॥
आकिंचन ममता नारी न सार ।

आकिंचन नहि पुत्रभार ॥
आकिंचन मन विसुधन धार ।
आकिंचन मम नहि गोत्र भार ॥ ३ ॥
आकिंचन मम नहि गृह भंडार ।
आकिंचन मम नहिं रथसार ॥
आकिंचन पर वैराग्य धार ।
आकिंचन वैरि न मित्र पार ॥ ४ ॥
आकिंचन छत्र चमर न धरण ।
आकिंचन भूपतिपद न तरण ॥
आकिंचन मम न विषय पास ।
आकिंचन मुनितत्त विषयत्रास ॥ ५ ॥
आकिंचन धरणी शयन शुद्ध ।
आकिंचन मम नहि शयन शुद्ध ॥
आकिंचन सज्जन तरहु नेद ।
आकिंचन मुनि नहि करहु खेद ॥ ६ ॥

घत्ता—आकिंचन श्रीमुनिसुधन, भण्डार रत्नत्रय भूषणविमल ।
श्रीअभयनन्दी, यतिवरगत दूषण, सुमतिसार हृदिजिनकमल ॥७॥
ॐ ह्रीं उत्तम आकिंचनधर्माय महार्घं ॥

अथ ब्रह्मचर्य पूजा—

स्त्रीविरक्तं जगत्पूज्यं ब्रह्मचर्य महाव्रतं ।
पूजया परया भक्त्या यूजयामि तदाप्तये ॥

ॐ ह्रीं उत्तम ब्रह्मचर्यधर्मअत्र अवतर अवतर संवौषट् (आह्वाननं) अत्र तिष्ठतिष्ठ ठः ठः (स्थापनं) अत्रमम सन्निहितो भवभव वषट् (सन्निधिकरणं)

शुद्धव्रतधरं धीरं श्रीभरताधिपसुन्दरं ।
ब्रह्मचर्यं व्रतागारं पूजयामि शिवंकरं ॥ १ ॥
ॐ ह्रीं श्रीभरताधिपब्रह्मचर्यांगाय जलादिकं ॥ १ ॥
महाबलयुतं धीरं बाहुबलि महामुनिं ।
ब्रह्मचर्य सु भण्डारं पूजयामि शिवंकरं ॥ २ ॥
ॐ ह्रीं श्रीबाहुबलिब्रह्मचर्यांगाय जलादिकं ॥ २ ॥
अनन्तवीर्यं वीरेशं ब्रह्मचर्य व्रताधिकं ।
आदिमोक्षगतं धीरं पूजयामि शिवंकरं ॥ ३ ॥
ॐ ह्रीं श्रीअनन्तवीर्यब्रह्म चर्यांगाय जलादिकं ॥ ३ ॥
सुदर्शनं सुदर्शनं धर्मध्यान विपारगं ।
ब्रह्मचर्यमकूपारं पूजयामि शिवंकरं ॥ ४ ॥
ॐ ह्रीं सुदर्शनब्रह्मचर्यांगाय जलादिकं ॥ ४ ॥
सुरेन्द्रदत्तं कृपाब्धि ब्रह्मागारं जिनार्चकं ।
सुशीलसंयमापारं पूजयामि शिवंकरं ॥ ५ ॥
ॐ ह्रीं सुरेन्द्रदत्त ब्रह्मचर्यांगाय जलादिकं ॥ ५ ॥
श्रीरामब्रह्मधामं ब्रह्मभूषण व्रतादरं ।
दानपूजा कृपापारं पूजयामि शिवंकरं ॥ ६ ॥
ॐ ह्रीं श्रीरामब्रह्मचर्यांगाय जलादिकं ॥ ६ ॥
कुन्दकुन्दगुरुं चर्चे सद्ब्रह्मव्रतपारगं ।
दशधर्मसुधांभोधिं पूजयामि शिवंकरं ॥ ७ ॥
ॐ ह्रीं कुन्दकुन्दगुरुब्रह्मचर्यांगाय जलादिकं ॥ ७ ॥

अकलंकं गुरुं चाये दशधर्मसुधांबुधिं ।
महाशास्त्रकरं सूरिं पूजयामि शिवंकरं ॥ ८ ॥
ॐ ह्रीं अकलंक गुरु ब्रह्मचर्यांगाय जलादिकं ॥ ८ ॥

सुपात्रकेशरीं सूरिं वीतरागोक्तभावगं ।
स्वष्टसहस्री कर्त्तारं पूजयामि शिवंकरं ॥ ९ ॥
ॐ ह्रीं पात्रकेशरीब्रह्मचर्यांगाय जलादिकं ॥ ९ ॥

गोमट्टसार सिद्धान्त कर्त्तारं भव्यदेशकं ।
नेमिचन्द्रं सुबुद्धीशं पूजयामि शिवंकरं ॥ १० ॥
ॐ ह्रीं नेमिचंद्रब्रह्मचर्यांगाय जलादिकं ॥ १० ॥

भुवनमल यजाक्षत सरजमोदकदीपधूपमोचफलैः ।
दश कमलेभ्योऽर्घं दयाम्यहं शुद्धभावेन ॥ ११ ॥
ॐ ह्रीं उत्तमक्षमादि दशकमलेभ्यो महार्घं ॥ ११ ॥

जयमाला—

घत्ता—महाभरण मुनिजनहृदिकीधा, दर्शन बोध चरित्र धरी ।
ब्रह्मचर्यव्रतपालन, सहस्रअष्टादश, श्रीजिनभाषित, भेदकरी ॥१॥

मुनि वनितारूप विकार रहित ।
मुनि वनिता संगति नहिं करंत ॥
मुनि वनिता गोष्टि न मनधरंति ।
मुनि पंथि वनिता संग न चरंति ॥ २ ॥
मुनि देवनारि निश्चय त्यजंति ।
मुनिय सुभामा संग न भजंति ॥

मुनि चित्र काष्ठ भामा न संति ।
मुनि मातवनारि दूरि त्यजंति ॥ ३ ॥
ए च्यार नारी जिनगुरु वदंति ।
ते पि संग मुनि नहि गदंति ॥
एक नारि एक मुनि नहि सरंति ।
... कपोन संग न करति ॥ ४ ॥
ब्रह्मचर्य व्रत पद इन्द्रदेव ।
ब्रह्मचर्य सुव्रत नागदेव ॥
ब्रह्मचर्य व्रत सु चक्रधार ।
ब्रह्मचर्य सुव्रत देवतार ॥ ५ ॥
ब्रह्मचर्य सुव्रत श्रीविष्णुराज ।
ब्रह्मचर्य सुव्रत प्रति विष्णुभाज ॥
ब्रह्मचर्य सुव्रत गणधर सुबुद्धि ।
ब्रह्मचर्य श्री जिनय ऋद्धि ॥ ६ ॥

घत्ता-ब्रह्मचर्य सुव्रतपरं ब्राह्मी सुंदर प्रथम, वृषभजिन सुतारण ।
श्रीअभयनन्दीगुरु शीलसुसागर सुमतिसागर जिनधर्मधुरा ॥७॥

ॐ ह्रीं उत्तम ब्रह्मचर्यांगाय महार्घं ॥

॥ इति श्री दशलाक्षणिक उद्यापन संपूर्णं ॥

सांगवेद विद्यालय प्रेस, रामघाट काशी ।